हंस-दूतम्

श्रीलरूपगोस्वामिप्रभुपादविरचितम्

पण्डितप्रवरश्रीगोपालचक्रवर्तिविरचितया
टीकयालंकृतम्
पं० हरिकृष्णकमलेशमहोदयेन विरचितेन
गद्यानुवादेन तथा च
श्रीपन्नालालजी (प्रेमपुञ्ज) महाशयेन विरचित-
पद्यानुवादेन परिबृंहितम्

त्तिः १०००
[२०१४
—२॥)

प्रकाशकः—
कृष्णदासः
(कुसुमसरोवरनिवासी)
मथुरा

❀ प्रस्तावना ❀

देवाचार्यं यं विदुः सत्कवित्वे पाराशर्यं तत्त्ववादे महान्तम् ।
शृङ्गारार्थव्यञ्जने व्याससूनुं स श्रीरूपः पातु नो भृत्यवर्गान् ॥
(बलदेवः)

हंसदूताख्यदूतकाव्यमिदं महाभगवतः राधागोविन्दमिलित-विग्रहस्य, कलिपावनावतारस्य, प्रेमप्रदानायावतीर्णस्य श्रीकृष्णचैतन्य-देवस्य पार्षदप्रवरेण, कविमुकुटमणिना श्रीमद्रूपगोस्वामिचरणमहो-दयेन प्रणीतमिति गाथा रसिकहृदयदेशेषु जीवनतना नरीनर्त्ति । श्रीमद्रूपगोस्वामिपादः विक्रमाब्दस्य पञ्चदशशतके वंगदेशान्तर्गतमुर्शिदाबा-दखण्डे 'रामकेलि' नाम्नि ग्रामे दाक्षिणात्यब्राह्मणवंशे आविर्बभूव । अस्य महोदयस्य पूर्वजानां वंशवृक्षः क्रमत इत्थम्भूतः—(१) कर्णाटभूमि-पतिः श्रीसर्वज्ञः, (२) सकलयजुर्वेदस्योपदेष्टा अनिरुद्धदेवः (३) तस्या-निरुद्धस्य द्वयोर्महिष्योः सकाशात् रूपेश्वरहरिहरौ, (४) शिखरदेश-राज्यनिवासिनः श्रीरूपेश्वरस्य समस्त–यजुर्वेद-उपनिषद्विद्याविलसित-जिह्वः पद्मनाभ आसीत्,(५) नैहाटिनिवासिनः, गुणसमुद्रस्य,यशस्विनः पद्मनाभमहोदयस्य अष्टादश कन्याः पुरुषोत्तम-जगन्नाथ-नारायण-मुरारि-मुकुन्ददेवनामानः पञ्च पुत्राश्च आसन्, (६) सर्वकनिष्ठमुकुन्दस्य श्रीमान् कुमारदेव आसीत्, (७) वंगदेशनिवासिनः तस्य कुमारदेवस्य त्रयः पुत्रा बभूवुः । तेषु श्रीसनातनो ज्येष्ठः श्रीरूपो मध्यमः श्रीअनुप-मश्च कनिष्ठ आसीत् ।

श्रीमद्रूपसनातनौ तदानीन्तनवंगदेशाधिपस्य नृपतेः हुसेनशाहस्या-मात्यपदमलञ्चक्रतुः । महाप्रभोः श्रीचैतन्यदेवस्य महानुकम्पया तत्पदं गार्हस्थ्यं च तृणवत् परित्यज्य तदादेशतो झटिति वृन्दावनं गत्वा करंग-कौपीनधारिणौ वृक्षतलनिवासिनौ च भूत्वा विरेजतुः । श्रीमद्रूपगोस्वा-मिपादः कृष्णभक्तिरसभूषितान् बहु ग्रन्थान् समये रचयाञ्चकार । तेषु रसपरिपाटीवर्णने सिन्धुरिव "श्रीभक्तिरसामृतसिंधुः" जगन्मण्डले

रसिकजनहृदयवेद्यम् सम्मीकृत्य सर्वोपरि वरीवर्त्ति । भगवद् राधागोविन्दयोरप्राकृतश्रृङ्गाररसवर्णने "उज्ज्वलनीलमणि" रेव अद्वितीय-महोच्चतमो ग्रन्थराजः साहित्यभण्डारेऽपि वरीवर्त्ति । अपरं तु व्रजलीलाविषयवर्णनापरकं 'विदग्धमाधवनाटकम्' द्वारकालीलाविषयकवर्णन-परं 'ललितमाधवनाटकञ्च' जगद्विख्याते । पुनश्च ग्रन्थकारेण "दान-केलिकौमुदी" नाम्नी राधागोविन्दयोः दानलीलाविस्तारवर्णनकारिणी भाणिकाऽपि व्यरचि । भरतमुनिनिर्मितं "नाट्यशास्त्रं" रससुधाकरा-दिकं च दृष्ट्वा श्रीरूपपादैः "नाटकचन्द्रिका" नाम्नी नाट्यलक्षणमयी अपूर्वा पुस्तिका विरचिता । तन्निर्मिता "स्तवमाला" पि राधागो-विन्दयोः स्तवादिवर्णने अत्यद्भुता भवति । भगवद्स्वरूपतत्त्वनिर्णये परमदुर्लभं ग्रन्थरत्नं 'लघुभागवतामृतं' कोऽपि न जानाति ? श्रीराधा-कृष्णगणोद्देशदीपिकाऽपि सगण-श्रीराधागोविन्दयोः सेवापरिपाटी-व्यवहार्यद्रव्य-स्थानादीनां वंशावल्यादीनां च परिचये महती प्रसिद्धा ।

मथुरामण्डलान्तर्गत-वनोपवनादीनां संक्षेपतः वर्णनपरकं "मथु-रामाहात्म्य" मपि सर्वोत्तमं भवति । "श्रीकृष्णजन्मतिथिविधि" रपि जन्माभिषेकादौ परमावश्यकः स्यात् । तद्विरचिता "प्रयुक्ताख्यच-न्द्रिका"पि व्याकरणशास्त्रसम्बन्धी संक्षिप्तग्रन्थो दृश्यते । तन्निर्मितं "हंसदूताख्यं" दूतकाव्यं सहृदयरसिकहृदयेषु महत्कौतूहलं चमत्कार-दिव्यविप्रयोगरसपोषणं च निर्बाधं ददाति अस्मिन् न सन्देहता । उद्धवसन्देशनामा दूतकाव्यप्रबन्धोऽपि न केषाचित् आश्चर्यसार-सत्तां विरहरसवैचित्रीं च ददाति ?

तन्निर्मिते उद्धवसन्देशाख्ये दूतकाव्ये नायकचूडामणिना श्रीकृष्णेन मथुरातो द्वारकातो वा उद्धवद्वारा विरहविधुराणां गोपाङ्गनानां सर्वेषां व्रजवासिनां वा सान्त्वनाय दौत्यं प्रेष्यते । श्रीमद्भागवते "गच्छोद्धव ! व्रजं सौम्य ! पित्रोर्नः प्रीतिमावह । गोपीनां मद्वियोगाधिं मत्सन्देशै-र्विमोचय", "सान्त्वयामास सप्रेमैरायास्य इति दौत्यकैः" इत्यादि

श्लोकानवलम्ब्य अत्र ग्रन्थकारस्य रसिकजनहृदयपरितोषिणी महती चेष्टा संदर्श्यते। तत्र केन रूपेण कं सन्देशं नीत्वा केन मार्गेण मथुरातो वृन्दावनं गन्तव्यं कुत्र वा केन रूपेणावस्थेयं किं कर्त्तव्यं का वा दशा वर्णनीया इत्यादिकं उद्धवं प्रति स्पष्टतः वर्णनं नास्ति। अतः तान् स्पष्टयितुं श्रीरूपगोस्वामिपादैरिदं उद्धवसन्देशाख्यं दूतकाव्यं व्यरचि। अत्र श्रीकृष्णेन स्वयं उद्धवाय गमनमार्गं वर्ण्यते। तद्यथा—प्राक् गोकर्णाख्यशिवस्थलं (१) तदनु—यमुनासरस्वतीसङ्गमः, (२) ततः कालीयहृदपरिसरं, (३) तस्माद् ब्रह्महृदः, (४) ततः यज्ञस्थलं, तदनु-कोटिकाख्यस्थलं (६) ततः सटीकराख्यगरुडगोविन्दस्थलं, (७) तदनन्तरं बहुलावनं (८) ततः गोकुलं, (६) शाल्मलवनं च, (१०) तदनु—साहाराख्यं, (११) ततः रहेलाख्यं, (१२) ततः सौयात्रिकस्थलं, (१३) तदनु-गोष्ठाङ्गनवर्णनं, (१४) तदनन्तरं पूरप्रवेशनमित्यादिकम्।

हंसदूतस्य कथासारोऽयं—

कठिनमतेः दानपतेः गान्दिनीनन्दनस्याक्रूरस्यानुरोधेन गोपीहृदयानन्दने कमलवदने श्रीकृष्णे मथुरायां गते सति एकस्मिन् दिवसे व्रजललनामौलिरत्नरूपिणी महाविरहिणी राधिका विरहजनितान्तर्दाहप्रशमनेच्छुका सखीसहितानन्दरहिता च सती यमुनातटं गतवती। तत्र पूर्वपरिचितानि कुञ्जकुटीरादीनि दृष्ट्वाऽधिकतरकातरवेगेनाक्रान्ता च मूर्च्छां प्राप। तस्याः प्राप्तजडतां इत्थंभूतां दशां दृष्ट्वा तत्प्रातिकारार्थं गृहीतनलिनीदलचन्दनानां सखीकदम्बानां हा हेति शब्दसहिता नानाप्रतिक्रिया जाता। ताः सर्वा चंदनलेपितायां नलिनीदलशय्यायां तां स्थापयित्वा परिवव्रु विलापयामासुश्च। ततः प्रेमवलिता श्रीललिता शीतलयमुनाजलमानेतुं यमुनातटं त्वरितगत्या चलिता। विरहविकीर्णहृदया सा तत्र मधुरविरुतं श्वेतगरुतं सहसा ददर्श एवं हरिसदसि सन्देशप्रेषणाय निजमनसि तं श्रेष्ठदूतरूपेण निश्चयामास। हंसं उप-

लक्षीकृत्य ललितया यानि विरहदशामयानि वचनानि व्यक्तीकृतानि तानि श्रीरूपपादेन हंसदूताख्येन दूतकाव्यरूपेण श्लोकबद्धं ग्रथयित्वा प्रकटीकृतानि । राधिकाप्रेष्ठतमासख्याः श्रीरूपमञ्जर्याः अवतारस्वरूपे श्रीरूपे ऽत्र न कापि असम्भवसम्भावना ।

प्राक् प्रणयवेगचलितया ललितया मथुरागमनाय हंसं प्रति मार्गे-यानि स्थानानि उद्दिष्टीकृतानि तेषां क्रमपरिपाटी इत्थंभूता—प्रथमतः येन मार्गेण अक्रूरेण श्रीकृष्णो मधुपुरीं नीतः तेन जगत्प्रसिद्धमार्गेण हंसाय गन्तुमुक्त्वा तदनन्तरं क्रमतः चीरघाटस्य कदम्बवृक्षश्रेष्ठं, तन्निकटे रासस्थली, तत्र वासन्ती विरचितानङ्गोत्सवकला चतुःशाला, ततः गिरिगोवर्द्धनस्तदुपत्यकायां कदम्बवाटिका, ततः कियद्दूरे शुष्कमरिष्टासुर-मस्तकं, ततः भाण्डीरवटः, तन्निकटे ब्रह्मस्तुतिस्थली, तदनु-कालीयह्रद-स्ततः वृन्दावनाधिष्ठातृवृन्दादेविका, ततः एकादशवनानि तदनन्तरं वृन्दावनमिति । एतान् दृष्ट्वा दृष्ट्वा क्रान्त्वा क्रान्त्वा च मथुराप्रवेशनं निर्देशितम् । अनन्तरं मथुरायाः शोभैश्वर्यवर्णनं, ततः मथुरानागरीणा-मुल्लासकथनं विह्वलतावर्णनं च । तत्र श्रीकृष्णस्यान्तः पुरवर्णनं तदनु-उद्धवहस्ते समर्पितस्य शुकयुगलस्य मुखात् राधिकायाः सखीनां च संवादश्रवणकथनं, ततः क्रीडागृहवर्णनं, तदनु-यथावसरे गोपीनां राधिकायाः वा वार्त्ताभिवेदनाय उपदेशस्ततः श्रीकृष्णस्य रूपमाधुरी-वर्णनं,तदनु-व्रजवासिनां दशाकथनमित्यादिकम् । प्रायशः मेघदूतादारभ्य समस्तदूतकाव्यं मन्दाक्रान्ताछन्दसा विरचितम् । इदं तु शिखरिणी-छन्दसमालम्ब्य विरचितमिति भेदः । अस्मिन् काव्ये शब्दालङ्कारप्राचु-र्यस्य महती चर्या, लालित्यपदानां सुघलितता ऽनुप्रासशब्दकदम्बानां स्फुटाडम्बरसंघटना च यादृशी दृश्यते नान्यत्र सा उपलभ्यते । 'अगाधायां बाधामयपयसि राधा विरहिणी' (२) "भवानग्रे तस्मिन्नवदलकदम्बेन निबिडे—कदम्बे कादम्बेश्वर पथि" (१६) "तदन्ते श्रीकान्तस्मरसमर-धाटी पुटकिता कदम्बानां वाटी रसिकपरिपाटी स्फुटयति (२४) "इग-

'स्मोगम्भीरीकृतमिहिरपुत्रीलहरिभि:, विलीनाधूलीनामुपरि परिवब्रे परिजनै:" (४) इत्यादि नानाशब्दानुप्रासबदनयाऽयं अलंकृत: काव्य-पुरुषस्य परमसौष्ठवतां प्रकाशयति ॥

अस्य ग्रन्थरत्नस्य "श्रीलगोपालचक्रवर्ती विरचितेयं प्राचीना टीका कुशस्थली (कोसी) स्थितगोमतीतटनिवासिन: "श्रीलभगवानदास" बाबाजिमहोदयत: उपलब्धाऽसीत् । नानाचेष्टयाऽपि अस्य द्वितीय-प्रतिलिपी अप्राप्ता । 'चंदेरी' ग्रामनिवासिना श्रीमता "श्रीधीरेन्द्रदास" महोदयेनापि प्रचुरपरिश्रमेण एक प्रतिलिपी लिखित्वा मह्यं दत्ता । "दीर्घपुर" (डीग) निवासिना, बन्धुवरेण श्रीहरेकृष्णकमलेशमहोद-येन यथासमये अस्य गद्यानुवादं कृत्वा मह्यं प्रकाशनार्थं यद्दत्तं तदुपकारं न विस्मृतपथमगमत् । "स्वर्गीयमुन्शीपन्नालाल" (प्रेमपुञ्ज) महोदयेन विरचितं नाना छन्दसाऽलंकृतं अतिसुमधुरं अस्य पद्यानुवादं तत्पुत्रवरात् "श्रीविहारीलालगर्गात्" उपलब्धमासीत् ।

अस्मिन् देशे बहूनि दूतकाव्यानि दृश्यन्ते श्रूयन्ते च । तानि काक-दूत-पादपदूत-मनोदूत-पवनदूत-उद्धवदूत-कोकिलसन्देश - चकोरसन्देश-मेघसन्देश-हंससंदेश-कोकसन्देशादीनि । तेषु विष्णुदासेन विरचितं मनो-दूतं,धोयीकविना विरचितं पवनदूतं,वादिचन्द्रेण विरचितं पवनदूतकाव्यं, माधवकवीन्द्रविरचितं उद्धवदूतं, वेदान्ताचार्यकृत: हंससन्देश: विष्णु-त्राताविरचित: कोकसन्देश: एतानि दूतकाव्यानि प्रसिद्धानि ।

गौडीयग्रन्थरत्नकोषागारेऽपि श्रीमद्रूपचरणैर्विरचिते हंसदूत-उद्धवसन्देशाख्ये इमे द्वौ दूतकाव्ये एवं श्रीकृष्णदेवसार्वभौमेन विरचितं 'पदाङ्कदूतं', श्रीनन्दकिशोरगोस्वामिना विरचितं 'शुकदूताख्यं' बिशाल-दूतकाव्यं च समष्टित: चत्वारि दूतकाव्यानि विराजन्ते । इमानि सर्वाणि श्रीकृष्णरसपोषकाणि भवन्ति । एषु प्राकृतरसस्यावकाशो नास्ति ।

यद्यपि कविश्रेष्ठेन कालिदासेन विरचितं प्राकृतरसवैभववर्णनपरकं 'मेघदूताख्यं' दूतकाव्यं प्राचीनतया लोकोत्तरचमत्कारकतया च रसिके-

प्रशंसितं तदपि 'प्राकृते ये रसं मन्यन्ते ते भ्रान्ता एव तत्र विभावादीनां वैरूप्यात्', "साधुकाव्यनिषेवणात्", 'न यद्वचश्चित्रपदं हरे र्यशो जगत्पवित्रं प्रगृणीत कर्हिचित्। तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा निरमन्त्युशिक्षया', 'तद्वाग्विसर्गो जनताघविप्लवो यस्मिन् प्रतिश्लोकमवद्धवत्यपि। नामान्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः", श्रीरुक्मिणीदेवीवाक्येऽपि-त्वक् श्मश्रुरोमनखकेशपिनद्धमन्तर्मांसास्थिरक्तकृमिविट् कफपित्तवातम्। जीवच्छवं भजति कान्तमतिर्विमूढा या ते पदाब्जमकरन्दमजिघ्रती स्त्रीति' नाना प्रमाणबलात् तत्र प्राकृते रसं निषिध्य पुनः "रसो वै सः" "रसो ह्येवायं लब्ध्वानन्दी भवति" "सैषानन्दस्य मीमांसा भवती"त्यारभ्य मानुषानन्दतः प्राजापत्यानन्दपर्यन्तं दशकृत्वा शतगुणिततया क्रमेण तेषामानन्दोत्कर्षपरिमाणं प्रदर्श्य पुनश्च ततोऽपि शतगुणत्वेन परब्रह्मानन्दं प्रदर्श्याप्यपरितोषात् यतो वाचो निवर्त्तन्ते इत्यादिश्लोकेन तदानन्दस्यानन्त्यमेव स्थापितम्", 'नित्यरसः', 'सर्वरसः', 'अखण्डरसबोधः', 'सर्वरसकदम्बः', 'अखिलरसामृतमूर्त्तिः' इत्यादिनानावचनबलेन अप्राकृते भगवद्वस्तुनि एव रसत्वमन्यत्र रसाभासत्वं निश्चितम्। अतः अस्य श्रीउद्धवसन्देशहंसदूताख्यदूतकाव्यद्वयस्य निर्माणेन रसिकान् महाविप्रलम्भमयानन्दस्वरूपेण रसेन नित्यभगवद्रसे निमज्जयितुं ग्रन्थकारस्य महान् प्रयत्नः। तस्मात् प्राकृतनायकादिवर्णनपरात् मेघदूतात् अनयोः हंसदूतोद्धवसन्देशयोः महद्वैशिष्ट्यम्। रसस्य 'ब्रह्मास्वादसहोदर' धर्मात् तत्तु मोक्षे पर्य्यवसानात् तस्मादनन्तगुणिते आनन्दस्वरूपे भगवद्वस्तुनि एव रसपरमत्वं न तु मेघदूतादिवर्णिततुच्छनायक-नायिकाद्यनुभवस्मरणकीर्त्तनादेः, प्रत्युतं तत्तु पापावहत्वमेव। न तु प्राकृतनायकनायिकाविषयमवलम्ब्य केषाञ्चित् मोक्षं स्यात्। जीवस्याणुरूपतया तमालम्ब्यानन्दस्याणुरूपेण पर्य्यवसानात्। आनन्दसागरस्य भगवतः आश्रयात् तस्य अखण्डरसास्वादनमवश्यमेव स्वीकार्य्यम्। अस्तु अस्मिन्

दूतकाव्ये ब्रजवासिनां विप्रलम्भमयचरममहारसवैभवविलासं दर्शयित्वा श्रीरूपपादः काव्यास्वादनचतुरान् सहृदयरसिकान् किञ्चित् किञ्चित् परिवेषयित्वा आस्वादयामास। यं प्राप्य सर्वे कृतार्था अभवन् इति अलमतिविस्तरेण।

पद्यानुवादक की संक्षिप्त जीवनी—

इनका जन्म कस्बा फरह जिला मथुरा में सन् १८५५ ई० सम्वत् १९१२ विक्रम् के श्रावण मास में हुआ था। आप गर्ग गोत्री अग्रवाल वैश्य थे आपको १४ वर्ष की अवस्था में ही आपके पिता लाला मुकुन्द-रामजी स्वर्गवास कर गये। मुन्शी जी ने इस अपनी अनाथ वाल्या-वस्था में ही अत्यन्त साहस और परिश्रम के साथ अपने पठन पाठन का चालू रखा।

एत्मादपुर जिला आगरा में लगभग ३२ साल हिन्दी वर्नाक्यूलर मिडिलस्कूल के हैडमास्टर रहे। मुंशीजी को वाल्यावस्था से ही हिन्दी साहित्य से प्रेम था। काव्य, अलङ्कार, नाटक, नायिकाओं के भेद इत्यादि सम्बन्धी अनेक ग्रन्थों का और हिन्दी के प्राचीन कवियों का कविताओं का इन्होंने भली भाँति मनन किया था। अपनी हैडमास्टरी के समय ही मे इन्होंने समस्याओं की पूर्त्ति करना प्रारम्भ कर दिया था। कविता में अपनी छाप "प्रेमपुंज" अथवा "पुंज" डाला करते थे। पैनसन लेने के पश्चात् आप आगरा में रहने लगे। वहाँ चौबे अ-योध्याप्रसाद जी पाठक (वकील) से आपका परिचय हुआ। आप नागरीप्रचारिणीसभा आगरा में कविसम्मेलन उत्सव पर उपस्थित होते थे तथा वहाँ की कविताओं की समस्याओं की पूर्त्ति करके ले जाते थे। इनकी कविताओं की पूर्त्ति की बहुत प्रशंसा होती थी। उस समय आपने कविता में "स्वतन्त्रवनिता विनाश" नामक एक पुस्तक लिखी थी, जिसको महेन्द्रजी ने महावीर-प्रेस किनारी बाजार आगरा से छप-वाया था। इनकी आयुर्वेदिक और यूनानी हिकमत की भी पूर्णयोग्यता

थी। आगरा के वैद्य और हकीम लोग इनसे रोगियों की नाड़ी परीक्षा करा कर कठिन रोगों में इनसे सम्मति किया करते थे। आप बड़े परोपकारी थे एवं बिना शुल्क रोगियों की चिकित्सा किया करते थे। आपका गोलोकवास तारीख २५ मई सन् १६२४ को हुआ था। इस "हंसदूत" काव्य के भाषानुवाद का उत्साह उनको स्वर्गीय राधाकुंड निवासी पण्डित मोहनलालजी गोस्वामी जी ने दिलाया था। उनके प्रोत्साहन प्राप्त होकर आपने इस ग्रन्थ का हिन्दी पद्य और गद्य में भाषानुवाद किया था। इसका अनुवाद मिती श्रावण शुक्ला द्वादशी चन्द्रवार संवत् १६७८ विक्रम में समाप्त हुआ था। आपने स्वयं इस अनुवाद को लेकर वृन्दावन में गोस्वामी राधाचरणजी महाराज को तथा और भी अनेक सज्जनों को सुनाया। सब ने इस अनुवाद की बड़ी प्रशंसा की। आपके सुपुत्र श्रीबाबू लीलाबिहारीलाल गर्ग, रिटायर्ड सुपरिन्टेन्डेन्ट टेलीग्राफ कोठी केवलसहाय, बेलनगञ्ज आगरा ने इसके प्रकाशन के लिये बड़ी प्रसन्नता के साथ हमें प्रदान किया। परन्तु इस संस्करण में हम केवल "पद्यानुवाद" का प्रकाशन में समर्थ हुए।

अन्त में मैं उत्तर प्रदेश सरकार का विशेष आभारी हूँ कि इस ग्रन्थ के प्रकाशन में अर्थ सहायता देकर मुझे उत्साहित किया।

कृष्णदास
कुसुमसरोवर वाले,
(मथुरा)

गद्यानुवादक का संक्षिप्त परिचय—

कविराज पं० श्रीहरिकृष्ण "कमलेश" का शुभ जन्म सम्वत् १६८० में दीर्घपुर (दीग) भरतपुर राज्य में ब्राह्मण वंशावतंस स्वरूप प० श्रीसीतारामजी मिश्र के यहाँ हुआ। आपके पिता एक अच्छे पौराणिक पण्डित थे; किन्तु आपके जीवन पर पिताजी के अतिरिक्त पितामह श्रीशालिग्राम जी का अच्छा प्रभाव पड़ा। वह एक अच्छे पण्डित तथा सरल एवं कट्टर सनातन-धर्मी व्यक्ति थे। बचपन से आप में "साधु-सेवा" की प्रवृत्ति पैदा हो गई एवं आपकी रुचि "हिन्दी" "संस्कृत" तथा "बँगला" में तीव्रतम होती गई। आपने घर पर ही शिक्षा प्राप्त कर "संस्कृत" में अच्छी योग्यता प्राप्त की तथा परीक्षायें भी दीं। "संस्कृत" की उत्सुकता से आपने कई विद्वान् गुरु-चरणों में आश्रय प्राप्त किया और "बँगला" में सतत स्वाध्याय के अध्यवसाय से लगे रहने से अच्छा ज्ञान प्राप्त किया। "हिन्दी" की तो आप पर एक "वत्सलमाता" की भाँति कृपा ही थी; फलतः आप १२—१३ वर्ष की वयस में ही कविता करने लगे। अतश्च आपके हितैषीवर्ग ने आपको इस ओर प्रेरित किया। आपकी रचनायें अनेक दैनिक, साप्ताहिक तथा मासिक पत्र-पत्रिकाओं में निकलती रहीं, यदा-कदा आप "खड़ी बोली" में भी गल्प तथा कवितायें लिखते रहे और सन् १६९२ में मथुरा में श्रीराधेश्याम कथावाचक के साथ आपको भी "गौड़ महासम्मेलन" ने "कविरत्न" की उपाधि से विभूषित किया। किन्तु बाद में उस साहित्यिक दौड़ में आपने शान्त रहकर ही "भारती" की आराधना करना श्रेष्ठ समझा और आज भी अविच्छिन्न रूप से चल रहा है। हिन्दी के अतिरिक्त तामिल, तेलगू, उर्दू आदि भाषाओं में भी आपकी रुचि है।

"कविराज" का व्यवसाय भी आपने कतिपय गुरु-चरणों की छत्र-छाया में रहकर सीखा। आपने इस क्षेत्र में भी प्रौढ़ तथा सफल

सिद्धहस्तता प्राप्त की अतएव आपका "यश" भरतपुर के चारों ओर फैला हुआ है। आपने प्रारम्भ में श्रीवल्लभाचार्य जी गोस्वामी कामवन वालों के यहाँ चिकित्सक का कार्य किया और "आनन्दाद्रि" में प्रथम राजपूताना वैद्य सम्मेलन का आयोजन एवं सफलता आपके प्रयासों का ही प्रतिफल है। इस समय अपने रचनात्मक कार्य के अलावा "स्वागत कविता" आदि से भारत के विभिन्न भागों से आये विद्वानों को मन्त्रमुग्ध किया बाद में आपने यह कार्य स्वतन्त्र रूप से किया और "वैद्यवर" आदि २ उपाधियाँ प्राप्त कीं और आज भी आप 'आयुर्वेद' की सेवा में तत्पर हैं। इस प्रकार "आयुर्वेद" संस्कृत तथा हिन्दी का अध्यापन भी आपने अपने निवास-स्थान पर किया।

वास्तव में भरतपुर तथा प्रधानतः डीग क्षेत्र में आप ही एक प्रथम समाज-सुधारक तथा साहित्यिक के रूप में आये। आपने इस क्षेत्र में "श्री हिन्दी-पुस्तकालय डीग" तथा "श्रीसुधारिणी समिति जुरहरा" जैसी अनुकरणीय संस्थाओं की स्थापना अपने सहयोगी वर्ग की सफलता से की और "तन-मन-धन" से सेवा करते हुए पुष्कलदान दिया तथा ग्राम २ से एवं सम्बन्धी मात्र से दिलाया। इसके अलावा सामयिक-सुधार के लिये आपने "ब्राह्मण-मण्डल" तथा "नवयुवक मण्डल डीग" आदि की स्थापना की।

आपका अध्यवसाय पूर्ण जीवन, साधारण वेशभूषा "Simple living high thinking" का प्रतीक है। सरलता तथा मृदुता की प्रतिमूर्ति हैं। आज भी आप ६३ वर्ष की उम्र में "ब्रज-भाषा" की सेवा में रत हैं, क्योंकि श्रीसत्यनारायणजी कविरत्न जैसे व्यक्ति की हितैषिता, साहचर्य तथा प्रेरणा का ही यह प्रभाव है। शतशः नवयुवकों के प्रेरणा के स्रोत श्रीकविराज जी का "हिन्दी-साहित्य" विशेषतः "ब्रज-साहित्य" की सेवा की दृष्टि से महत्वपूर्ण स्थान है। "शृङ्गारवट" (वृन्दावन) गोस्वामी जी से आपने गोपाल मन्त्र की दीक्षा ली है।

(कृष्णदास)

❀ भूमिका ❀

◊◊◊◊

गौड़ीय संप्रदाय के जिन भक्त कवियों ने उत्तर-मध्यकाल में ब्रज-भूमि को अपनी सरस रचनाओं से आप्लावित किया उन में रूप और सनातन—इन दो गोस्वामी बन्धुओं का गौरवपूर्ण स्थान है। संस्कृत में इनकी अनेक भक्ति-विषयक रचनाएँ मिली हैं, जो काव्य-सौष्ठव और भावप्रवणता की दृष्टि से उच्चकोटि की हैं। राधा माधव की मधुर लीलाओं का विविध रूपों में जो वर्णन इन दोनों महानुभावों ने किया है वह कितना सुन्दर है, इसे रस-मर्मज्ञ ही समझ सकते हैं।

रूप गोस्वामी ने 'हंसदूत' तथा 'उद्धव-संदेश' नामक दो दूत-काव्य भी लिखे। इन दूत-काव्यों की शैली वही है जो कालिदास के 'मेघदूत' या धोयी के 'पवनदूत' में मिलती है। 'हंसदूत' में राधा की प्रिय सखी ललिता द्वारा हंस पक्षी को राधा की व्यथा का संदेश-वाहक बनाने का वर्णन है। परन्तु दूसरे ग्रन्थ "उद्धव-संदेश" में श्रीकृष्ण द्वारा उद्धव को गोपियों के पास भेजना वर्णित है। गौड़ीय साहित्य में कुछ अन्य दूतकाव्य भी मिले हैं। इनमें श्रीनन्दकिशोर-चन्द्र गोस्वामी का 'शुकदूत' तथा श्रीकृष्णदेव सार्वभौम का 'पदांकदूत' उल्लेखनीय हैं। 'शुकदूत' में विरही कृष्ण द्वारिका से शुक पक्षी को दूत बनाकर व्रज में राधा के पास भेजते हैं। यह १० सर्गों का बड़ा ग्रन्थ है। 'पदांकदूत' केवल ४५ श्लोकों का लघु ग्रन्थ है। इसके प्रारम्भ में आया है कि राधाजी ने एक दिन यमुना-तट पर श्रीकृष्ण के चरण-चिह्न को देखा। उन्होंने उसी से प्रार्थना की कि वह श्रीकृष्ण के पास जाकर उनसे राधा का विरह निवेदन करे।

उक्त चारों ग्रन्थ संस्कृत की दूत-काव्य परम्परा का सम्यक् निर्वाह तो करते ही हैं, साहित्यिक दृष्टि से भी ये पठनीय हैं। इनमें न केवल

राधा-कृष्ण के प्रगाढ़ प्रेम की और विरह-जनित विविध मनोभावों की मार्मिक अभिव्यक्ति है अपितु प्रकृति-वर्णन, ब्रजादि जनपदों के भौगोलिक वर्णन भी अत्यन्त सुन्दर हैं। 'शुक-दूत' में द्वारिका नगरी का वर्णन इस प्रकार किया गया है—

पतत्पताकांशुविलासभासितां विहंगकर्णस्पृहणीयभूपिताम्।
दिनेऽपि बाला: सुखचन्द्रभासितां समुद्रमध्यावयवेषु भासिताम्॥
(१२०)

इस ग्रन्थ के प्रथम सर्ग में वन तथा सरोवर का हृदयहारी वर्णन है। वन के वर्णन में पुष्पित लता-वृक्षों का सुन्दर चित्र खींचा गया है, जिसमें शब्दालंकारों की छटा दर्शनीय है—

मुकुलिता कुलिता भ्रमरोत्तमैः कवलिता वलिता दलसंचयैः।
स्तवकिता चकिता पिककूजितैर्नलता ललिता सुरभौ वभौ॥
(१।३५)

इस ग्रन्थ में रैवतक पर्वत, विंदु-सरोवर, सरस्वती नदी, उज्जयिनी, पुष्कर, मथुरा, गोवर्द्धन, प्रेम-सरोवर आदि के रोचक वर्णन हैं। पाँचवें और छठे सर्ग मे राधा की विरह-व्यथा का प्रभावोत्पादक चित्रण मिलता है। शब्द और अर्थ दोनों प्रकार के अलंकार स्थान-स्थान पर उपलब्ध हैं।

रूप गोस्वामी जी द्वारा लिखित 'उद्धव-संदेश' १२१ श्लोकों का ग्रन्थ है। इसमें आदि से अन्त तक मन्दाक्रान्ता छन्द का प्रयोग हुआ है। इस ग्रंथ में भी द्वारका और ब्रज के बीच के अनेक स्थानों का वर्णन है। ब्रज के स्थानों में अम्बिका वन, कोटिक तीर्थ, सट्टीकर (छटीकरा), गरुड़ गोविन्द, कालियहृद, शेषशायी, महार आदि के वर्णन उल्लेखनीय हैं। एक स्थान पर ब्रज के गोवत्सों का अत्यन्त सजीव आलेखन हुआ है। चपल बालकों के हाथों से अपनी पूँछ

छुड़ाकर उछलने वाले बछड़े और बछिया कितने सुन्दर लगते हैं, देखिए—

धावद्बालावलिकरतलप्रोच्चलद्वालधीनां
यत्रोत्तुङ्गस्फटिकपटलस्पर्द्धिदेहद्युतीनाम् ।
घ्रायं घ्रायं नवतृणशिखां मुञ्चतीनां वलन्ते,
वत्सालीनां चटुलचटुलं शश्वदाढ़ीकनानि ॥२४॥

'उद्धव-सन्देश' में विरह-वर्णन उत्कृष्ट कोटि का मिलता है। एक गोप-बाला का कथन सुनिए जिसमें उसने अपना हृदय खोलकर रख दिया है। वह वियोग के दुःख को अधिक दिन तक सहने में कितनी असमर्थता का अनुभव करती है और वृन्दावन के लता-वृक्ष उसे किस प्रकार कृष्ण के साथ रास-विलास की बातों का स्मरण कराते हैं:—

आशापाशैः सखि ! नवनवैः कुर्वती प्राणबन्धं,
जात्या भीरुः कति पुनरहं वासराणि क्षयिष्ये ।
एते वृन्दावनविटपिनः स्मारयन्तो विलासान्,
उत्फुल्लास्तान्मम किल बलान्मर्म निर्मूलयन्ति ॥ ८२ ॥

'हंसदूत' रूप गोस्वामी जी का दूसरा दूत-काव्य है। इसमें कुल १४२ श्लोक हैं। इसके सभी छंद शिखरिणी में हैं। मंगलाचरण के बाद कथा का प्रारम्भ होता है। राधा के विरह-संताप का वर्णन बड़ा ही मार्मिक है। उनकी प्रिय सखी ललिता द्वारा एक हंस को संदेशवाहक बनाया गया है। 'सज्जनों से कभी याचना विफल नहीं जाती', ऐसा हंस से कहकर ललिता उसे कृष्ण के पास जाने के लिए उद्यत करती है—

पवित्रेषु प्रायो विरचयसि तोयेषु वसतिं
प्रमोदं नालीके वहसि विशदात्मा स्वयमसि ।

अतोऽहं दुःखार्ता शरणमबला त्वां गतवती
न याञ्चा सत्पद्दे व्रजति हि कदाचिद् विफलताम्॥४॥

उक्त वर्णन को देखकर कालिदास के यक्ष की याद आ जाती है, जो मेघ से कहता है—

"याञ्चा मोघा वरमधिगुणेनाधमे लब्धकामा।"
(पूर्वमेघ, ६)

हंस को मार्ग का वर्णन बताते हुए ललिता उससे कहती हैं—"जामुन के से रंग वाले यमुना जल को पीते हुए, चंद्र-किरणों के तुल्य कमल-नालों का भक्षण करते हुए, सघन पत्रों वाले वृक्षों की डाली पर बैठकर विश्राम का आनंद लेते हुए तुम मथुरा नगर जाना। (श्लोक, १४)

१८ वें श्लोक में रास-स्थली का सुन्दर वर्णन है, जहाँ कृष्ण ने गोपियों के साथ हल्लीशक नृत्य किया था, आगे गिरिराज गोवर्द्धन तथा उसके समीप तमाल वृक्षों का वर्णन है, जहाँ चंचल शबरी वनिताएँ श्रीकृष्ण की विरहाग्नि से तप्त थीं। इसके पश्चात् वृन्दावन, भांडीरवट, कालियदह, वृन्दादेवी आदि स्थानों के मनोरंजक चित्रण हैं। ग्यारह वनों को लाँघने के बाद आम के वृक्षों से सघन मधुवन का उल्लेख है, जहाँ मथुरा नगरी बसी है। मथुरा में सखियों की दशा का मनोहारी वर्णन २३वें श्लोक के आगे मिलता है। श्रीकृष्ण की मधुर लीलाओं का स्मरण करती हुई सखियों के आलाप और चेष्टाओं का, विशेषकर राधा की विरह-व्यथा का वर्णन कवि ने अत्यन्त भावपूर्ण ढंग से किया है। राधिका का विरहालाप चेतन ही नहीं, जड़ को भी रुलाने में समर्थ है।

पूरा काव्य श्रीरूप गोस्वामी जी के पांडित्य और भक्ति-निष्ठा का परिचायक है। वर्णन की सरस एवं प्रवाहमयी शैली आदि से

अन्त तक देखने को मिलती है । प्रस्तुत रचना निस्सन्देह परवर्ती संस्कृत काव्य की मूर्धन्य रचनाओं में गणनीय है।

पुस्तक का सम्पादन बाबा कृष्णदास ने जिस ढँग से किया है वह सराहनीय है। प्रत्येक श्लोक के बाद उसकी विस्तृत संस्कृत टीका और हिन्दी अनुवाद दिया गया है। इसके अतिरिक्त प्रत्येक श्लोक का एक मुखोल्लास दोहा, मूल का छंदोबद्ध हिन्दी अनुवाद तथा सोरठा के रूप में सारांश भी दिया गया है। इस प्रकार प्रत्येक श्लोक की पूरी व्याख्या मूल के साथ उपलब्ध है। पद्यानुवाद में ब्रज-भाषा का ही प्रयोग किया गया है, जो बहुत सरल है।

अभी तक यह सुन्दर काव्य ग्रंथ हिन्दी के पाठकों के लिए सुलभ नहीं था। इस प्रकाशन द्वारा यह कमी दूर हो गई है और रूप गोस्वामी की सरस रचना का आस्वादन अब केवल हिन्दी जानने वाले भी कर सकेंगे। यह हर्ष की बात है कि रूप गोस्वामीजी के दूसरे दूत-काव्य 'उद्धव-सन्देश' का भी प्रकाशन हिंदी अनुवाद के सहित बाबा कृष्णदासजी ने करा दिया है। आशा है कि इसी प्रकार 'शुक-दूत' तथा 'पदांक-दूत' भी सानुवाद शीघ्र प्रकाशित होंगे।

मथुरा।

१२—४—५७

—कृष्णदत्त बाजपेयी,

अध्यक्ष, पुरातत्त्व संग्रहालय।

सानुवाद संस्कृत भाषा में—

१. अर्चाविधिः (संगृहीत)
२. प्रेमसम्पुटः (श्रीविश्वनाथचक्रवर्तीजीकृत)
३. भक्तिरसतरङ्गिणी (श्रीनारायणभट्टजीकृता)
४. गोवर्द्धनशतक (श्रीविष्णुस्वामी संप्रदायाचार्य्य श्रीकेशवाचार्य्य कृत)
५. चैतन्यचन्द्रामृत और सङ्गीतमाधव (श्रीप्रबोधानन्द-सरस्वतीजी कृत)
६. नित्यक्रियापद्धतिः (संगृहीत)
७. व्रजभक्तिविलासः (श्रीनारायणभट्टजी कृतः)
८. निकुञ्जरहस्यस्तवः (श्रीमद्रूपगोस्वामी कृत)
९. महाप्रभुग्रन्थावली (श्रीमन्महाप्रभुमुखपद्मविनिर्गता)
१०. स्मरणमङ्गलस्तोत्रं (श्रीमद्रूपगोस्वामिजीकृत)
११. नवरत्नं (श्रीहरिरामव्यासजी कृत)
१२. श्रीगोविन्दभाष्यं (श्रीपादबलदेवजी कृत)
१३. ग्रन्थरत्नपञ्चकम्
   (१) श्रीकृष्णलीलास्तवः (श्रीपादसनातनगोस्वामि कृतः)
   (२) श्रीराधाकृष्णगणोद्देशदीपिका (श्री श्रीरूपगोस्वामिजी कृता)
   (३) श्रीगौरगणोद्देशदीपिका (श्रीकविकर्णपूरजी कृता)
   (४) श्रीव्रजविलासस्तवः (श्रीश्रीरघुनाथदासगोस्वामिजी कृत)
   (५) श्रीसंकल्पकल्पद्रुमः (श्रीविश्वनाथ चक्रवर्तीजी कृत)
१४. श्रीमहामन्त्रव्याख्याष्टकम् (सङ्कि
१५. ग्रन्थरत्नषट्कम् (सङ्कलित)
१६. श्रीगोवर्द्धनभट्टग्रन्थावली
१७. सहस्रनामत्रयम् अथवा ग्रन्थरत्ननवकम्
१८. श्रीनारायणभट्टचरितामृतम् (श्रीजानकीप्रसाद गोस्वामिकृत)
१९. उद्धवसन्देशः (श्रीमद्रूपगोस्वामिविरचितः) ।
२०. हंसदूतम् (श्रीमद्रूपगोस्वामिविरचितः) २

श्री श्री राधारमणो जयति ।

श्रों नमो भगवते श्रीगौरचन्द्राय

❀ हंस-दूतम् ❀

दुकूलं बिभ्राणो दलितहरितालद्युतिभरं
जवापुष्पश्रेणीरुचिरुचिरपादाम्बुजतलः ।
तमालश्यामाङ्गो दरहसितलीलाञ्चितमुखः
परानन्दाभोगः स्फुरतु हृदि मे कोऽपि पुरुषः ॥१॥

यः सर्व्वैरभिसंस्तुतोऽपि सततं यास्तौति यो योगिभि
र्ध्येयोऽप्यन्तरनन्तभावचतुरा याः सन्ततं ध्यायति ।
वेदैर्मृग्यपथोऽपि यो मृगयते यासां रहः पद्धतिं
तं दुर्ज्ञेयमुपास्महे मुररिपुं धन्याश्च ता गोपिकाः ॥

अखण्डानन्दबोधाय सर्व्वस्मै सर्व्वहेतवे ।
मनो-वचन-दूराय कृष्णाय सततं नमः ॥

टीका—अथ मुरहरचरण-कमलयुगल-परिचरणविरहित-सकलासारसंसारवासनः श्रीवृन्दावनैकनिकेतनः परमभागवतः कविकुलधुरिणः श्रीरूपदेवोऽनवरतहरिचरितस्मरणेनैव सकलमपि याममयातयामं कर्त्तुं काव्योपदेशेनापि गोपीरमणचरणस्मरणमुपनयन्निजाभिमतदैवतं श्रीकृष्णरूपमङ्गलमाचरति । दुकूलमित्यादि मम हृदि कोऽपि तत्त्वेन नामजात्यादिविशेषेण निर्देशानर्हः पुरुषः स्फुरतु आविर्भवतु इत्याशंसा । एवंभूतस्यापि नराकृति-परब्रह्मत्वानुस्मरणाय विशेषणानि । स दुकूलं क्षौमं बिभ्राणो दधानः जात्या एकत्वं दुकूलं कीदृक् दलितेत्यादि दलितं यत्हरितालं धातुविशेषः तस्य द्युतिं कान्तिं हरति पचादिः, एतेन पीतत्वमुक्तं पुनः कीदृक् जवासंज्ञकानि पुष्पाणि श्रेणी पंक्तिः समूहमितियावत् तस्या रुचिः कान्तिस्तद्वत् रुचिरं पादाम्बुजयोस्तलमधोभागो यस्य सः । अथवा रु-

चिरा घटमानत्वात् पुष्पाख्येवाक्षिपति पञ्चमूलीमानयतिवत् तवेत्याद्यु-क्त्या पुष्पप्रतीतौ पुष्पपदयाद्रुतानुभवार्थं एतेन कान्तेरव्यतिरिक्तता प्रतीयते उपरञ्जकमेतत् तथाचोक्तं धनुश्रादिषु शब्देषु शब्दाश्च धनु-रादयः आरूढत्वाद्वि वा याति किञ्च "दत्ते वैकजवा-पुष्पे पञ्चवक्त्रफलं लभेत् । यत्रापराजितापुष्पं जवापुष्पं तथैव च" इत्यागमशासनात् । वृ-क्षोऽपिजवापुष्पशब्दवृत्तिः प्रतीयते । अत्राप्ययं समासो वा तथा चामर-टीकायां रायमुकुटधृतत्रिकाण्डशेषः "ओड्रपुष्पोऽपि वृक्षोऽपि जवा-शब्दः प्रकीर्त्तितः" । तमालोऽतिबहुलश्यामच्छविवृक्षविशेषः तद्वत् श्यामसङ्गं यस्य स पुनः कीदृक् दरेति दरमीसद्धसितं तदेव लीला विला-सः, यद्वा दरहसिते ईषत् हसिते या लीला विभ्रमविशेषः तेन वा अञ्चितं पूजितं मुखं यस्य स च अत्र शोभाविशेष एव पूजा "हसितं तु वृथाहासो यौवनोद्भेदसम्भव" अकाण्डजत्वात् वृथात्वं इतरस्य साधा-रण्यं व्यावर्त्तयितुमाह–परेति परश्चासावानन्दश्चेति स तस्य आभोगः परिपूर्णता तत् स्वरूपः भावप्रधानोऽयाभोगशब्दो भविमृबोधं जनयति सामानाधिकरण्यानुपपत्तेः एतेनानन्दस्वरूपत्वमुक्तं तथा च श्रुतिः "आ-नन्दो ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमिति" । परमानन्दस्य आभोगो यस्येतिपक्षस्तु परब्रह्मणि न लभते श्रुतिविरोधात् उपाधि–सम्बन्धस्या-विद्यमानत्वात् यतस्तत्र भेदः प्रतीयते । परमानन्दस्य आभोगो यस्मात् इति वा आभोगः शब्दः । ननु नन्दपुत्रत्वेन प्रतीतस्य कथं तथात्वमि-त्याशङ्कायामाह पुरुष इति परापि सन् पुरुषः तथा चोक्तं विधाय शेते अन्तर्य्यामितया वसति पुरुषः तथा चोक्तं विधाय शेते यदमूष् पूरुष इति तस्मात् सर्व्वथा नित्यत्वमुक्तं आविर्भावादिकन्तु मायाविलसित-मित्यर्थः । यद्वा ननु मनुष्यत्वेन प्रतीयमानस्य परिच्छिन्नस्य कुतः परा-नन्दाभोगत्वमित्याशङ्कायामाह पुरुष इति पुरुषु शरीरे शेते समीप-मात्मेत्यर्थः । उभयपक्षेऽपि निरुक्तं साधनं तथा च कोपीत्यनेनास्यर्थ-श्च । खण्डकाव्यत्वमुक्तं कश्चिदित्यादिभिः पदैरिति । तत्र संघात्मं

खण्डकाव्यं यदुक्तं—यत्रैकमर्थमेकेन सर्वेणैव तु वर्णयेत् । एकेन छन्दसा तत्तु सांघ्मताख्यमुदाहृतमिति वा एवे मन्ये— तदुक्तं समानवृत्तिनिव्यूंह—कौशिकीवृत्ति—सम्पन्न नायोऽनालि—घटित—पद्यैर्गीत धीयते इति आशीरलङ्कारतः अभिलषितश्रीकृष्णमूर्त्तेर्वा संशनात् तथा च आशीनांमाभिलषितवस्तु—ध्यानं यथा इति विभ्रमशोले श्यामः त्रित्वाद्वागर्थ एव क्रियाफलस्यानन्तरत्वात् ओड्रपुष्पं जवेत्यमरः ओड्रपुष्पे जवाशब्दश्च प्रकीर्तित इति रायमुकुटघृत—त्रिकाण्डशेषः जवो वेगवति त्रिषु पुंलिंगस्तु भवेद्वेगे । ओड्रपुष्पे जवा स्मृतेति च वर्गतृतीयादौ मेदिनी । श्रेणी स्त्रीपुंसयोः पंक्तौ समान शिल्पि संहारीति च । तमालस्तिलके खड्गे तापिच्छे वरुणद्रुमे इति च । लीलां विदुः केलिविलासहासशृंगारभावप्रभवक्रियासु इति विश्वप्रकाशः । आभोगो वरुण-छत्रे पूर्णतायत्नयोरपीति विश्वप्रकाशः । शिखरिणीछन्दस्तल्लक्षणं यथा रसै रुद्रैश्छिन्ना य म न स भ ला गः शिखरिणी ॥१॥

अनु०—जो उज्ज्वल-पीताम्बरधारण किए हुए हैं, जिनके-चरण-तल जपा-कुसुम के वर्ण समान लालिमामय-सुन्दर हैं और जिनका मुख-कमल मृदु-मन्द हास्यरेखा से शोभित है ऐसे परिपूर्ण परमानंद-घन मूर्त्ति, तमाल-श्यामल शरीर मेरे हृदय में प्रकाशित होवैं ॥१॥

मुखोल्लास—दोहा

अखिल लोक आधार जो, पूरण परमानन्द ।
मम उर तिन श्री कृष्ण कौ, होहु प्रकाश अमन्द ॥१॥

मूल की भाषा पद्य (सवैया मत्त गयन्द)

धारत पीतपटा छवि तासु दली हरिताल की कान्ति दुराई ।
पोति प्रसून जपा जनु सोहति जासु पदाम्बुज की अरुणाई ॥
श्याम तमाल सौ अङ्ग लसै मुसकानि भरी मुख की जु लुनाई ।
सो परमानँद पूरण रूप प्रकाशहु मो उर अन्तर आई ॥१॥

सारंग—सोरठा

तनु तमाल सम श्याम, ता पर पीताम्बर रुचिर।
मन्द हँसनि अभिराम, दिव्य रूप यह उर बसै ॥१॥

◇○○◇

यदा यातो गोपीहृदयमदनो नन्दसदना-
न्मुकुन्दो गान्दिन्यास्तनयमनुविंदन् मधुपुरीम् ।
तदामाङ्क्षीच्चिन्तासरिति घनघूर्णापरिचयै-
रगाधायां बाधामयपयसि राधा विरहिणी ॥२॥

टीका—इदानीमिष्टदेवतास्फूर्त्तिप्रार्थना-रूप-मंगलमाचर्य्य सकलरसेषु शृंगाररसस्य प्राधान्यात् तत्रापि विप्रलम्भस्य निरवधि हेतुमेव वर्णयन् प्रस्तावमवतारयति । यदेति ननु विषयसुखविमुखस्य पुण्यारण्यैकनिकेतनस्य किमनयानर्थं विवक्षया तथा चोक्तं संत्याजत् प्रमदागाथामित्यादि यतिधर्म्मे श्रीभागवते सत्यं अन्यविषयवर्णनमेव दोष एव श्रीकृष्णविषयककामवर्णनेन कामस्यैव फलं तथा च दशमे—न मय्यावेशितधियां कामः कामाय कल्पते । भर्जिता क्वथिता धाना प्रायो बीजाय नेष्यते (१०–२२–२६) इति, प्रथमे मायां वर्णयतोऽमुष्य मायायां मुह्यतीति "तद्वाग्विसर्गो जनताघविप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि । नामान्यनन्तस्य यशोऽङ्कितानि यत् शृण्वन्ति गायन्ति गृणन्ति साधवः (१-५-११) इति । अलं बहुना प्रकृतार्थो व्याख्यायते मुकुन्दः श्रीकृष्णो नन्दसदनान्नन्दस्य गृहात् मधुपुरीं मथुरां यातः गतस्तदा राधा चिन्तासरिति भावनारूपनद्यां अमाङ्क्षीत् मग्नाबभूव मम कष्टं एतादृश अनुपमलावण्यधाम भगवद्विरहे कथं जीविष्यामीति चिन्ता स कीदृक् गोपीहृदयमदनः गोपीनां हृदयं मनो मदयति हर्षयतीति तथा कर्त्तरि अनट् हृदयाल्हादकस्य विरहेऽत्यन्तचिन्ता हेतुर्भवत्येव, किं कुर्वन् गान्धिन्यास्तनयं अक्रूरं अनुविन्दन् तत्समान सहायः सन्निति यावत् यद्यपि आ-

त्मना जायते धन्यो मध्यः पितृपितामहः । मातृपक्षेण मात्रा यः ख्याति-
मेति नराधम इति मार्कण्डेयपुराणान्मातृकीर्त्तनेनाधमत्वं प्रतीयते तथा-
प्यति पुण्यशालित्वात् तन्नामोक्तं तथा गान्धिनी नाम काशीराजसुता
सा च मातुरुदरे द्वादशवर्षाण्यवात्सीत् ततस्तत् पित्रोक्तं अम्ब किमिति
न जायसे कथं मातरं क्लेशयसि अतो गर्भस्थयात्मजयोक्तं पितर्यदि
प्रतिदिनं गामेकैकां विप्राय ददासि तदा वत्सरत्रयान्तेऽहं निःसरिष्यामि
ततस्तत् पित्रा तथाचारि सेयं भवा स्वयमपि दिने दिने ब्राह्मणाय एकैकां
गां ददातीति गान्धिनी नाम्ना बभूवेति विष्णुपुराणीया वार्त्ता । कथम्भू-
तायां चिन्तासरिति घूर्णा आवर्त्तस्तस्य परिचया अत्यन्त संश्लेषयास्ते-
रगाधायां अगम्यायां बहुवचनेन निरन्तर घूर्णा-सम्भवः उक्तः । चिन्तापक्षे
बाधामयं पीडारूपं पयो यस्याः स्वार्थे मयट् । तत्र हेतुर्यतो विरहयुक्ता
विरहः कान्तसंयोगाभावः अत्र समाप्तपुनरात्ततामेव दोषपरिहाराय हे-
तुगर्भविशेषणतया व्याख्यायते । प्रोषितभर्त्तृकेयं यदुक्तं सा मनोभव दु-
ष्मर्त्तासिवेद् प्रोषितभर्तृकेति । अन्यच्च देशान्तरगते पत्यौ सन्तापव्या-
कुला प्रोषितभर्त्तृकेति ॥२॥

अनु०—जब गोपीजन-हृदयानन्दन-श्रीकृष्णचन्द्र ने अक्रूर के अनु-
रोध से उनके साथ श्रीनन्द-भवन से मथुरा को गमन किया तब
विरहिणी श्रीराधिका उनके-विरह में व्याकुल होकर निविड-आव-
र्त्तमय अगाध पीडापूर्ण, चिन्ता-नदी में मग्न हो गई ॥२॥

सुखोल्लास

गये संग अक्रूर के, मथुरा कृष्ण मुरारि ।
दुखित भये ता विरह में, ब्रजवासी नर नारि ॥२॥

मूल की भाषा पद्य—छन्द दोवै

गोपीजन मन-मदन प्रकाशक-भक्तन शुभ गात कारी ।
सँग अक्रूर नन्द घर तें मथुरा कों गये मुरारी ॥

तब ही नें विपत्ति जल पूरी चिन्ता सरित अगाधा।
भ्रम बहु भँवर परैं तहँ बूड़ी कृष्ण विरह दुख राधा॥२॥

सारांश—सोरठा

विरह विपति जल धार, चिन्ता सरिता रूप जनु।
बहु भ्रम भँवर अपार, तामें बूड़ी राधिका॥२॥

००००

कदाचित्खेदाग्निं विघटयितुमन्तर्गतमसौ
सहालीभिर्लेभे तरलितमना यामुनतटीम्।
चिरादस्याश्चित्तं परिचितकुटीरावकलना-
दवस्था तस्तार स्फुटमथ सुषुप्तेः प्रियसखी॥३॥

टीका—अथ निरन्तर-विरह-दहन-परितापिताया राधाया विरहतापोपनोदनाय यमुनातटगताया विरहोद्वेगोद्दीपनं वर्णयन् प्रस्तावमाविष्करोति। कदाचिदित्यादि-असौ राधा कदाचित् अन्तर्गतं खेदाग्निं विघटयितुं आलीभिः सखिभिः सह यामुनतटीं यमुनातीरं लेभे प्राप्तवतीत्यन्वयः। ननु विरहे रम्यस्थानादेरुद्वेगजनकत्वात् कथं तत्रान्तर्गतखेदाग्निः खंडनं भवतु यत उक्तं हसितानि सुगन्धानि सरांसि च वनानि च। सम्भोगाभिमुखं कुर्युरुद्वेगं विरहे भृशमिति अत आह तरलितमनाः चञ्चलचेता अतएव विरहतापोपशमः स्यादिति चिन्तावती किञ्च तरलितं चापादानादेश्चाञ्चल्यस्यभावश्च सूचितः तथा चोक्तं भूयिष्ठं दहमानोऽसौ शीतलं वस्तु सेवते। गात्रं विरहसन्तापाद् यत्र कुत्र विमुञ्चतीति विरहोद्दीपनहेतुमाह चिरादिति। अस्या राधायाश्चित्तं कर्म चिरात् चिरकालं व्याप्य परिचितं परिशीलितं यत् कुटीरं अर्थाल्लतागृहं तस्यावलोकनात् दर्शनात् अवस्था दशा स्फुटं व्यक्तं यथास्यात्तथा तस्तार व्याप्तवती प्राक् गुरुजनलज्जया तिरोहितासीदिदानीं निर्लज्जतया व्यक्ता बभूवेति स्फुटशब्दार्थः अवस्था कीदृशी सुषुप्तेः प्रियसखी सुषुप्तिर्वामिर्उद्रिक्ताया-

बुद्धे रवस्थाविशेषः तथा चैकादशे-जाग्रत् स्वप्न सुषुप्तञ्च गुणतो बुद्धि-वृत्तय इति(११-२-२७) सत्त्वाज्जागरणं विद्यात् रजसा स्वप्नमादिशेत्। प्रस्वापं तमसा जन्तोरिति च(११-२५-२०)प्रस्वापं सुषुप्तिं सा च मूर्च्छा-सदृशी जातेति ध्वनितं स्फुटे व्यक्ते प्रफुल्ले च व्याप्ते च कलितेऽन्यवद्-निविश्व: ॥३॥

अनु०—किसी दिन श्रीराधिका विरह से व्याकुल एवं अधीर मन होकर अपनी मर्म-भेदी विरह-व्यथा को दूर करने के लिए अपनी प्यारी सखियों के साथ श्रीयमुना-पुलिन पर जा पहुँची। जो निकुञ्ज-भवन-चिर-परिचित अपना विहार-स्थल था उसके दर्शन मात्रसे उनके हृदय में श्रीकृष्णचन्द्र की मधुर-स्मृति उद्दीपित हो उठी और उनको प्रिय सुषुप्ति की मोहमयी दशाने प्यारी सखी की भांति आच्छादित कर लिया अर्थात् श्रीराधा मूर्च्छिता होगई ॥३॥

मुखोल्लास—दोहा

सुखप्रद होत पदार्थ जे, प्रिय-संयोग मझार।
जाने जात वियोग में, ते दुख के आगार ॥३॥

मूल की भाषा पद्य-छन्द गीतिका

यह खेद अपनी घटन कों चञ्चल मना राधा चली।
गइ तीर यमुना के सखिन सँग विरह विपदा में रली॥
देखी लता कुञ्जैं तहाँ परिचित अनेकै दिनन की।
लखि तिनहिं मूर्छित भई सो सुधि बुधि गँवाई स्व तन की॥३॥

सारांस—सोरठा

राधा यमुना तीर, विरह ज्वाल के घटन हित।
गयी सु भई अधीर, परिचित कुञ्जन को निरखि॥३॥

0000

तदा निष्पन्दाङ्गी कलितनलिनीपल्लवकुलैः

परीणाहात्प्रेम्णामकुशलशताशंकिहृदयैः।

दृगम्भोगम्भीरीकृतमिहिरपुत्रीलहरिभिः
विलीना धूलीनामुपरि परिवव्रे परिजनैः ॥४॥

टीका—तथा चातिसम्भ्रमेण सखीनां व्याकुलितत्वं वर्णयति । तथा तेन प्रकारेण मूर्च्छयेति यावत् निष्पन्दाङ्गी सा परिजनैः सखीभिः परिवव्रे वेष्टिता इत्यन्वयः । कीदृशैः कलितनलिनी-पल्लवकुलैः कलितं धृतं नलिन्याः पल्लवकुलं दलसमूहो यै पुनः कीदृशैः अकुशल-शताशङ्किहृदयैः अकुशलशतं मरणादिः तदाशंकनशीलं हृदयं मनो येषां तत्र हेतुः प्रेम्णां परिणाहादिति । प्रेम्णां विशालताहेतोः अतिप्रियवस्तुनो प्रायमेवाशङ्केत इति लौकिकीरितिः पुनः कीदृशैः दृगित्यादि दृशामम्भोभिर्नेत्रजलै र्गम्भीरीकृता मिहिरपुत्र्या लहरी तरङ्गो यैः । सा कीदृशी धूलीनामुपरि विलीना विरोपिता पतितेत्यर्थः । क्रमं जनपदे गोत्रे सजातीयगणेऽपि च । भवने च तनौ क्लीबमिति,परीणाहो विशालतेत्यमर उपसर्गस्य बन्यमनुष्ये वहुलमितिदीर्घः, मिहिरारुण पूषण इति च ॥४॥

अनु०—उस मूर्च्छित दशा में स्पंदन शून्य (जड़वत्) पुलिन-शय्या पर पड़ी हुई श्रीराधाजी को सखियाँ चारों ओर से घेर कर पद्म पत्रों से वीजन करने लगीं तथा प्रेमाधिक्य से उनका हृदय शतशत अमंगलों की आशंका करने लगा कि, हाय, न जाने हमारी प्रिय सखी राधिका-अब जीवित रह सकेगी या नहीं ? उनके मन में इस तरह की आशंका होने लगी और उन सबका नयनजल यमुना में गिर-गिर कर नदी की तरंगों को द्विगुणित करने लगा अर्थात् व अधिकाधिक रोदन करने लगीं ॥४॥

सुखोल्लास—दोहा

राधा के तन की दशा, मौन मलिन हत चेत ।
निरखि सखी सोचत जतन, पै न दिखाई देत ॥४॥

मूल की भाषा पद्य-छन्द रूप घनाक्षरी

विरह व्यथा तें जाके थकित भये हैं अङ्ग,
लोटी रज माहिं चारों ओर आलिन की भीर।
पवन डुलायवे के हेतु हाथन में जिन,
सुन्दर कमलिनी के पात हू गहे स नीर॥
अति ही विशाल प्रेम कारन सों सोचें,
सब सैकरन शङ्का अकुशल की करें अधीर।
बाढ़ी मन भ्रमना जो थमना सकति नेंक,
आँसुन सों जमना की धारहू करी गँभीर॥४॥

सारांश—सोरठा

सखिजन प्रेमासक्त करत कमल दल बीजना।
भई हताशा व्यक्त राधा जीवन में जिन्हें॥४॥

००००

ततस्तां न्यस्ताङ्गीमुरसि ललितायाः कमलिनी-
पलाशैः कालिन्दीसलिलशिशिरै र्वीजिततनुम्।
परावृत्तश्वासाङ्कुरचलितकण्ठीं कलयतां
सखीसन्दोहानां प्रमदभरशाली ध्वनिरभूत्॥५॥

टीका—ईषदाश्वस्तां वीक्ष्य तत् सखीनां हर्षचेष्टितमाह तत इत्यादि ततः कमलदलवीजनानन्तरं तां राधां कलयतां पश्यतां सखीसन्दोहानां सखी-समूहानां प्रमदभरशाली हर्ष-निवहयुक्तो ध्वनिरभूत् जय जय मंगलमित्यादि शब्दोऽभवत् कीदृशीं ललितानाम्नी प्रियसहचरी तस्या उरसि न्यस्ताङ्गीं निक्षिप्तदेहां कमलिनीपलाशैः पद्मपत्रैर्वीजिततनुं वीजिता तनु र्यस्याः नित्यापेक्षत्वात् सापेक्षेणापि समासः कीदृशैः कालिन्दी यमुना तस्याः सलिलेन शिशिरैः शीतलैः तां कीदृशीं परावृत्तः प्रतिनिवृत्तः बहिः स्फुटो यः श्वासांकुरः प्राणवायुस्तेन चलितः ईषत् स्फुरितः कण्ठ

यस्या अंकुरवद् ईशत्व सूचनार्थं पत्रं पलाशं छदनमित्यमरः। समूह-निः ह-व्यूह-सन्दोह-विसर-व्रज इति। भवः पूर्वो द्वयो पुंसि भवोऽतिशय-भावकाविति मेदिनी। शिशिरः स्याद्वयो भेदे तुषारशीतलेऽन्यवदिति विश्वः॥

अनु०—उस समय ललिता-सखी के वक्षस्थल पर विराजमान श्रीराधिका को सखीगण यमुना के शीतलजल से सिक्त-पद्म पत्रों द्वारा बार बार बीजन करने लगीं जिससे श्रीराधा का कण्ठ-प्रदेश निःश्वास वायु द्वारा मन्द मन्द कम्पित प्रतीत होने लगा, यह देख कर सब सखियाँ आनन्द कोलाहल करने लगीं ॥५॥

मुखोल्लास—दोहा

करत करत उपहार बहु, लाग्यौ कछुक विलम्ब।
निश्चय राधा कौ भयौ, तब जीवन अवलम्ब ॥५॥

मूल की भाषा पद्य—छप्पय

ललिता के उर परयौ अङ्ग राधा कौ ता छन।
शीतल नलिनी पत्र भये लहि जमना जल कन॥
तिन के व्यजन बनाय डुलायौ पवन सहेली।
बगद्यौ कंठहि श्वास मुदित लखि भईं नवेली॥
मिलि यूथ परस्पर सुन्दरी, मङ्गल सानी मुदित मन।
चैतन्य भई सखि राधिका, इहि विधि लगीं ध्वनि करन॥५॥

सारांश—सोरठा

कलित कलेवर बास, पायौ सुरभि समीर नें।
कंठ उह उहे श्वास, निरखि भईं प्रफुलित अली ॥५॥

००००

निश्चयाङ्के पङ्केरुहदलमिदङ्कस्य ललिता
ततो राधानीराहरणसरणौ न्यस्तचरणा।

स्खलन्तं कालिन्दीपुलिनभुवि खेलाञ्चितगतिं
ददर्शाग्रे कञ्चिन्मधुरविरुतं श्वेतगरुतम् ॥६॥

टीका—अथ हंसस्य दर्शनप्रसङ्गमाह निधायेत्यादि ततोऽनन्तरं ललिता पङ्केरुहदलविटङ्कस्य पद्मपत्रमयशय्यायाः अङ्के मध्ये राधां निधाय स्थापयित्वा नीराहरणशरणौ जलानयनमार्गे न्यस्तचरणा दत्तपदा सती अग्रे परितः कालिन्दीपुलिनभूवि यमुनातटभूमौ स्खलन्तं चरन्तं किञ्चित् श्वेतगरुतं राजहंसं ददर्श दृष्टवतीत्यन्वयः। कीदृशं खेलाञ्चितगतिं खेलया विभ्रमविशेषेण अञ्चिता पूजिता गतिर्यस्य तं। पुनः कीदृशं मधुरविरुतं मधुरशब्दकरं अनेन दूतयोग्यतोक्ता विटङ्कशब्दोऽत्र शय्यायां औचित्याद्बोध्यः। तथाचोक्तं अर्थात् प्रकरणाल्लिङ्गादौचित्याद्देशकालतः। शब्दार्थास्तु विभिद्यन्ते न रूपादेव केवलमिति ॥६॥

अनु०—उसके अनन्तर श्रीराधा को पद्म-पत्र-मयी कोमल- शैय्या पर विराजमान कराकर जल लाने के लिए-ज्योंही श्रीललिता ने जमुना की सीढ़ियों-पर पैर रक्खा त्योंही देखा कि, सामने यमुनातट पर से कोई-एक मधुर शब्द करने वाला शुभ्र-हंस विलास-गति से उसकी ओर आगमन कर रहा है ॥६॥

मुखोल्लास–दोहा

ललिता राधा की दशा, कहन कृष्ण ढिग जाय।
दूत खोजन कों चली, ता छन अवसर पाय ॥६॥

मूल की भाषा पद्य—छंद रोला

कमल दलन की शय्या रचि कें राधा तहाँ सुवाई।
धरें चरण जमना जल मग पुनि दूतहिं खोजन आई॥
ललिता यमुना पुलिन माहिं इक देख्यो हंस अगारी।
मधुर बोल क्रीड़ा युत ताकी मन्द चाल अति प्यारी ॥६॥

सारांश–सोरठा

कालिन्दी के कूल, ललिता लख्यौ मराल इक।
सबै भाँति अनुकूल, मन्द चलत बोलत मधुर ॥६॥

००००

तदालोकस्तोकोच्छ्वसितहृदया सादरमसौ
प्रणामं शंसन्ती लघु लघु समासाद्य सविधम्।
धृतोत्कण्ठा सद्यो हरिसदसि सन्देशहरणे
वरं दूतं मेने तमतिललितं हन्त ललिता ॥७॥

टीका–श्रीराधाया विरहावस्थां हरिचरणे विज्ञापयितुं मनसो ललिताया औत्सुक्यमतिशयेन विशेषावधारणरहितायाश्चेष्टितमाह तदेत्यादि। असौ ललिता तं हंसं वरं श्रेष्ठं दूतं मेने हन्त हर्षे अकस्मात् दूतप्राप्त्या हर्षः यद्वा विषादे हन्त शब्दः विषादस्तु कश्चिगत एव हा ईदृक् वैकल्यं तस्या यत्तत् कर्म्म योग्यमपि पक्षिणं दूतं मेने। सा कीदृशी तदालोकेन हंसस्य दर्शनेन स्तोकमीषत् उच्छ्वसितं आश्वस्तं हृदयं मनो यस्या अमुना अस्या ईदृग्वैधुर्य्यं निवेदिते कृष्ण आगमिष्यतीत्याश्वासः। किं-कुर्वती लघुलघु अतिशीघ्रं यथास्यात् यद्वा पलायनभिया मन्दं मन्दं यथा स्यात्तथा सविधं हंसस्य समीपं समासाद्य गत्वा प्रणामं शंसन्ती कथयन्ती। कीदृशी सद्यस्तत्क्षणं हरिसदसि सन्देशहरणे कृष्णसभायां वार्त्ताप्रापणार्थं धृतोत्कण्ठायुक्तत्वात् योग्यायोग्यविचारोऽपि न कृत इति भावः। तं कीदृशं अतिललितं अतिसुन्दरं लघुरगुरोगन्धे निःसारे वा-च्यवत् क्लीवं। शीघ्रं कृष्णागुरुण्यि च पुक्कलासौषधौ स्त्रीति मेदिनी। समीपे निकटासन्न सन्निकृष्टं सनीतिवत्। सदेशाभ्यास सविध-समर्य्याद-सवेशवदित्यमरः॥ ललितं हारभेदे स्यादीप्सितेऽपि चेतिविश्वः, लघु ल-घ्विति गुण सादृश्ये समासवच्चेति द्वित्वं। समासवत्ता च हन्त हर्षे विषादे च इत्यमरः॥७॥

अनु०—श्रीललिता ने उस मनोहर-पक्षी को देखकर कुछ प्रफुल्ल-चित्त से उत्कण्ठा सहित उसको सादर प्रणाम किया एवं धीरे-धीरे उसके निकट पहुँचकर अपने मन में उसी को मथुरा पुरी में श्री कृष्णचन्द्र की सभा में अपना सन्देश देकर भेजने के योग्य, दूत-कार्य-कुशल अपना सन्देश-वाहक, योग्य-पात्र समझा ॥७॥

मुखोल्लास–दोहा

प्राण गगन संशय तथा, बाधा राधा देह।
सबै कहैगौ कृष्ण सों, यह सुचि सरल सनेह ॥७॥

मूल की भाषा पद्य-छन्द मत्तगयन्द

देखत हर्ष भयौ ललिता अति मन्द चली सिर कंठ पै आई।
सादर ताहि प्रणाम कियौ मन जासु यहै इक चाह समाई॥
लै यह जाय तुरन्त सँदेश सभा हरि मांझ सुनावहि धाई।
आनँद ह्वैके बस सुन्दर हंसहि दूत कियौ यह रीति उपाई ॥७॥

सारांश–सोरठा

मान्यौं दूत मराल, ललिता चित्त प्रसन्न ह्वै।
यह सँदेश तत्काल, जाय कहैगो कृष्ण सों ॥७॥

○○○○

अमर्षात् प्रेमेर्ष्यां सपदि दधती कंसमथने
प्रवृत्ता हंसाय स्वमभिलषितं शंसितुमसौ।
न तस्या दोषोऽयं यदिह विहगं प्रार्थितवती
न कस्मिन् विश्रम्भं दिशति हरिभक्तिप्रणयिता ॥८॥

टीका—अमर्षादित्यादि असौ ललिता अमर्षात् कोपात् अमर्षमाश्रित्ये-ति ल्यबलोपे पञ्चमी हंसाय स्वयं स्वकीयमभिलषितं शंसितुं कथयितुं प्रवृत्ता प्रवर्त्तमाना अभूदिति यावत्। अमर्षहेतुगर्भविशेषण-माह सपदि तत्क्षणं कंसमथने श्रीकृष्णे प्रेमेर्ष्यां प्रणयकोपं दधति धारी-

प्रक्रम एव । अस्मान् त्यक्त्वा निर्दयोऽसौ तत्र पुरस्त्रीविलासविवशस्तिष्ठतीति स्मरणं कोपहेतुः । यद्वा उद्धववत् श्रीकृष्णप्रेरितं दूतं मत्वा प्रथमं प्रणयकोपः पश्चात्तस्य प्रार्थना सन्देश-वचनाभावादभिलसितदूतं सम्भावयति । ननु विशेषज्ञानहीनं पक्षिणं कथं दूतं कृतवतीत्याह इह दौत्यकरणे यद्विहङ्गं प्रार्थितवती तस्यार्थं सारासारविचाररहितत्वात् दोषो न । तत्र हेतुः हरिभक्तिप्रणयिता श्रीकृष्णचरणावधानातिहार्दता कस्मिन् जने विश्रम्भं विश्वासं न दिशति । हरिभक्तिरसिकस्य सर्व्वत्रेश्वरदृष्ट्या उच्चनीचभेदाभावात । यद्वा विश्रम्भं प्रणयं हरिभक्तस्य सर्व्वत्र प्रणयात् विश्रम्भः केलिकलहविश्वासे प्रणये चेति मेदिनी । हंसायेति श्लाघिप्रेत्य धात्वर्थ इति सम्प्रदाने चतुर्थी ॥८॥

अनु०—श्रीकृष्ण विरह में उनके निष्ठुर-व्यवहार जनित असहिष्णुता से तत्क्षण श्रीकृष्ण के प्रति ललिता का प्रेमज-द्वेष का भाव उदय हो उठा और वह हंस के प्रति अपनी अभिलाषा कहने को प्रवृत्त हुई । अपना सन्देश ले जाने को वह हंस से प्रार्थना करती है, यह उसका कोई अविवेक या दोष नहीं समझना चाहिये क्यों कि, श्रीकृष्ण-प्रेम की आधिपत्यता जगत में किसके प्रति विश्वास नहीं उत्पन्न करा देती अर्थात् सभी के प्रति विश्वास पैदा कर देती है ॥८॥

मुखोल्लास-दोहा

अन्तर प्रीति पुनीत हरि, प्रकट कठोर अलाप ।
ललिता कहत मराल सों, राधा कौ सन्ताप ॥८॥

मूल की भाषा पद्य—छन्द दोवै

तुरत क्रोध सों प्रेम ईरषा कृष्ण चन्द्र में धारी ।
करी हंस सौं विनय राधिका विरह निवारन हारी ॥
ललिता कौ नहिं दोष विहँग सों करी प्रार्थना यामें ।
राखत हैं विश्वास आपनौ हरि के भक्त न कामें ॥८॥

सारांश—सोरठा

ह्वै कर ललिता दीन, खग सों कीन्हीं प्रार्थना ।
प्रेम भक्ति रस लीन, जानत हैं हरि विश्व मय ॥८॥

००००

पवित्रेषु प्रायो विरचयसि तोयेषु वसतिं
प्रमोदं नालीके वहसि विशदात्मा स्वयमसि ।
अतोऽहं दुःखार्त्ता शरणमचला त्वां गतवती
न याञ्चा सत्पक्षे व्रजति हि कदाचिद्विफलताम् ॥९॥

टीका—प्रथमं तावत् प्रवर्त्तयितुं तं स्तौति पवित्रेष्वित्यादि । प्रायः पवित्रेषु तोयेषु वसतिं निवासं करोसि एतेन स्थानपवित्रात् संसर्गदोषाभाव उक्तः । अलीकेऽपि प्रमोदं हर्षं न वहसि न धारयसि एतेन परप्रेयः करणासक्तात् तच्च मित्रोक्ता अथच नालीके पद्मखण्डे प्रमोदं हर्षं वहसि एतेनापि आहारदोषः परिहृतः स्वयं स्वभावादेव विशदात्मा निर्म्मलान्तकरणोऽसि एतेन कौटिल्याभाव उक्तः शुभ्रशरीरः यस्मादेतादृशगुणविशिष्टोऽसि । अतः कारणात् अचला स्वहं त्वां शरणं गतवती अचलेत्यनेन स्वयं गमनाशक्तिरुक्ता कीदृशी दुःखार्त्ता एतेनात्मजनोपकारकरणेन पुण्यबाहुल्यं दर्शितं भविष्यतीति ध्वनितं । निवारणशङ्कामर्थान्तरन्यासेन वारयति हि यस्मात् सत् पक्षे सज्जनविषये याच्ञा प्रार्थना विफलतां व्यर्थत्वं कदाचिन्न व्रजति सफलैव भवतीत्यर्थः । अथ च सन्तो मनोहराः पक्षा यस्य स तस्मिन् त्वयीत्यर्थः । पवित्रं वर्षणे कुशे पवित्रं ताम्रपयसोः,शुद्धे चापि तदन्यवदिति विश्वः । अलीकं त्वप्रियेऽनृतेइत्यमरः । नालीकं शरशल्यावेजसव वज्रखण्डे नपुंसकमिति मेदिनी । पक्षेमासार्द्धके पार्श्वे ग्रहे साध्यविरोधयोः । केशादे परतो वृन्दे वने सखिसहाययोः । पतत्रे चुल्लिरन्ध्रे च देहांशे वात कुञ्जरे इतिविश्वः । शरणं गृहरक्षित्रो वध-धवक्षणयोरपीतिमेदिनी । विशदः पाण्डरे व्यक्ते

इति च, विशदस्तालव्य मध्य शद्लृशातने इत्यस्मात् रायमुकुटेन साधितत्वात् ॥६॥

अनु०—हे हंस ! तुम बहुधा पवित्र-जल में निवास करते हो एवं मृणाल का भोजन कर आनन्दानुभव करते हो अतः विशेष कर तुम स्वयं भी पवित्रात्मा हो। तुम्हारा शुभ्र शरीर देखकर अनुमान होता है कि, उसी के अनुरूप तुम्हारा चित्त भी शुद्ध होगा। इसी कारण से मैं-दुःख पीडित असहाय अबला तुम्हारी शरण-ग्रहण करती हूँ मैं जानती हूँ कि, साधु पुरुषों से की हुई कोई भी प्रार्थना विफल नहीं होती ॥६॥

मुखोल्लास–दोहा

कहत हंस सों मधुर स्वर, सविनय करुणा ऐन।
दूत बनन उत्साह हित, ललिता मीठे बैन ॥६॥

मूल की भाषा पद्य–छन्द गीतिका

हे हंस खग अवतंस तुम बहु शुद्ध जल में बसत हौ।
आनन्द मानत पद्म तें शुचि प्रकृति निर्मल लसत हौ ॥
मैं व्यथित अबला शरण आई ये सुलक्षण पाय के।
नहिं होत निष्फल याचना ध्रुव, सज्जनन पै जाय के ॥६॥

सारांश–सोरठा

शुक्ल वर्ण अभिराम, बाहर भीतर प्रकृति शुचि।
पूरै जन मन काम, भव्य मिलन, कोविद कहत ॥६॥

००००

चिरं विस्मृत्यास्मान् विरहदहनज्वालबिकला:
कलावान् सानन्दं बसति मथुरायां मधुरिपुः।
तदेतं सन्देशं स्वमनसि समाधाय निखिलं
भवान् क्षिप्रं तस्य श्रवणपदवीं सङ्गमयतु ॥१०॥

टीका—प्रस्तुतं शापबलि चिरमिति । मधुरिपुः श्रीकृष्णः अस्मान् विस्मृत्य मथुरायां सानन्दं यथाभवति चिरं चिरकालं व्याप्य वसति अस्मान् कीदृशी विरहदहनज्वालविकलाः विरह एव दहनोऽग्निः तस्य ज्वालैः शिखाभिः बिकलाः विधुराः अनेन निरन्तर-स्मरजर्जरितानां धाष्ट्र्यं न दोषावहमितिसूचितम् । ननु सततााह्वितपरस्वणपरस्य विलम्बे कोऽयमुद्वेग इत्यत आह-सानन्दमिति ननु दुर्व्वाररिपुनाशोऽप्यानन्दावह एव तथा नेत्याह कलावानत्र नडायुक्तः अथच कलाश्चतुषष्टिस्तद्युक्तम् । अतएव तथाविध वैदग्धी-विपुणनायकस्य विरहोऽतिदुःसह इतिभावः । तत्र किं विधेयमित्याह ततस्मात् वक्ष्यमाण-सन्देशं वाचिकं निखिलं समग्रं स्वमनसि समारोप्याधाय भवान् तस्य श्रवणपदवीं क्षिप्रं सङ्गमयतु प्रापयतु इति प्रार्थना । वह्नेर्द्वयोर्ज्वालकीलावर्च्चिहेति शिखा स्त्रिया-मित्यमरः । कला स्यान्मूलके वृद्धौ शिल्पादावंशमात्रके । षोडशांशे च चन्द्रस्य कला नाकालमानयोरितिविश्वः ॥१०॥

अनु०—वह कलावान्-कपटी कृष्ण विरह-ताप-संतप्त हम सबको विस्मरण कर बहुत दिन से मथुरा में निवास करते हैं । तुम हमारे सकल-सन्देश को अपने हृदय में धारण करके अर्थात् हम जो जो कहती हैं उसे मनसें रख के शीघ्र ही श्रीकृष्ण के कर्णगोचर करो तात्पर्य यही है कि,पहले हमारी-विरह-वार्ता शीघ्र पहोंचाओ ताकि श्रीकृष्ण के साथ हमारा मिलन होवै ॥१०॥

मुखोल्लास–दोहा

हंस जाउ तुम मधुपुरी, जहां विराजत कृष्ण ।
सरस दरस हित गोपिका, राधा सहित स तृष्ण ॥१०॥

मूल की भाषा पद्य-छन्द गीतिका

चिर काल तें व्याकुल भयीं बहु विरह ज्वाला तें जरी ।
करि त्याग हम कों हंस ! सुख सों बसत मधु रिपु मधुपुरी॥

सन्देश सब निज चित्त धरि कैं वेगि मथुरा जाइये।
बर कलाधारी ब्रज बिहारी कों तुरन्त सुनाइये ॥१०॥

सारांस—सोरठा

हम सों नेह बढ़ाय, आप बसे हरि मधुपुरी।
कहौ हंस यह जाय, विरह ज्वाल गोपी जरत ॥१०॥

◇◇◇◇

निरस्तप्रत्यूहं भवतु भवतो वर्त्मनि शिवं
समुत्तिष्ठ क्षिप्रं मनसि मुदमाधाय सदयम्।
अधस्ताद्धावन्तो लघु लघु समुत्ताननयनै
र्भवन्तं वीक्षन्तां कुतुकतरलाः गोपशिशवः ॥११॥

टीका—आशिषा सम्बर्द्धयन्ती तं प्रोत्साहयति निरस्तेति। भवतो वर्त्मनि पथि निरस्तः प्रतिक्षिप्तः प्रत्यूहः विघ्नो यत्र तद्यथा भवति तथा शिवं कल्याणं भवतु आशिषिलोट् मुदं हर्षं आधाय अर्पयित्वा सदयं यथाभवति समुत्तिष्ठ उर्द्धघटनं कुरु अतो नात्रात्मनेपदं प्रेरणे लोट् प्रभुत्व-निराकरणाय सदयमिति अस्मासु दयां कृत्वा एवं कुरु नतु प्रभुत्वं करोसीत्यर्थं। परोपकारात् हर्षः। यद्वा अतिदुर्लभमधुपुरीगमन-श्रीकृष्णदर्शनाभ्यां हर्षः। यद्वा कौतुकहेतुमाह लघु लघु अतिशीघ्रं यथास्यात्तथा अधस्ताद्धावन्तो गोपशिशवः समुत्ताननयनैः उर्द्धक्षिप्तनेत्रै र्भवन्तं वीक्षन्तां पश्यन्तु आशंसा कीदृशाः कुतुकेन कुतूहलेन चञ्चलाः भवन्त उपरि निरीक्ष्य अह-महमिकया धावतो बालान् दृष्ट्वा तवापि हर्षं स्यादितिभावः। तरलं चञ्चले शिडगे भास्वरेऽपि त्रिलिङ्गकं। हार-मध्यमानापुंसि यवागू सुरयां स्त्रियामिति मेदिनी। कौतूहलं कुतुकञ्च कुतूहलमित्यमरः ॥११॥

अनु०—हे हंस! तुम्हारा गमन-मार्ग विघ्न रहित एवं मंगलमय हो। तुम कृपा करके सानन्द चित्त से शीघ्र यात्रा करो। ऊँचा उड़ता

आ तुमको सकल व्रज-वासी गोप-बालक गण कौतूहल पूर्ण हृदय से अपनी ऊँची दृष्टि करके देखें ॥११॥

मुखोल्लास–दोहा

रुचि उपजावन हंस की, ललिता यात्रा माहिँ ।
कहत सुगमता मार्ग की, अरु कौतुक दरसाहिँ ॥११॥

मूल की भाषा पद्य–छन्द गीतिका

निर्विघ्न मंगल होहु तुम जिहि भाँति जा मारग चलौ ।
निज हृदय दया विचारि सत्वर उठहु आनँद में रलौ ॥
नीचे तुम्हारे गोप बालक खेल में चञ्चल घने ।
करि कछुक ऊँचे नयन देखहिँ भजहिँ परम सुहावने ॥११॥

सारांश–सोरठा

होहि तुमहिँ निर्दोष, मङ्गल कारी मार्ग यह ।
ग्वाल बाल परितोष, लहैं तुम्हारे दरस सों ॥११॥

◇◇◇◇

स वैदग्धीसिन्धुः कठिनमतिना दानपतिना
यया निन्ये तूर्णं पशुपयुवतीजीवन-पतिः ।
तया गन्तव्या ते निखिलजगदेकप्रथितया
पदव्या भव्यानां तिलक किल दाशार्हनगरी ॥१२॥

टीका—पन्थानमुपदिशति स इति दानपतिना अक्रूरेण यया पदव्या स श्रीकृष्णस्तूर्णं निन्ये भव्यानां तिलक उत्तमाशयानां श्रेष्ठतया दाशार्हनगरी दाशार्हवंशोद्भवानां नगरी मथुरा ते गन्तव्या कर्तृ : कृत्यैश्चेति कर्तरि षष्ठी यद्वा ते तया इत्यर्थाव्ययस्ते शब्दः किल निश्चये । कदाचित्स्मान् संस्मृत्य श्रीकृष्णो यया याति तदज्ञातायां तस्य पदव्यां तद्दर्शनं यादिति तद्दर्शनि गमनेऽभिप्रायः यद्वा अस्मद्वारणभियालिङ्गजुना तेन कर्मणा श्रीकृष्णमाद्रागाङ्क्रेण तूर्णं गतम्, अतो भवताऽपि तया झटिति

गन्तव्यमितिभावः। ननु मया उपदेशकं विना कथं ज्ञातव्यमिति चेत्तत्राह निखिलजगदेकप्रथितया इति समग्रजगति एका मुख्या प्रथिता ख्याता तया एतेन जगद्विख्यातत्वान्न तत्रोपदेश-कालापेक्षा इति भावः। स कीदृक् वैदग्धी विदग्धता मित्रादेर्वाछियामिति न श्रियां युक् तस्याः सिन्धुरिव धिन्दुः अपरिमितविदग्धीयुक्तत्वात्। कीदृशेन अक्रूरेण कठिनमतिना अति-निर्दयचित्तेन अत्र हेतुः स कीदृक् पशुपयुवतिजीवनगतिरिति पशुपयुव-तीनां गोपस्त्रीणां जीवनस्य पालकः तेन विना जीवनस्यानवस्थानात् यः किल जीवनस्य पालकं हरति स कठिनमतिरेव तत्रापि सकलजन-करुणाविषयाणां स्त्रीणां जीवनपति-हारकोऽति कठिनः सुतरामेव तथा-चोक्तं तृतीये व्याधस्याप्यनुकम्प्यानां स्त्रीणामित्यादि। अथ च अदान-पतिना इत्यकारप्रश्लेषः अविद्यमानं दानं धनादिवितरणं येषां तेऽदाना अतिकृपणाः तेषां पतिः श्रेष्ठस्तेन यः खलु परजीवनमपि न त्यजति स कृपणश्रेष्ठ एव यद्वा दानं खण्डनं तस्य पतिः तदधिकारी तेन दोऽवखण्ड-ने धातुः श्रीकृष्णनयनेनास्माकं जीवनमवखण्डितवानित्यर्थः। तिलकं चित्रके प्राहुर्नामे तिलकालके, वेणुस्तु द्रुमभेदेषु वक्षोम्नि गोरोचना-पि चेतिविश्वः। नानार्थं रत्नं अध्वलः श्रेष्ठेऽपि तिलकशब्दः तिलको मानचित्रे स्यात् प्रमाणे तिलको मतः इत्यनेकार्थध्वनिमञ्जरी ॥१२॥

अनु०—श्रीललिता अब मार्ग निर्देश करती हैं—हे साधु-श्रेष्ठ हंस! निष्ठुर-हृदय अक्रूर जिस मार्ग से होकर किशोर-मुकुट-मणि, गोपी गण-जीवन-रक्षक श्रीकृष्णचन्द्र को लेकर गया है तुम सकल-लोक-विख्यात उसी मार्ग से यदु रजधानी मथुरा में गमन करो॥१२

सुखोल्लास—दोहा

यदि यह आशङ्का करौ, कौन मार्ग ह्वै जाउँ।
हंस बताऊं तुमहिं मैं, सरल बिमल सो ठाउँ ॥१२॥

मूल की भाषा पद्य-छन्द गीतिका

अति कठिन मति अक्रूर के सँग गोपिका जीवन धनी।

जा पंथ गवने तुरत वे श्री कृष्ण कुँवर शिखामनी ॥
हे मंगलीकन में तिलक वह भूमि जगत उजागरी।
तुम जायवे के योग्य हौ ता माहिं है मथुरा पुरी ॥१२॥

सारांश—सोरठा

लोक प्रसिद्ध प्रधान, कृष्ण गये जा मार्ग है।
मथुरा कौं प्रस्थान, करहु हंस ता पथ सपदि ॥१२॥

००००

गलद्वाष्पासारप्लुतधवलगण्डा मृगदृशो
विदूयन्ते यत्र प्रबलमदनावेशविवशाः।
त्वया विज्ञातव्या हरिचरणसङ्गप्रणयिनो
ध्रुवं सा चक्राङ्गीरतिरसिक शताङ्गस्य पदवी ॥१३॥

टीका—तस्याः सूचकक्रममाह गलदिति। हे चक्राङ्गीरतिरसिक हंसीरतिसहाय अनेन विरहदहनवहनवेदनाभिज्ञया झटिति तत् कर्म्मणि प्रसक्तिः सूचिता हरिचरणसङ्गप्रणयिनः शताङ्गस्य रथस्य सा प्रसिद्धा पदवी पन्था त्वया ध्रुवं निश्चितं विशेषेण ज्ञातव्यमित्यन्वयः। हरिचरणयोः सङ्गे संसर्गे यः प्रणयः प्रेमाशयः यस्यास्ति तस्य। तत्र गमकमाह य एतादृश्या मृगदृशो विदूयन्ते उपतपन्ति दुदु उपतापे दिवादिः इदानीं क्षणादुपरि समागमिष्यति कृष्ण इति कृत्वा पथि तदवलोकनार्थं ता सततमेव वर्त्तन्ते तस्यादर्शनात्तापश्चेति भावः। कीदृश्या गलन्तः अवस्तोबाष्पसारा अश्रुबिन्दवस्तैः प्लुतौ व्याप्तौ अतएव धवलौ गण्डौ यासां ताः, पुनः कीदृश्यः प्रबलोऽत्युत्कटो यो मदनावेशः प्रकाशस्तेन विवशाः आतुराः। शताङ्गः स्यन्दनो रथ इत्यमरः ॥१३॥

अनु०—जिस मार्ग में नयन-जलधाराओं से धवल-कपोल वाली गोप-सुन्दरियाँ प्रबल-प्रेमावेश में व्याकुल होकर उन्मादिनि (पगली) की तरह विलाप कर रही हैं तथा जिस मार्ग में कृष्ण-

चरण-स्पर्शानुरागी उनके रथ-चक्र के चिन्ह विद्यमान हैं, उसी मार्ग से अक्रूर श्रीकृष्ण को मथुरा ले गये हैं, तुम भी उसी मार्ग गमन करना ॥१३॥

मुखोल्लास-दोहा

अति करुणा चित धारि के, लखौ मार्ग वह हंस ।
अब विलम्ब नहिँ कीजिये, सुनिये खग अवतंस ॥१३॥

मूल की भाषा पद्य-छन्द गीतिका

हरि चरण सँग तेँ प्रीति जा की पंथ वा रथ को जहाँ ।
वश भईं प्रबल अनङ्ग के मृग लोचनी ठाढ़ी तहाँ ॥
दुख पाय श्वेत कपोल जिन के भये आँसुन पाँति सों ।
वह मार्ग हंसी रमण निश्चय जानियों या भाँति सों ॥१३

सारांश-सोरठा

मारग माहिं मराल, लोचन वारि बहावती ।
ठाड़ी होंगी बाल, काम वती मृग लोचनी ॥१३॥

००००

पिबन् जम्बुश्यामं मिहिरदुहितुर्वारि मधुरं
मृणाली भुञ्जानो हिमकरकलाकोमलरुचः ।
क्षणं हृष्टस्तिष्ठन्निबिडविटपे शाखिनि सखे
सुखेन प्रस्थानं रचयतु भवान् वृष्णिनगरे ॥१४॥

टीका—ननु पथि आहार-विश्रामस्नानाभावात् कथं गन्तव्यमिति चेत्तत्र तत् प्राचुर्यं कथयति पिबन्नित्यादि एवमेवं कुर्वन् हे सखे इति प्रेमसम्बोधनं प्रार्थनासिद्धये नहि सख्युः प्रार्थना-निरास्या इति भावः भवान् वृष्णिनगरे मथुरायां सुखेन प्रस्थानं गमनं रचयतु करोतु इत्यन्वयः । किं कुर्वन् मिहिरदुहितुः सूर्यकन्याया अनेन पवित्रत्वमुक्तं वा

पिबन् कीदृक् जम्बुश्यामं पक्वजम्बुवत् श्यामं अनेन निर्मलतोक्ता पुनः कीदृक् मधुरं अनेनोपादेयत्वमुक्तं पुनः किं कुर्व्वन् मृणाली भुञ्जानः खादन् बहुत्वअनेनाति-सुलभतोक्ता मृणालीति अल्पत्व विवक्षायामीप्रत्ययः कीदृशः हिमकरस्य चन्द्रस्य कलावत् कोमला मनोज्ञा रुचिः कान्तिर्यासां अनेन अतिकोमलतोक्ताः पुनः किं कुर्व्वन् शाखिनि वृक्षे हृष्टः सन् क्षणं तिष्ठन् कीदृशे निबिडविटपे घनशाखाचये अनेनाधिकरणसञ्चरणाभावात् शीतलतया वासयोग्यतोक्ता अत एतादृक् वृक्षदर्शनेन हृष्टता च चिर-कालवासनिषेधाय क्षणमित्युक्तं एतेन पान-भोजनाश्रयलाभादतिसु-खदः पन्थाः अतस्तेनैव भवता सुखेन गन्तव्यमित्यनायासेनोपकरणं सूचितम् मिहिराकणपूषण इत्यमरः । मधुरस्तु रसे विषे मधुरं रसवत् स्वादुः, प्रियेषु मधुरोऽन्यवदितिविश्वः । विटपः पल्लवे शिङ्गे विस्तरे स्तम्बशाखयोरिति विश्वः ॥१४॥

अनु०-हे सखे ! तुम यमुना के जामन की भाँति श्याम-सलिल का पान करते हुए तथा चन्द्र-किरण-समान कोमल कान्ति वाले कमल नालों का आस्वादन करते हुए एक क्षण आनन्दित हो सघन, श्या-मल शाखा वाले वृक्ष पर विश्राम-सुख का अनुभव कर सानन्द मथुरापुरी को गमन करना ॥१४॥

मुखोल्लास-दोहा

खान पान मो कौं कहा, मिलै पंथ के माहिं ।
हंस सकल तुम सों कहौं, या कौ संशय नाहिं ॥१४॥

मूल की भाषा पद्य-छन्द गीतिका

जल पियत जमुना कौ मधुर द्युति श्याम जामन की भली ।
रुचि करत भोजन शशि-कला सम श्वेत कंजन की नली ॥
क्षण इक करत विश्राम शाखा सघन विटपन की जहाँ ।
सुख सहित गमनौ हे सखे वह यादवन कौ पुर तहाँ ॥१४॥

सारांस-सोरठा

कालिन्दी जल पान, कमल नाल भोजन करन।
बिरमत विटप सुथान, हंस जाउ मथुरा पुरी ॥१४॥

००००

बलादाक्रन्दन्ती रथ-पथिकमक्रूर-मिलितं
विदूरादाभीरीततिरनुययौ येन रमणम् ।
तमादौ पन्थानं रचय चरितार्था भवतु ते
विराजन्ती सर्वोपरि परमहंस-स्थितिरियम् ॥१५॥

टीका—प्रथमं गन्तव्यं वर्त्मोपदिशति । तं पन्थानं आदौ प्रस्थानोपक्रमे रचय गच्छेरित्यन्वयः । धातूनां बह्वर्थत्वात् । यद्वा तं पन्थानं प्रति आदौ रचय यत्नं कुरु प्रथमं तमेव पन्थानमारुहेत्यर्थः । हे परमपूज्य यद्वा परा उत्कृष्टा मा शोभा यस्य अतिसुन्दरेत्यर्थः । हे हंस तव इयं स्थितिः सर्व्वोपरि सर्व्वेषामूर्ध्वं विराजन्ती दीप्यमाना सती चरितार्था-भवतु प्रोत्साहजननं हंसः सूर्य्यः स तु सर्व्वोपरिविरजितत्वमपि हंस अतः सर्व्वोपरिविराजमानत्वात् सूर्य्यता तवास्तु इत्यर्थः अथ च परमहंसः परिमानो सर्व्वेषां सरसि सहस्रदलकमले तिष्ठति अतश्चतुर्विंशतितत्वा-नामुपरि वर्त्तते तवाप्यवस्थितिः तथा भवतु सर्व्वोपरि उड्डीयमानत्वात् कोऽसौ पन्था इत्यत आह येन पथा आभीरीततिर्गोपवनितासमूहः बला-द्वार्य्यमाणा अपि विदूरमतिदूरं रमणं श्रीकृष्णं अनु पश्चात् ययौ कीदृशी आक्रन्दन्ती श्रीकृष्णेत्यादि उत्क्रोशन्ती यद्वा रुदती तथा श्रीदशमे-विसृ-ज्य लज्जां रुरुदुः स्म सुस्वरं गोविन्द दामोदर माधवेति (१०-३९-३?) कीदृशं रथपथिकं रथेन पान्थं अनेन वलनिवारणाभावो झटितियानञ्चोक्त पुनः कीदृशं अक्रूरमिलितं अक्रूरेण सह वसन्तं अनेन तदानीं स्वकीया-भिप्रायनिवेदनाभावोऽप्युक्तः अथच नास्ति क्रूरो यस्मात् सोऽक्रूर इत्यर्थः । तेन सह मिलिते जनेऽभिप्रायमपार्थकं वेति चार्थः । हंसो विहङ्गभेदे स्यात्

सूक्ष्मे विष्णौ इत्यन्तरे, योगि-मन्त्रादिभेदेषु परमात्मनि मत्सरे,निर्लोभन-पतौ हंसः शरीरमरुदन्तरे इति विश्वः । स्थितिः स्थितामवस्थाने मर्य्यादायां च सीमनि ॥१५॥

अनु०—हे हंस ! अक्रूर के साथ हमारे प्राण-वल्लभ के गमन करने पर जिस मार्ग में बहुत दूर तक उच्च स्वर से क्रन्दन करती हुई गोप-सुन्दरिओं ने उनका अनुगमन किया था, प्रथम तुम उसी मार्ग से गमन करना इसी से तुम्हारा हंस रूप में श्रेष्ठ-जन्म सफल होगा ॥१५॥

मुखोल्लास-दोहा

चिन्ह चमत्कारीन सों, हंसहि करत प्रबोध ।
ललिता निज सन्देश हित, कहत पन्थ को शोध ॥१५॥

(श्री कृष्ण पक्ष में)

मूल की भाषा पद्य—छन्द गीतिका

अक्रूर सँग रथ पर चढ़े श्री कृष्ण जो मारग ठयौ ।
बहु दूर गोपी गन रुदन बल तें करत पीछे गयौ ॥
सो पन्थ पहलें रचहु रचहु तातें होय कृत कारज गती ।
जो लसति सर्वोपरि तुम्हारी यह सुभग हंसस्थिती ॥१५॥

सारांश—सोरठा

जा पथ गये मुरारि, रथ पर सँग अक्रूर के ।
सोई निज उर धारि, हंस वही मारग गहौ ॥१५॥

(आत्मज्ञान पक्ष में)

मूल की भाषा पद्य-कवित्त

अहो हंस रूप जीव क्रोध सों रहित गुरु
तासों मिलि देह रूपी रथ पै चढ़े भये ।
आतम स्वरूप ज्ञान बल सों विचार किये
शान्त चित्त योगी जन जाही मग ह्वै गये ॥

पहले सो पन्थ रचौ तुम निज मुक्ति हेतु
जहाँ वीतरागन के सुयश रहे छये।
सर्वोपरि राजमान चरित तुम्हारे होंहि
परम हंस स्थिति सुहावै जग वन्द्य ये ॥१५॥

◇◇◇◇

अकस्मादस्माकं हरिरपहरन्नंशुकचयं
यमारूढो गूढप्रणयलहरीं कन्दलयितुम् ।
भवानग्रे तस्मिन्नवदलकदम्बेन निविड़े
कदम्बे कादम्बेश्वर पथि विलम्बं रचयतु ॥१६॥

टीका—पथि पथि रमणीय-हरिविहारस्थाने कदाचिद्विलम्बमाचरन्नस्माकं कार्ये कालक्षेपो भवतीति तत् प्रार्थयति । अकस्मादिति । हरिः श्रीकृष्णः अकस्मात् अतर्कित एव अस्माकमंशुकभरं वस्त्रसमूहं अपहरन् सन् यं आरूढः, हे कादम्बेश्वर हंसराज पथि तस्मिन् कदम्बे विलम्बं न रचयतु न करिष्यतीत्यर्थः । प्रार्थनायां अंशुकाहरण-रोहणयोः समकालिता द्योतनाय णिजन्तप्रयोगः । तेन च भयसम्भ्रान्ततयाऽशीघ्रं गम्यते नन्वसावीश्वरः कथं युष्मदंशुकहरणं गर्हितं कृतवान् इत्यत आह-गूढप्रणयलहरीं मनोविहितत्वाद्गूढत्वं अतिगुप्तप्रेमोर्मिं कन्दलयितुं प्रेमप्रकाशार्थं अपहरन्नित्यर्थः । तस्मिन् कीदृशे नवदलकदम्बे नूतनपत्रसमूहयुक्तेन नवं अनु कदम्बं यस्य अनेनातिमनोहरत्वं अतएव-निविड़े निरन्तर-शाखाप्रतानादिके अग्रे पुरतः एतेन नवपल्लवशाली-वृक्षस्याग्रतो दर्शनेन शुभकुशलतोक्ता । तथा चोक्तं "वामे मधुरवाक् पक्षी वृक्षाः पल्लविनोऽग्रतः, यातुर्दक्षिणभागस्थं धेनुवैन्द्रं सुभावहमिति । अत्र क्वचित् पुस्तके तव श्रान्तस्यान्तः स्थगितरविलम्ब-किशलयैः । कदम्बे कादम्बः त्वरितमवलम्बः स भविता इति उत्तरार्द्धं श्लोको दृश्यते । हे कादम्बः राजहंस स-कदम्ब-श्रान्तस्य तव त्वरितं शीघ्रं अवलम्बो अवलम्बनीयो

भविता भविष्यति इत्यन्वयः। स कीदृक् किशलयैर्नवपल्लवै रन्तर्मध्य-स्थगित आच्छादितो निवारितो विलम्बो येन य एव अनेन तापाभावः हरिरित्युपचितपदोपन्यासः हरणाशक्तत्वात् चेलं वसनमंशुकमित्यमरः। प्रणयः प्रेम्णि विश्रम्भ इति च। कन्दलं त्रिषु कपालेऽप्युपरागे नवाङ्कुरे इति मेदिनी कन्दलशब्दान्नाम निविडं हरम्। कदम्बमाहुः सिद्धार्थे नीपे च निकुरम्बके। कादम्बः कलहंसे स्यादिति विश्वः। विलम्बस्तु प्रतिबिम्बे स्यान्माने पुं नपुंसकमिति मेदिनी ॥१६॥

अनु०-हे कलहंस ! अकस्मात् हमारे वस्त्रों को अपहरण कर श्रीकृष्ण-चन्द्र कात्यायनी-व्रत-परायणा गोपीगण के निगूढ़-प्रेम को बाहर प्रगट करते हुए (अर्थात् श्रीकृष्ण से प्रेम करने में उनकी लोक-लज्जा का परित्याग कर) जिस कदम्ब-वृक्ष पर चढ़ गये थे और जिस कदम्ब के मध्य-भाग में सूर्य किरणें भी प्रवेश नहीं कर पाती है उस सघन कदम्ब-वृक्ष पर कुछ विश्राम कर तुम अपने मार्ग श्रम को दूर करना ॥१६॥

भाग्रूप-दोहा

ललिता मथुरा जान हित, निज सन्देश सुनाय।
कहत हंस सों, और हू, शोध सुनो चित लाय ॥१६॥

मूल की भाषा-पद्य (छन्द गीतिका)

हम सबन के हित गुप्त को विधि प्रकट करि वे की करी।
यहु वसन हरि कें चढ़े जाय कदम्ब पै पौचक हरी ॥
हे हंस ! जिन किसलय सघन में बिम्ब दिनमणि को दुरै।
सो तरु तुम्हारो ह्वै सहारो सपदि पथ को श्रम हरै ॥१६॥

सारांश-सोरठा

हरे चीर ब्रज राज, लै कर धरे कदम्ब पै।
सोई तरु वर आज हरै तुम्हारो पन्थ श्रम ॥१६॥

००००

किरन्ती लावण्यं दिशि दिशि शिखण्डस्तबकिनो
दधाना साधीयः कनकविमलद्योतिवसनम् ।
तमालश्यामाङ्गी सरलमुरलीचुम्बितमुखी
जगौ चित्रं यत्र प्रकटपरमानन्दलहरी ॥१७॥
तथा भूयः क्रीडारभसविलसद्बल्लवबधू
वपुर्वल्लीभ्रश्यन्मृगमदकणश्यामलिकया ।
विधातव्यो हल्लीशकदलितमल्लीलतिकया
समंतादुल्लासस्तव मनसि रासस्थलिकया ॥१८॥युग्मकम्

टीका—ततो ऽग्रे ऽति-रमणीया रासस्थली तिष्ठति तद्दर्शनार्थमपि झटिति त्वया गन्तव्यमित्यत आह किरन्तीति द्वयेन भूयः पुनरपि तथा रासस्थलिकया रासविहारस्थानेन तव मनसि समन्तात् सर्व्वतः उल्लासो-विधातव्यः समन्तादित्यनेन सर्व्वत्र निरतिशयरमणीयतोक्ता कदम्बेनो-ल्लासः कृत एव पुनरपि रासस्थलिकयेति पुनरर्थः भूयः पदोपादानं कीदृश्या क्रीडारभसेन क्रीडायां हर्षेण विलसन्त्यो या गोपवध्वः तासां वपुर्वल्लीभ्यः अङ्गलताभ्यः भ्रश्यन्तो ये मृगमदकणास्तैः श्यामलिकया श्यामवर्णया अनेन कस्तूरीकणानां बाहुल्यं क्रीडायामतिशयाभिनिवेशः सूचितः । श्यामलिकयेति मत्वार्थः इकस्तुतः स्त्रीत्वादौ टाप् पुनः कीदृश्या हल्लीसकेन स्त्रीणां मण्डलाकारनर्त्तनेन दलिता निष्पिष्टा मल्लीलता यस्यां बहुव्रीहौ कः । रभसो वेगहर्षयोरित्यमरः । कणोऽति सूक्ष्म धान्यांशे इति मेदिनी । नारीणां मण्डलाकारनृत्यं हल्लीसकं विदुः, नटीगृहीत-कण्ठीनामन्योन्यात्तकरश्रियाम् । नर्त्तकीनां भवेद्रासो मण्डलीभूयनर्त्तनमिति रासलक्षणं तस्य स्थली,किरन्तीत्यादि यत्र रासस्थलिकायां प्रकट-परमानन्द-लहरी प्रकटा मूर्त्तिमत्तया आविर्भूता या परमानन्दस्य लहरी महोर्म्मिः, चित्रं आश्चर्यं जगौ गीतवती चित्रं अनन्यसाधारणतया

अद्भुतं अथच परमानन्दलहर्य्या गानं चित्रमाश्चर्य्यमेव । कीदृशी दिशि दिशि लावण्यं किरन्ती विक्षिपन्ती पुनः कीदृशी शिखण्डीनां स्तबको गुच्छः तद्युक्ताः पुनः कीदृशी साधीयोऽत्युत्तमं यत् कनकं तद्वि-मलद्योतनशीलं अर्थात् पीतं वसनं दधाना धारयन्ती । तमालोऽतिश्या-मवृक्षविशेषः तद्वत् श्याममङ्गं यस्या उद्दाम महतीति यावत् या मुरली-तया चुम्बितं मुखं यस्याः । सरलः पूतिः काष्ठेनाथोदारावक्रयोः त्रिया-मितिमेदिनी ॥१७-१८॥

अनु०—उसी कदम्ब—वृक्ष पर विराजमान होकर चारों दिशाओं में अपनी लावण्य—रूपराशि विकीर्ण करते हुए मयूर—पिच्छ विभूषित, पीताम्बरधारी, तमाल—श्यामल—शरीर साक्षात् परमानन्दस्वरूप श्रीकृष्णचन्द्र ने अधरों पर मुरली धारण कर अलौकिक गान किया था ॥१७॥

अनु०—श्री रासक्रीडा में अत्यन्त आनन्द मग्न व्रज सुन्दरीगण के श्री अङ्ग से बार २ मृगमद विन्दु कण गिरने से जो श्यामल—स्वरूप हो गई है तथा 'हल्लीस-नृत्य' में (जिस नृत्य में अनेक नर्तकी मंडल विचरण करे तथा एक मात्र नट नृत्य करे उसे हल्लीस-नृत्य कहते हैं) जिस जगह की मल्लिका—लता पद—दलित होगई है उस रास-स्थली का दर्शन करने से तुम्हारे मन में परम आनन्द उत्पन्न होगा ॥१८॥

हंस जाउ वा मार्ग में, वह कदम्ब जा माहिँ ।
जाकी सर वर करन कों, तरु वर दूजौ नाहिँ ॥१७॥

मूल की भाषा पद्य-छन्द गीतिका

जहँ परम आनँद की छटा भइ प्रकट श्री व्रज चन्द की ।
करि गान अद्भुत दिशन छाई छवि प्रकाश अमन्द की ॥
बह मोर के पंखन धरें पटपीत रुचि शुचि कनक सी ।
सुठि श्याम अङ्ग तमाल जाके सरल मुरली मुख बसी ॥१७॥

सारांश—सोरठा

जहाँ प्रकट ब्रजचन्द, करी छटा आनन्द की।
जासु दुकूल अमन्द, हरी कान्ति कलधौत की ॥१७॥
जहँ अतिरिक्त कदम्ब के, चिन्ह मोद प्रद और।
तिन कों हू अवलोकियो, भयो रास जा ठौर ॥१८॥

मूल की भाषा पद्य—छन्द गीतिका

अति हर्ष पुनि पुनि केलि कौ जिन गोप ललना छवि मयी।
तिन अङ्ग तें मृगमद गिरयौ तहँ भूमि सो कारि भयी॥
उन नृत्य हल्लीशक करत मल्लीलता पायन दली।
मन होय परमानँद तुम्हारे निरखि सो रासस्थली ॥१८॥

सारांश—सोरठा

मृगमद भूमि लखात, गिरयौ अङ्गना अङ्ग तें।
चतुर चित्त हरषात, निरखि यहै रासस्थली ॥१८॥

००००

तदन्ते वासन्ती विरचितमनङ्गोत्सवकला
चतुःशालं शौरेः स्फुरति न दृशौ तत्र विकिरेः।
तदालोकोद्भेदि-प्रमदभरविस्मारितगति-
क्रिये जाते तावत् त्वयि वत हता गोपवनिता ॥१९॥

टीका—ततोऽपि रम्यमतिनिर्ज्जनं रहस्यस्थानं निर्दिशति तदन्त इति तदन्ते तस्या रासस्थलिकायाः समीपे शौरेः श्रीकृष्णस्य अनङ्गोत्सवकला: चतुः शालं शालाचतुष्टयं स्फुरति तत्र त्वं दृशौ चक्षुः न विकिरेः न निक्षेपेः तन्न द्रक्ष्यसीत्यर्थः। अनङ्गोत्सवकला कामक्रीडा तत् प्रमोदजनकं चतुः शालेन सह चतुर्थीसमासः। चतसृणां शालानां समाहारः तत् कीदृशं वासन्ती माधवीलता तया विरचितं निर्म्मितं लता-मण्डलचतुष्टय-मित्यर्थः। ननु एतादृङ्मनोरमसति-पुण्यञ्च तत् हरिस्थानं किमिति न

द्रष्टव्यमित्यत आह तदेत्यादि तस्य चतुःशालस्यालोकेन दर्शनेन उद्भेदी प्रकाशशीलो यः प्रमदभरः हर्षनिवहः तेन विस्मारित-गतिक्रिया गमनं यस्य त्वयि तथाविधे सति बत खेदे गोपवनिता हता इत्यहं जाने तदालोकनजन्यानुपमानन्दने त्वयि मथुरा-गमन-स्मरणरहिते सति प्रवृत्तिहरणाभावाद्विरहजर्जरिता गोपस्त्रियः मरिष्यन्तीत्यर्थः । अतो न द्रष्टव्यं एतेन विलम्बे स्त्रीवधपातकं स्यादेवेति ध्वनितम् । अन्तः प्रान्तेऽन्तिके नाशे स्वरूपेऽति-मनोहरे इति विश्वः । सन्ता-मन्त्रण सन्तोषः खेदानुज्ञान-विस्मये च इति च, वनिता जनितात्यर्थानुरागायाञ्च योषितीत्यमरः॥१६॥

अनु०-उस रास-स्थली के समीप मदनोत्सव-सम्पादन के लिए माधवी लता-निर्मित एक चतुः शाल (चारों दिशाओं में समकोण) मंडप विशेष है । हे हंस ! उसकी ओर तुम दृष्टिपात भी न करना । कारण कि उसके देखने मात्र से चित्त में अत्यन्त आनन्दोदय होने से तुम अपना मार्ग-गमन भूल जाओगे और उसी के देखने में तुम्हारा मन मग्न हो जावेगा और उस समय तुम ऐसा कहने लगे कि, मैं श्रीकृष्ण के निकट सन्देश पहुँचाने में असमर्थ हूँ ? तो बेचारी गोप-सुन्दरियों की आशा-भङ्ग हो जाने से वे मर ही जावेंगी, यह मैं निश्चय जानती हूँ ॥१६॥

प्रागरूप-दोहा

भू मंडल में जदपि बहु, दृश्य अनेक प्रकार ।
पै, मराल ! सब सों अधिक, कृष्ण केलि आगार ॥१६॥

मूल की भाषा-छन्द गीतिका

ता रास मंडल में प्रकाशित माधवी की बेलि कौ ।
सुन्दर सुहायौ कृष्ण हित तहँ सदन क्रीडा केलि कौ ॥
तुम देखियो जिन वाहि नहिँ निज चाल भूलौ प्रेम सों ।
यह गोप वनिता प्राण त्यागहिँ विरह दुख के नेम सों ॥१६॥

सारांश-सोरठा

लखत केलि गृह हंस, काज, चाल, चूकौ सकल ।
गोपी जन विध्वंस, होहिँ रावरी भूल सौं ॥१९॥

००००

मम स्तादर्थानां क्षतिरिह विलम्बाद्यदपि ते
विलोकेथाः सर्वं तदपि हरिकेलिस्थलमिदम् ।
तवेयं न व्यर्था भवतु शुचिता कः स हि सखे
गुणो यश्चाणुर्द्विषि मतिनिवेशाय न भवेत् ॥२०॥

टीका—इदानीं विलम्बे दोषमुद्भाव्य परोपकारपरस्य हंसस्य चित्तानुकूलायाह मम स्यादिति यद्यदि ते तव इह चतुःशालावलोकने विलम्बान्ममार्थानां प्रयोजनानां क्षतिः हानिः भवेत् तदपि तथापि इदं हरिकेलिस्थानं सर्वं समग्रं विलोकेथाः पश्य ननु किमित्यतित्वरयानुष्ठेयकार्यस्य विघ्नेऽनुमतासि इत्यत आह तव इयं शुचिता शुद्धता व्यर्था न भवतु विफला न स्यात् अथच शुभ्रता इति शुचिः । ननु तद्दर्शनाभावेनैव किमिति शुचिता व्यर्थता भवेदित्याह-सखे हि निश्चितं स को गुणः यश्चाणुर्द्विषि श्रीकृष्णे सति निवेशाय मनो न भवेत् । हरौ मनः प्रवेशविधायकं विना कोऽपि विद्याशुद्धतादिगुणः न भवतीत्यर्थः । एतेन श्रीकृष्णस्थानावलोकनादिना तस्मिन् आवेशातिशयेन शुचिता सफलैव स्यादित्यर्थः । शुचिः शुद्धेऽनुपहते शृङ्गाराषाढश्च योषिति । ग्रीष्मे हुतवहेऽपि स्यादुपधा शुद्धमन्त्रिणि । जलद्रोण्यां शुचिः प्रोक्ता तीक्ष्णाग्रे षु च वस्तुष । शुचिः शङ्खनखे प्रोक्तः शुचिस्तरणे भावणे इतिविश्वः । गुणोऽसौ ज्याम प्रधाने रूपादौ सूद-इन्द्रिये । त्यागे सौर्य्यादि सत्वादि सन्ध्याद्यावृत्ति रज्जुषु । शुक्लादावपि वाच्याङ्ग इति मेदिनी ॥२०॥

अनु०—इस व्रज में श्रीकृष्णचन्द्र की लीलास्थली का दर्शन करते हुए तुम्हें विलम्ब हो जाने से हमारे अभीष्ट—कार्य अर्थात् मथुरा

ी को सन्देश ले जाने के कार्य में विलम्ब भले ही हो तथापि
न लीला–स्थली का तुम अवश्य ही दर्शन करना, ऐसा करने
म स्वयं बाह्य एवं अन्तर की पवित्रता प्राप्त करने में सफल होगे
योंकि, हे सखे ! मनुष्य में वह गुण किस काम का जो श्रीकृष्ण
न्द्र में मन आसक्त नहीं करा सकता ॥२०॥

प्रारूप–दोहा

हंस बताये शोध ये, पंथ रावरे माँह ।
निपट मनो रंजक सकल, सजल सघन तरु छाँह ॥२०॥

मूल की भाषा पद्य–छन्द गीतिका

यदि होयगी तव विलँब तें मम अर्थ की छति हे सखे ।
इन सकल क्रीड़ा थलन कों तौ हू न रहियों बिन लखे ॥
शुचिता तुम्हारी व्यर्थ यातैं होय नहिँ यह फल महा ।
चाणूर रिपु में लगत जो नहिँ सो सुमति अरु गुण कहा ॥२

सारांस–सोरठा

यद्यपि किये विराम, होय हानि मम अर्थ की ।
तदपि कहे जो धाम, तिन्हें अवश्य निहारियों ॥२०॥

००००

सकृद्वंशीनादश्रवणमिलिताभीरवनिता-
रहःक्रीडासाक्षी प्रतिपदलतासद्मसुभगः ।
स धेनूनां बन्धुर्म्मधुमथनखट्वायितशिलः
करिष्यत्यानन्दं सपदि तव गोवर्द्धनगिरिः ॥२१॥

ीका–अतः परमपि रमणीयं हरिविहारस्थानमस्ति तद्दर्शनौचित्याशयेन
सकृदिति । स प्रसिद्धः गोवर्द्धनः गिरिः सपदि दर्शनक्षण एव तवानन्द
करिष्यतीत्यन्वयः । स कीदृक् सकृदेव वंशीनादस्य श्रवणेन मिलि

सङ्गताः या आभीरीवनिता गोपस्त्रियः तासां रहसि एकान्ते या क्रीडा तस्याः साक्षी साक्षाद्द्रष्टा यद्वा रहः क्रीडा सुरतक्रीडा एतेन अत्यन्तरमणीयत्वं विजनत्वोक्तं प्रतिपदं स्थाने स्थाने यल्लतामयं गृहं तेन सुभगः सुन्दरः पुनः कीदृक् धेनूनां बन्धुः यथेष्टाचारविश्रामस्थानात् इन्द्राद्रक्षणाच्च पुनः कीदृक् मधुमथनस्य श्रीकृष्णस्य खट्वायिता खट्वे वाचरिता शिला पाषाणो यस्य तत्र शयनाचरणात्। एतेन तद्दर्शनार्थमपि झटिति गन्तव्यमित्युक्तम्। सकृत् सहैकवारे स्यादित्यमरः। रहोऽपि गुह्ये सुरते च तत्वे इति विश्वः। पदं शब्दे च वाक्ये च व्यवसायोपदेशयोः। पदे तच्चिन्हयोः स्थाने त्राणयोः रङ्कवस्तुनोरितिमेदिनी। प्रतिपत्रे निधौ वीप्सानुसरणादौ प्रयोगत इति विश्वः। प्रतिपदमिति वीप्सायामित्यव्ययीभावः। बन्धुः स्यात् पुंसि बन्धुके मित्रेऽपिवान्धवे इति मेदिनी। सपदि द्राङ्मङ्क्षु च द्रुते इत्यमर। सपदि तत्क्षणे इत्यमरः॥२१

अनु०-केवल एक बार ही मुरली-निनाद सुनकर ब्रज की गोप-सुन्दरी गण श्रीकृष्णचन्द्र के निकट आगमन करती थीं। उनकी एकान्त-निकुञ्ज क्रीडा का जो साक्षात् द्रष्टा है एवं जो स्थान--स्थान पर लता निर्मित निकुञ्ज कुटीरों से सुशोभित है तथा सब गौ-वत्सों का बन्धु है। लीला–विलास के समय जिसकी शिलायें श्रीकृष्णचन्द्र की सुख–शैय्या बन जाती हैं उस श्रीगोवर्धनगिरि के दर्शन मात्र से तुमको परम आनन्द प्राप्त होगा ॥२१॥

प्राग्रूप–दोहा

चलत पन्थ अवलोकिये, कौतुक हंस ! विचित्र।
गिरि गोवर्द्धन के मिलैं, दर्शन परम पवित्र ॥२१॥

मूल की भाषा-पद्य (कवित्त)

एक बेर श्रवन सुनत टेर बाँसुरी की,
जुरि आयौ तहाँ गोप नारिन कौ गन है

साक्षी है तिन की एकान्त केलि हरि कौ यह,
बहु लता कुञ्जन तें सोहत सघन है ॥
प्यारौ सुरभीन कौ-शिला हैं जाकी खाट जैसी,
तिन पर करी मधु मथन शयन है।
पजू सित कंठ ताहि जाय के निहारौ वेगि,
आनँद लिहारौ करै गिरि गोवर्द्धन है ॥२१॥

सारांश—सोरठा

जाकी शिला विशाल, कृष्ण करी तिन पर शयन।
जो तरु लता तमाल, रुचिर रम्य सुरभीन तें ॥२१॥

◇◇◇◇

तमेवाद्रिं चक्राङ्कितकरपरिष्वङ्गिरसिकं
महीचक्रे शङ्कमहि शिखरिणां शेखरतया।
अरातिं ज्ञातीनां ननु हरिहयं यः परिभवन्
यथार्थं स्वं नाम व्यधित भुवि गोवर्द्धन इति ॥२२॥

टीका—तन्माहात्म्यं वर्णयति तमेवेति। तमेवाद्रिं गोवर्द्धनाख्यं महीचक्रे भूमण्डले शिखरिणां पर्वतानां शेखरतया श्रेष्ठतया चिह्ने तृतीया उपलक्षितं शङ्कमहि मन्यामहे एवशब्द इतरयोगनिरासकः अन्यं नेत्यर्थः। तत् कीदृशं चक्रेणाङ्कितश्चिह्नितः करो यस्य स तथा हरिरित्यर्थः। तस्य परिष्वङ्गे आश्लेषे रसिकश्चतुरः इत्यलभ्य—सौलभ्यं पुण्यशालित्वञ्चोक्तं शेखरत्वे हेतुमाह ननु यस्मात् आमन्त्रणे वा ज्ञातीनां अरातिं शत्रुं हरिहयं इन्द्रं परिभवन् सोऽयमद्रिः भुवि पृथिव्यां गोवर्द्धन इति प्रसिद्धं स्वं नाम यथार्थं व्यधित अकरोत् खरतरवातवर्षणात् गवां रक्षणात् गां वर्द्धयतीति गोवर्द्धन इति व्युत्पत्त्या नाम्नः सार्थकत्वं चक्राकृतित्वात् चक्रं मह्येव चक्रं महीचक्रं चक्रांगणे चक्रवाके चक्रं

सैन्यरथाङ्गयोः। ग्राम जाले कुलालस्य भाण्डे वा वक्षयोरपि। अर्भसामर्थ्य सम्वर्त्ते इति विश्वः। ननु प्रश्ने चानमयेऽनुज्ञानेऽप्यवधारणे। आमन्त्रणे सम्भ्रमे चेति ॥२२॥

अनु०—जो श्रीकृष्णचन्द्र के चक्र—चिह्नित कोमल करों के स्पर्श-सुख का रसज्ञ है इस श्रीगोवर्धन पर्वत को हम पृथ्वी के सब पर्वतों में सर्वश्रेष्ठ मानती हैं। जिस इन्द्र ने पर्वत—जाति के पक्षों का छेदन किया था, वही इन्द्र अपने यज्ञ—भङ्ग के कारण ब्रज पर कुपित होकर एक सप्ताह तक घोर जलधारा वर्षण करने लगा था उस समय गो—वत्स तथा गोप-गोपियों सहित समस्त ब्रज की रक्षा करने से इसका गोवर्द्धन नाम सार्थक हुआ है ॥२२॥

प्रागरूप—दोहा

धरा माहिँ सब गिरिन कौ गोवर्द्धन अवतंस।
ताके दर्शन कीजिये जात मधुपुरी हंस ॥२२॥

मूल की भाषा पद्य (छन्द अवलम्ब)

चक्राङ्कित कर कृष्ण के जो धारण भयौ।
भूमि गिरिन शिर- मौर हेतु यह ठयौ ॥
नगरिपु इन्द्रहि जीति अखिल मंडल मही।
गोवर्द्धन निज नाम ठीक पदवी लही ॥२२॥

सारांश—सोरठा

जिन कर कमलन चक्र तिन में यह शोभित भयौ।
जीत्यौ नगरिपु शक्र गोपालक गिरिराज ब्रज ॥२२॥

◇◇◇◇

तमालस्यालोकाद्गिरिपरिसरेऽसन्ति चपलाः

पुलिन्द्यो गोवि पः

शनैस्तासां तापं क्षणमपनयन् यास्यति भवा-
नवश्यं कालिन्दीसलिलशिशिरैः पक्षपवनैः ॥२३॥

टीका—प्रासङ्गिकोपकाराय तत्रेति कर्त्तव्यतामुपदिशसि । तमालस्येति गिरिपरिसरे गिरिपर्य्यन्तभूमौ तमालवृक्षस्यालोकात् दर्शनात् श्रीकृष्णो ऽयमागत इति सम्भ्रमाच्चपलता । गोविन्दस्य स्मरणेन यो रभसो वेग-स्तेनोत्तप्तं वपुर्यासां ताः पुलिन्द्यः पुंलिङ्ग शबर विशेष जाति स्तत् स्त्रियः सन्ति अति-श्यामल-तमालतरुदर्शनेन सरूपतया श्रीकृष्णस्य स्म-रणं ततस्तप्तशरीरता अतश्चपला चञ्चला श्रीकृष्णोऽयं समागत इति तमालदर्शनेन सम्भ्रमतातिशयात्तरलितमनसस्ततो विशेषावधारणात्त-प्तेति वाक्यार्थः अत्र सन्तीति वर्त्तमानप्रत्ययेन सदैव तापास्तत्र वर्त्तन्ते इत्युक्तम् । ततः किमत आह भवान् कालिन्दीसलिलशिशिरैः यमुनाजलेन शीतलैः पक्षपवनैः पतत्रजनितवायुभिस्तासां पुलिन्दीणां तापं अपनयन् खण्डयन् सन् क्षणं व्याप्य अवश्यं शनैर्मन्दं यथाभवति तथा यास्यति एतेन चिरविरहाकुलस्त्रीजनतापहरणेन पुण्यातिशयस्तव स्यादितिभावः । चिरतरविलम्बाभावार्थं क्षणमुक्तम् । परिसरो मतो वृत्तौ देव-पाषान्त प्रदे-शयोरिति विश्वः । क्षणो व्यापारशून्यत्वे मुहूर्त्तोत्सवपर्व्वसु इतिच॥२३

अनु०—श्रीगोवर्धन पर्वत के निकट-स्थल में तमालतरु का दर्शन करने मात्र से पुलिंद-वनिताओं के मनमें श्रीकृष्णचन्द्र की मधुर-स्मृति जाग उठने के कारण उनका अङ्ग सकल विरह अग्नि से तपायमान हो जाता है । हे हंस ! यमुना नदी के शीतल-जल से आपके पक्ष शीतल हैं । उन्हीं के द्वारा वायु-संचार करके उसी से उन गोपियों के विरह संताप को क्षण मात्र के लिए दूर करते हुए तुम अवश्य धीरे २ गमन करना ॥२३॥

प्राग्रूप-दोहा

हंस तुम्हें कर्त्तव्य है, मार्ग माहिँ यह कर्म ।
दीनन के दुख को हरन, सत्पुरुषन कौ धर्म ॥२३॥

मूल की भाषा पद्य (छन्द अवङ्कम)

ताही गिरि के निकट तमाल निहारि कै।
चञ्चल तन्न शरीर कृष्ण सुधि धारि कै॥
तिन मिलनिन कौ ताप सलिल यमुना मिली।
पंच पवन सों करहु जाय शीतल भली॥२३॥

सारांश—सोरठा

मान्यौ मोद मिलाप लखि तमाल हरि कान्ति रुचि।
पुनि बिन दर्शन ताप भयौ भील नारीन कों॥२३॥

००००

तदन्ते श्रीकान्तस्मरसमरधाटीपुटकिता
कदम्बानां वाटी रसिकपरिपाटीं स्फुटयति।
त्वमासीनस्तस्यां न यदि परितो नन्दसि ततो
वभूव व्यर्था ते घनरसनिवेशव्यसनिता॥२४॥

टीका—अति रमणीयगोवर्द्धने कादाचिदिति कर्त्तव्यतां विस्मृत्यैव प्रतिष्ठतीत्याशङ्क्य तदनन्तरं स्थानं कथयति तदन्त इति। तदन्ते गोवर्द्धनस्य समीपे कदम्बानां वाटी नीपवृक्षवाटिका रसिकपरिपाटीं रसिकस्य रसविशेषभावनाचतुरस्य श्रीकृष्णस्य परिपाटीं अनुक्रमं स्फुटयति व्यक्तीकरोति क्रीडास्थानवैशिष्ट्येन क्रीडकस्य चातुर्यं ज्ञायत इति स्फुटीकरणम्। कीदृशी श्रीकान्तस्य हरेर्यः स्मरसमरः कामक्रीडायुद्धः तस्य धाटी अधिकरणीभूतस्थलं वेदिकाभूमिः तया पुटकिता सम्पुटीकृता परितो निर्म्माणेत्पुटकितत्वं दधातीति धाटीवधूञ्ञोऽवादेरट् इति अट् प्रत्ययात् तनादिकः नन्द्यादेराकृतिगणत्वाद्यौगिकेयं स्थल्यांवृत्तः। यद्वा धाटी श्रेणी धाढि इतिमीर्योक्तिः तया कामसमरश्रेण्या वृक्षाणां पुटकितत्वासम्भवात् प्रसिद्धं स्मरसमरानुष्ठानमवगम्यते। धाटीति घोटकानामिति राघवपाण्डवीयम्। त्वं यदि तस्यां कदम्बवाटिकायां परितः सर्वत

आसीनस्तिष्ठन् सन् न नन्दसि मुदितो न भवसि तदा तव घनरसनिवेशव्यसनिता निबिडरसाभिनिवेशव्यसनिता व्यर्था विफला बभूव त्वं यदि तत्र तदवलोकनसुखं नानुभवसि तदा निबिडरसावबोधस्य व्यवसायित्वमेव तव नास्तीतिभावः अखण्डं च घनरसो जलं तत्राभिनिवेशोऽवगाहनं तद्व्यसनिता तदासक्तता बभूवेति आशंसायां भविष्यत्यलिट्। अन्योऽपि निबिडसुरताभिनिवेशव्यसनस्ताहक् स्मरसमरस्थानं दृष्ट्वा यदि न नन्दति तदा तस्य सुरताभिनिवेशव्यसनिता व्यर्था अनभिज्ञत्वादिति च ध्वनिः वाटी वृत्ते च मार्गे च वाटी च गृहनिष्कुटे इतिविश्वः। श्रलं स्यात् कांश्यतालादि वाच्य मध्यमनुत्तमयोः। घनः सान्द्रे दृढे दार्ढ्ये विस्तारे लौहमुद्गरे इतिच। रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः। श्रृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपादपे। मेघपुष्पं घनरस इत्यमरः। व्यसनं त्वशुभे शक्तौ पानस्त्रीमृगयादिषु। दैवनिष्फले पापे विपत्तौ निष्फलोद्यमे इतिमेदिनी ॥२४॥

श्रीगोवर्धनगिरि के प्रान्त भाग में श्रीकृष्णचन्द्र के कन्दर्प-युद्ध-छल से आक्रमण का स्मारक, पुष्परूप पुलकावली-मण्डित एक कदम्ब कुञ्ज है जोकि रसिकेन्द्र चूड़ामणि श्रीकृष्णचन्द्र की एकांत-क्रीडा (रास-लीला) के रस-क्रमोचित व्यवहार को प्रगट करता है। अर्थात् उस कुञ्ज-कुटीर के दर्शन मात्र से इस समय भी उसकी रस परिपाटी प्रगट होती है, तुम भी इसका अनुभव करोगे। यदि तुमने उस कुञ्ज-भवन में बैठ कर आनन्द-अनुभव नहीं किया तो श्रृङ्गार-रस के प्रति तुम्हारी आसक्ति ही निष्फल सिद्ध होगी। अर्थात् तुम्हारा उज्वल-रस परिज्ञान का अभाव ही जान पड़ेगा॥२४॥

प्राग्रूप-दोहा

ता तमाल के निकट ही, मिलै भूमि रमनीय।
तहँ कदम्ब की बाटिका, सुनौ हंस कमनीय॥२४॥

मूल की भाषा पद्य (छप्पय)

लक्ष्मी पति श्री कृष्ण काम संग्राम पाँति सों।
जनम्यौ पुलकित अङ्ग जासु सम्पूर्ण भाँति सों॥
रसिकन की मर्याद तुम्हैं सो प्रकट करैगी।
बैठत ही तहँ हंस चित्त आनन्द भरैगी॥
यदि प्रसन्न मन होय नहिँ ता कदम बाटिका के बसैं।
व्यर्थ प्रशंसा होयगी का भयौ सलिल गहरे धसैं॥२४॥

सारांस-सोरठा

अवशि देखिये हंस, वह कदम्ब की बाटिका।
घनरस गति अवतंस, होगी परिपाटी सफल॥२४॥

००००

शरन्मेघश्रेणी-प्रतिभटमरिष्टासुरशिरः
चिरं शुष्कं वृन्दावनपरिसरे द्रक्ष्यति भवान्।
यदारोढुं दूरान्मिलति किल कैलासशिखरि-
भ्रमाक्रान्तस्वान्तो गिरिशसुहृदः किङ्करगणः॥२५॥

टीका — तत्रातिचित्रमस्तीति कथयति शरदिति। भवान् वृन्दावनपरिसरे वृन्दावनस्य प्रान्तदेशे चिरं शुष्कं अरिष्टासुरशिरः वृषाकृत्यसुरोऽरिष्टाख्यः तस्य शिरो मस्तकं द्रक्ष्यति। शरन्मेघश्रेणी शरत् कालीनमेघपंक्तिस्तस्याः प्रतिभटं तुल्यं। ननु किमिति चित्रं यत् द्रष्टुं मामादिशसि अत आह शिवसुहृदः किङ्करगणो दासनिचयः यत्र कैलाशशेखरभ्रमाक्रान्तः सन् श्वेताद्रेः तस्य शिखरं शृङ्गं तस्य भ्रमेण भ्रान्त्या व्यतिक्रान्तं व्याप्तं स्वान्तं मनो यस्य सः। शरदि शिखरमारोढुं दूरान्मिलति मूढ़तो भवति निरन्तरकेलिरसिका अपि यस्य दर्शनात् भ्रमं कुर्वन्ति तदान्येषामद्भूतमेवातो दर्शनं युज्यते। दूरादित्यनेनात्युच्चता ध्वनिता मिलतीति वर्त्तमाननिर्देशात् अद्यापि तेषां भ्रमो नापयातीति ध्वनितम् शुष्कमित्यनेन

पृथिगन्धाभावः उक्तः प्रतिमल्लशब्दः प्रतिपक्षिवाची यत्र तु गौण्या-वृत्त्या सादृश्यमभिधत्ते। यथा च दण्डी-तुल्यार्थः शब्दप्रसङ्गे प्रतिपक्षी प्रतिद्वन्द्वी प्रत्यनीकविरोधिन इत्यादि। अरिष्टं रिष्टमित्युक्तमरिष्टो वृषभो मतः इत्यनेकार्थध्वनिमञ्जरी। स्वान्तं हृन्मनसं मनः इत्यमरः ॥२५॥

अनु०-श्रीवृन्दावन प्रान्त-देश में शरत्कालीन शुभ्र मेघमाला के समान चिरकाल से शुष्क अरिष्टासुर का मस्तक आपके दृष्टिगोचर होगा। इस विशाल मस्तक को दूर से देखकर आज कल भी भगवान् शंकर के मित्र कुवेर के किंकर यक्षगण कैलाश-पर्वत के भ्रम से उस पर आरोहण करने के लिए आते हैं। इसमें भ्रान्तिमान अलङ्कार है ॥२५॥

प्रागरूप-दोहा

हंस देखियों मार्ग में, औरहु दृश्य विचित्र।
अशुचि वस्तु व्यवहार में, लीनी मानि पवित्र ॥२५॥

मूल की भाषा पद्य [छन्द अवङ्गम]

शुष्क अरिष्टासुर कौ शिर चिरकाल सों।
वृन्दा विपिन समीप शरद घन माल ज्यों॥
धनद भृत्य कैलाश जानि अचरज यहै।
आवत दूर तें चढ़न लखौ तुम हू वहै ॥२५॥

सारांश-सोरठा

शारद मेघ समान सीस अरिष्टासुर पर्यौ।
किंकर धनद अजान लखत ताहि कैलाश गनि ॥२५॥

◇◇◇◇

स्वन् याहि स्वैरं चरमदशया चुम्बितरुचो
नितम्बिन्यो वृन्दावनभुवि सखे सन्ति बहवः।

परावर्तिष्यन्ते तुलितमुरजिन्नूपुररवात्तव
ध्वानात्तासां बहिरपि गताः क्षिप्रमसवः ॥२६॥

टीका—तत्रातिविरहविवशयोषितामुपकाराय मन्दं मन्दं शब्दयमान एव यास्यतीत्याह क्वणन्नित्यादि । हे सखे वृन्दावनभुवि चरमदशया अन्तिमदशया मरणावस्थया इति यावत् चुम्बितरुचः आक्रान्तकान्तयः बहवो नितम्बिन्यः स्त्रियः सन्ति अतः स्वैरं स्वच्छन्दं मन्दमिति यावत् क्वणन् शब्दं कुर्व्वन् याहि यास्यसीति प्रार्थनायां भविष्यति लोट् ननु मम शब्दायमाने तासां किं भविष्यतीत्याह तव ध्वानात्तव शब्दात् तासां नितम्बिनीनां बहिर्गता देहनिसृता अपि असवः प्राणाः क्षिप्रं शीघ्रं परावर्त्तिष्यन्ते शीघ्रं शरीरे प्रविशन्तु । ननु कथमेतत् सम्भवत्वत आह-तुलितमुरजिन्नूपुररवात् तुलितः सदृशीकृतो मुरजितः श्रीकृष्णस्य नूपुररवो येन अयं भावः हरिविरहविधुराणां तासां तव ध्वनिश्रवणेन श्रीकृष्णस्य नूपुररव-भ्रान्त्या श्रीकृष्णोऽयमागत इति हठादालिङ्गनार्थं प्राणाः स्वशरीरेषु झटिति प्रवेश्यन्तीति निसृतानां पुनः प्रवेशासम्भवात् अपगता इति आरम्भोक्तः अपगन्तुमुद्यता इत्यर्थः । एतेन केवलं वयमेव विरहविदूनाः त्वां न प्रार्थयामहे किन्तु सर्व्वासामेव व्रजवासिनीनां एषैवावस्था अतः सर्व्वोपकारकरणाय भवता अवश्यमेतत् कर्त्तव्यमुक्तं भवति । दशा यथा भारते-चक्षुरक्तस्तदनु विमलं सङ्गति भावना च, व्यावृत्तिः स्यात्तदनु विषयग्रामतश्चेतसोऽपि । निद्राच्छेदस्तदनुतनुता निस्त्रपत्वञ्च तस्मान्मादो मूर्च्छा तदनुमरणं स्युर्दशाःक्रमेण इति अतः चरमदशा मरणं चुम्बितरुच इत्युपादानात् मरणस्य पूर्व्वावस्थैवोक्तम् मरणदशावर्णनं अमङ्गलत्वात् अरिभिर्न क्रियते । जीवनोपायसम्भवे तु वर्ण्यते । ततश्च कामिनां चिरजीवित्वं तथा च भरतः-पुनः पुनः प्रवर्त्तन्ते निवर्त्तन्ते पुनः पुनः । अवस्था हृदये मूर्त्ता हतश्च चिरजीवेति । दशावस्था दीपवर्त्यो वस्त्रांशे भूम्नि योषितीति मेदिनी ॥२६॥

अनु०-हे बन्धो ! तुम ऊँचे स्वर से मधुर शब्द करते हुए प्रस्थान

। वृन्दावन में प्रायः दशवीं (मरण) दशा-सन्न अनेक अ
। विद्यमान हैं। उनके प्राण देह से वहिर्गत होते हुए
ष्णचन्द्र के चरण-नूपुर के समान तुम्हारा शब्द सुनकर ए
श्रीकृष्णचन्द्र का आगमन जानकर सम्भवतः उनके प्रा
लौट आवेंगे ॥ २६ ॥

आगरूप-दोहा

ललिता कहत मराल सों, कीजै मथुरा गौन।
पुर दुख शीघ्र निवारि कै, सुकृत या सरिस कौन ॥२६॥

मूल की भाषा पद्य [छन्द अवङ्गम]

स्वेच्छा सं ध्वनि करत सखा तहँ जाइये।
वृन्दावन वहुबाल मृतक जिमि पाइये ॥
कृष्ण नूपुरन सरिस शब्द तव जानि कैं।
निकलैं वगदहिं प्रान सपदि अवलानि कैं ॥२६॥

सारांश-सोरठा

करत शब्द स्वच्छन्द, हंस जाउ तुम मधुपुरी।
दुःखित वनिता वृन्द, धीरज दीजै तिनहिं मग ॥२६॥

००००

स्वमासीनः शाखान्तरमिलितचरहत्विषि मुदं
दधीथाः माकन्दे क्षणमपि घनश्यामलरुचौ।
ततो हंसौ विभ्रन्निखिलनमसश्चिक्कमिषया
स नद्दिष्णुं विष्णुं कलितदरचक्रं तुलयिता॥२७॥

।—तत्र विश्रामस्थानं कथयन्ती प्रोत्साहयति त्वमासीन इत्यादि। त
दे नाम्नि वटे क्षणमपि आसीनः सन् मुदं हर्षं दधीथाः कुरु
य। यद्यपि निरन्तरविरहज्वरविधुराः कोयो योषय त्वरितगमनो

त्सुकः तथापि क्षणं क्षणकालमपि आसीन इत्यपि शब्दाभिप्रायः। किम्भूते शाखान्तरं शाखानामवकाशे मिलितः प्रतिबिम्बभिया च भुवि सूर्यो यस्य शाखान्तरमिलितत्वं पुनः कीदृशे घना निविडा श्यामला रुचिः कान्तिर्यस्य स तस्मिन् ततः किमत आह ततो भवत उपवेशनात् स भाण्डीरः हंसं सूर्यं च बिभ्रत् नारायणं विष्णुं श्रीवामन-रूपिणं तुलयिता सदृशी करिष्यति। कीदृशं नभसश्चिक्रमिषया अखिलाकाशस्य आक्रमणेच्छया वर्द्धिष्णुं वर्द्धनशीलं विभक्ति-विपरिणामात्। वटुरपि समग्राकाशस्य आक्रमणेच्छया वर्द्धिष्णुः। पुनः कीदृशं कलितदरचक्रं धृत-शङ्खचक्रं विष्णुमपि घनश्यामलरुचं नवजलधरकान्तिं अतः हंससूर्यौ शङ्खचक्रसदृशौ वटोऽपि विष्णुस्थानीयः शाखा बाहु-स्थानीया इति वाक्यार्थोपमा। अन्तरमवकाशावधि परिधानान्तर्भेदतादर्थ्ये छिद्रात्मीयविना बहिरवसरमध्येऽन्तरात्मने चेत्यमरः। भवो भये दरो गर्त्ते दरः शङ्खे च कीर्त्तितः। दराव्ययं मनागर्थे दरी तु कन्दरे मता इति कोषान्तरम्। चिक्रमिषेति कर्त्तृकृत् परशे भावात् क्रमे तुलयितेत्यत्र तुल-शब्दान्नामनिङन्तात्तुट्ता अन्यथा गुणः स्यात् ॥२७॥

अनु०—हे हंस! तुम गगन-चुम्बी सघन-श्यामल वर्ण भाण्डीर-वट वृक्ष पर क्षण-मात्र विराज कर विश्राम-सुख का अनुभव करना जिससे वह अपूर्व-शोभा धारण कर मानों सम्पूर्ण आकाश को अति क्रमण करके वृद्धि पाने वाले शंख-चक्रधारी भगवान वामन (उपेन्द्र) देव की समानता को प्राप्त होगा ॥२७॥

प्राग्रूप-दोहा

आगे वृन्दा विपिन ते प्रस्तुत वट भाण्डीर।
हंस लखौ ता बिटप की छाँह सघन गम्भीर ॥२७॥

[मूल की भाषा पद्य-छन्द बर वै] ध्रुवा छन्द

बट भाण्डीर श्यामघन शोभा जासु।
रवि मीलित हैं ऊँची शाखा तासु।

तहाँ एक क्षण बैठि चित्त हरषाहिँ।
तुमहिं सहित तापर द्वै हंस दिखाहिँ॥
चाहत सब नभ करन आक्रमण सोय।
वदन माहिँ तत्पर जाकी मति जोय॥
तहाँ शंख तुम सोहहु चक्र दिनेश।
तब राजै वट विष्णु सरिस विहगेश॥२७॥

सारांश—सोरठा

ऊँची शाखा देखि मग में वट भाण्डीर की।
सुखद चित्त अवरेखि छनिक करौ विश्राम तुम॥२७॥

००००

त्वमष्टाभि र्नेत्रैर्विगलदमलप्रेमसलिलै-
र्मुहुः सिक्तस्तम्वां चतुरचतुरास्यस्तुतिभुवम्।
जिहीथाः विख्यातां स्फुटमिह भवद्बान्धवरथं
प्रविष्टं मंस्यन्ते विधिमटविदेव्यस्त्वयि गते॥२८॥

टीका—ततोऽनन्तरमप्यति-पुण्यभूमिरस्तीत्याह त्वमष्टाभिरिति। हे चतुर सुन्दर त्वं विख्यातां अतिप्रसिद्धां चतुरास्यस्य ब्रह्मणः स्तुति-भुवं अवस्थानभूमिं जिहीथाः गच्छेः कीदृशो अष्टाभिर्नेत्रैर्विगलन्ति यानि अमलानि प्रेमसलिलानि प्रेमाश्रूणि तैर्मुहुः सिक्तो आर्द्रीकृतो नेत्रे विशिष्यतेऽपि नेत्रेणाभिषेकासम्भवात् सविशेषणे हि विधिनिषेधौ विशे-षणमुपसंक्रामतः। सति विशेष्ये बाधे इति न्यायात्। नेत्रजलैरपि सेचनमवगन्तव्यम्। इह अत्रावसरे स्फुटमुत्प्रेक्षा अटविदेव्यो वनदेवताः अस्यां भूम्यां त्वयि गते अत्र प्रविष्टं ब्रह्माणं मंस्यन्ते कीदृशं भवद्बान्धवरथं भवान् बान्धवो यस्य एवम्भूतो रथो यस्य यद्वा भवतो बान्धवा राजहंसा रथे यस्य तं दललहरखानसरे हंसवाहनं ब्रह्माणं दृष्टवतीनां भवद्दर्शने पुन-

रपि ब्रह्माभिगमनशङ्का अटविदेवतानां भविष्यतीत्यर्थः । मुहुः सिक्त-स्तम्बामिति वारं वारं सिक्तो स्तम्बस्तृणादिगुच्छा स्तम्बो गुच्छ-स्तृणादिना इत्यमरः । वीहीभ्या इति तु ओहाङ् गतौ जुहोत्यादि चिन्त्यादिनिष्ठार्याह् । चतुरश्चातुरकश्चकगण्डौ निरन्तरे । द्वौ स्यातां चाटुकारे दृष्टे च नेत्र-गोचरे इति विश्वः । चतुरः पिशुनोऽपि चेति कोषान्तरम् । बान्धवो बन्धुसुहृदाविति मेदिनी ॥२८॥

अनु०—हे बुद्धिमान् हंस ! जिस जगह विशुद्ध-भक्ति भाव के कारण ब्रह्मा के आठ नेत्रों से गिरी हुई प्रेम जल-धारा से बार-बार अभिषिक्त चिर-प्रसिद्ध ब्रह्मा जी का स्तुति-स्थान सिक्त-स्तंभ है अर्थात् जिस स्थान पर ब्रह्मा ने अश्रु-प्लावित नयनों से श्रीकृष्ण-चन्द्र की मञ्जुल-महिमा निरीक्षण कर उनकी स्तुति की है उस स्थान पर तुम जब गमन करोगे तब वन-देवियाँ यही अनुमान करेंगी कि ब्रह्मा का वाहन-हंस उनके वन में आ पहोंचा है अर्थात् ब्रह्मा के वाहन के समान तुमको देखकर वनदेवियाँ पुनः ब्रह्मा को ब्रज में आया समझेंगी ॥ २८ ॥

भावरूप—दोहा

आगे वन भांडीर तें थल पुनीत इक और ।
विनय करी श्रीकृष्ण की चतुरानन ता ठौर ॥२८॥

मूल की भाषा पद्य [छन्द रोला]

हे चतुर ! तहां तें जाउ जहाँ विधि स्तुति कौ थल ।
सिच्यौ सो पुनि पुनि अष्ट नयन जे स्रवत प्रेम जल ॥
गये तुम्हारे, ख्याति यथारथ बन देवी गन ।
मानहिंगी लखि यान बंधु आगम चतुरानन ॥२८॥

सारांश—सोरठा

पहुँचत तुम्हैं मराल स्तुति भूमि शुचि विरंचि में ।
विधि आगम तत्काल जानैं वन देवी सकल ॥२८॥

००००

उदञ्चन्नेत्राम्भः प्रसरलहरीपिच्छिलपथ-
स्खलत्पादन्यासप्रणिहितविलम्बाकुलधियः ।
हरौ यस्मिन्मग्ने त्वरितयमुनाकूलगमन-
स्पृहाक्षिप्ता गोप्यो ययुरनुपदं कामपि दशाम् ॥२६॥

टीका—कालीयह्रदमतः परं गमिष्यसीत्याह हृयैव उदञ्चदिति । पुरोऽग्रे तस्मिन् कालीयह्रदे त्वया सलिलं पेयमित्युभयेऽन्वयः । तस्मिन् कस्मिन् हरौ कृष्णे यस्मिन् कालियह्रदे मग्ने सति गोप्यः अनुपदं पदे पदे कामपि अति शोच्यां दशामवस्थां ययुः प्रापुरित्यर्थः कीदृश्यः त्वरितं शीघ्रं यमुनाकूलाय यद्गमनं तस्य स्पृहा आकाङ्क्षा आकृष्टाः कथं झटित्येव यमुनाकूलं प्राप्स्याम इति स्पृहा आकाङ्क्षया आकृष्टमाना इवेत्यर्थः । ननु शीघ्रमेव किमिति न गच्छन्तीति चेत्तत्राह । उदञ्चदिति उदञ्चन्ति उच्छलन्ति यानि नेत्राम्भांसि अश्रूणि तेषां प्रसरो वेगस्तस्य लहरीभिस्तरङ्गैः पिच्छिलो यः पन्था तत्र स्खलन्तः अर्थात्स्थले अस्थिराः ये पादन्यासास्तैः प्रणिहितः विहितो यो विलम्बः अतिमधुरता तेन आकुला धीर्यासां ताः शोकेन गलन्त्येव प्रवाहपङ्कलमार्गे स्खलत् पादअथात्त्वरितगमनाशक्त्या विफलबुद्धय इत्यर्थः । प्रसरः प्रणयवेगे इति विश्वः ॥२६॥

अनु०—जिस कालिय-द्रह में श्रीकृष्ण के मग्न हो जाने पर शीघ्र ही यमुना-पुलिन पर पहोंचने की इच्छा करके गोपीगण अपने प्रियतम के विपत्ति की आशंका से निज-नयन-जलधारा से सिक्त मार्ग में जाते समय पग-पग पर स्खलित-चरण हो गई थीं और उनकी बुद्धि क्षण मात्र विलम्ब होने मात्र से व्याकुल हो उठी थी अर्थात् वे जितना ही शीघ्र-गमन की इच्छा करने लगी उतना ही हृदय में श्रीकृष्णचन्द्र के अनिष्ट की आशंका से उनका गमन मन्द होने लगा । उस विलम्ब से अत्यन्त व्याकुल होकर वे एक अकथनीय भाव की दशा में प्राप्त हो गई थीं ॥२६॥

प्राग्रूप-दोहा

जहां कियौ श्री कृष्ण ने काली गौरव ध्वंस।
ता कालिंदह कौं लखौ जाय सपदि तुम हंस ॥२८॥

मूल कौ भाषा पद्य—छन्द दोवै

डूबे सुनि कालीदह में हरि, गोपिन यह गति लीनी।
वहीं हगन तें लहर नीर की, कीच पन्थ बिच कीनी॥
धरत चरन तहँ डिगत, बुद्धि व्याकुल विलम्ब सों भारी।
शीघ्र गमन इच्छा सों प्रेरित भईं सकल ब्रज नारी ॥२६॥

सारांश—सोरठा

करि सर्वाङ्ग स्नान कृष्ण कियौ जो विमल ह्रद।
ताकौ करि जल पान हंस करौ जीवन सफल ॥२६॥

मुहुर्लास्यक्रीडाप्रमदमिलदाहोपुरुषिका—
विकाशेन भ्रष्टैः फणिमणिकुलेधूमलरुचौ।
पुरस्तस्मिन्नीपद्रुमकुसुमकिञ्जल्कसुरभौ
त्वया पुण्यैः पेयं मधुरमुदकं कालियह्रदे ॥३०॥युग्मकं

टीका—ह्रदे कीदृशे मुहुः पुनः पुनः लास्यक्रीडायां नर्त्तनकेलौ यः प्रमोदो हर्षस्तेन मिलन्ती उज्जृम्भमाना या आहोपुरुषिका आत्मसम्भावना तस्या विकाशः आविर्भावस्तेन भ्रष्टैः पतितैः फणिमणिकुलैः कालियस्य फणस्थितैः मणिसमूहैधूमला धूम्रारुचिः कान्तिर्यत्र अतिशयहर्षेण नर्त्तनक्रियाऽविवेकात् पादाघातेन मणीनां प्रभ्रष्टत्वम्। पुनः कीदृशे नीपद्रुमस्य कदम्बवृक्षस्य कुसुमकिञ्जल्कैः पतितैरेणुभिः सुगन्धौ पुनः कीदृशे पुण्ये अतिशयपवित्रे हरिविहारपूतत्वात् पवित्रत्वम्। उदकं कीदृशं मधुरं स्वादुरसं यद्वा एतेन विषधरनिवासविषरसत्वशंका

परिहृता । लास्यं तौर्य्यत्रिके सतं नृत्ये चेति मेदिनी । आहोपुरुषिका दर्पाद्या स्यात् सम्भावनात्मनीत्यमरः । अहमेव पुरुषोऽस्मीति आहोपुरुषिका मयूरव्यंसकादिगणपाठात् रूपसिद्धिः । विकासः पुंसि विजने प्रकाश इति मेदिनी । किञ्जल्कः केशरोऽस्त्रियामित्यमरः । सुरभिः सल्लकी मातृभित् सुरामेषु योषिति । चम्पके च बसन्ते च तथा जातीफले पुमान् । स्वर्णे गन्धोत्पले क्लीवं सुगन्धिकान्तयोः स्त्रिष्विति मेदिनी । पुण्यं शोभन नेत्रेषु क्लीवं धर्म्मे च सुकृते इति मेदिनी । मधुरस्तु रसे विषे मधुरं रसवृत्स्वादु पेयेषु मधुरोऽन्यवदिति विश्वः । कालियेनाधिष्ठितो ह्रदः कालियस्य ह्रदः इति वा षष्ठीसमासः । तथा च दशमे-कालिन्द्यां कालियस्यासीत् ह्रदः कश्चिद्वित्यादिः ॥२०॥

अनु०—श्रीकृष्णचन्द्र ने बारम्बार अपूर्व नृत्य-लीला-चातुरी का सानन्द प्रदर्शन कर अपने प्रबल-पौरुष द्वारा अभिमानी-कालिय-सर्प का दमन किया था उस समय सर्प के मस्तक से रक्त वर्ण-मणि गण गिरने के कारण यमुना का श्यामल-सलिल, रक्त-श्याम वर्ण हो उठा था अर्थात् स्वभावतः यमुना का श्यामल-सलिल, लाल-मणियों की आभा से मिल धूम्र वर्ण हो गया था । हे हंस ! तुम यमुना तटवर्त्ती कदम्ब वृक्ष की केशर से सुरभित उस कालिय-ह्रद के मधुर जल को अवश्य पान करना ॥२०॥

मुखोल्लास—दोहा

कालीदह जल पान करि, बाढ़ै ओज अपार ।
हंस कियौ या हेतु सों, तासु गुणन विस्तार ॥२०॥

मूल की भाषा पद्य [कुंडलिया छन्द]

पुनि पुनि क्रीड़ा नृत्य लखि उपज्यौ चित्त हुलास ।
या हित काली कों भयौ अहंकार आभास ॥
अहंकार आभास फणिन तें मणि गण निर्मल ।
गिरे धूम सम भयौ तबै कालीदह कौ जल ॥

कदम्ब वृक्ष के कुसुम केशरनि सों सुरभित सुनि।
पूर्व पुण्य तें मीठौ पानी पिञौ सु पुनि पुनि ॥२०॥

सारांश—सोरठा

करि मीठो जल पान काज हमारौ करहुगे।
तातें सपदि पयान हंस! मधुपुरी कों करौ ॥२०॥

००००

तृणावर्त्तारातेर्विरहदवसन्तापिततनोः
सदाभीरीवृन्दप्रणयबहुमानोन्नतिविदः।
प्रणेतव्यो नव्यस्तवकभरसम्वर्द्धितशुच–
स्त्वया वृन्दादेव्याः परमविनयाद्वन्दनविधिः ॥२१॥

टीका—तत्समीपे च वृन्दावनाधिष्ठात्री साक्षाद्वृन्दादेवी वर्त्तते, वृन्दावनसन्दर्शनफलभूमार्थं तस्या वन्दनं भवता कार्य्यमित्युपदिशति तृणावर्त्तेति। त्वया परमविनयात् वृन्दादेव्याः वन्दनविधिः प्रणेतव्य कर्त्तव्य इत्यर्थः। कीदृश्याः तृणावर्त्तारातेः श्रीकृष्णस्य यो विरहः स एव दावः वनाग्निः तेन सन्तापिता तनुर्यस्या एतेन भवद्गमनं तस्याप्युपकारकं यद्बहुमानं अतो देवकार्य्यार्थमपि भवता अवश्यं मधुपुरी गन्तव्येत्याशयः। पुनः कीदृश्याः सदा सर्व्वदा आभीरीवृन्दस्य गोपस्त्रीसमूहस्य प्रणयेन प्रेम्णा बहुबहुमानस्तस्य उन्नतिं वृद्धिं वेत्ति जानाति यद्वा प्रणयेन श्रीकृष्णकर्त्तृकं यद्बहुमानं सम्मानन तस्योन्नतिं वृद्धिं वेत्ति एतेन विरहविधुनानामस्माकं दर्शनेनापि तस्यास्ताप इत्युक्तम्। पुनः कीदृश्याः नव्यो नूतनो यस्तवकभारो गुच्छसमूहस्तेन सम्वर्द्धिता शुक् शोको यस्याः तद्दर्शनेन श्रीकृष्णस्मरणात् शोकः यद्वा आः श्रीकृष्णं विना वृथैवायं मदीयवनस्तवकसंभार इति शोकः। वने च वनवन्हौ च दवो दावः प्रकीर्त्तित इत्यमरः ॥२१॥

अनु०—श्रीकृष्णचन्द्र के विरहानल में जिसका शरीर संतप्त होगया है और जो गोपीगण के प्रेम निबन्धन, बहुमान एवं गर्व के कारण प्रेम की महिमा को जानने वाली है अथवा प्रणय एवं मान स्वरूप विरह के उत्कर्ष का ज्ञान रखती है तथा नवल-मञ्जरी उदय होने से जिसका शोक प्रदर्शित हो रहा है (श्रीकृष्णचन्द्र मथुरापुरी पधारे हैं, हाय ! अब कौन उसके मञ्जरी-पुष्प-पत्रादि धारण करेगा) इस प्रकार सेवा से वञ्चित हो जो अपने मनमें दुःखित हो रही है उस वृन्दा (तुलसी) देवी को तुम विनीत होकर प्रेम सहित अवश्य वन्दना करना ॥२१॥

भावरूप—दोहा

हंस ! मार्ग में देखियो औरहु रम्य स्थान ।
वृन्दा देवी के करहु दर्शन परम सुजान ॥२१॥

मूल की भाषा पद्य [छन्द घनाक्षरी]

तृणावर्त रिपु श्री कृष्ण महाराज विरह,
दावानल पाय जाकौ भयौ तातौ तन है ।
जानति है प्रीति और आदर की उन्नति सो,
जैसी मँद नन्द अति करी गोपी जन है ॥
नूतन प्रसूनन के गुच्छन की अधिकाइ,
देखत ही ताको अति दुखी होत मन है ।
ऐसी वृन्दादेवी ताहि बहु बिनती सों हंस !
नमस्कार करि वे कौ कीजिये जतन है ॥२१॥

सारांश—सोरठा

वृन्दा देवी नाम जानति गोपी कृष्ण हित ।
ताको करत प्रणाम हंस जाउ मथुरा पुरी ॥२१॥

इति क्रान्त्वा केकाकृतविरतिमेकादशवनीं
घनीभूतं चूतैर्व्रज मधुवनं द्वादशमिदम् ।
पुरी यस्मिन्नास्ते यदुकुलभुवां निर्म्मलयशो-
भराणां धाराभिर्धवलितधरित्रीपरिसरा ॥३२॥

टीका—अथ पुरप्रवेशमुपदिशति इतीति । इत्यनेन प्रकारेण एकादशवनीं क्रान्त्वा गत्वा इदं वक्ष्यमाणं द्वादशं द्वादशपूरणं मधुवनं व्रज याहि एतेन मधुवनस्यैव मथुरासंज्ञेति ज्ञायते । एकादशानां वनानां समाहारः एकादशवनी द्विगोरिति ई प्रत्ययः स्त्रियां, कीदृशीं केकाकृतविरतिं केका मयूरध्वनिः तया कृता उत्पादिता विशिष्टा रतिकारणं रमणं तस्यां यद्वा केकाभिः कृता विरति विरामो यत्र अयम्भावः तदानीं कृष्णदर्शन-मुरलिध्वनिभ्यां मेघागमनमाशङ्क्य सर्व्वदैव मयूराः ध्वनिमकुर्व्वन् । इदानीं तदभावात् केकानां विरामो यत्र, तथा च दशमे-गोविन्दवेणुमनुमत्तमयूरनृत्यं प्रेक्ष्याद्रिसान्व-परतान्यसमस्तसत्वम् ॥ (१०-२१-१०) विरतिमिति उकारवत् पाठे केकाभिः कृतशब्दां, किं तदा मधुवनं तदाह यस्मिन् मधुवने यदुकुलभुवां यदुकुलोत्पन्नानां पुरी आस्ते, किम्भूतानां निर्म्मलयशोभराणां अनुपमोज्ज्वलयशोभराणां पुरी कीदृशी धाराभि-र्धवलितधरित्रीपरिसरा धाराभिः कान्तिप्रवाहैः धवलीकृतो धरित्रीपरिसरो यया, मधुवनं कीदृक् चूतैराम्रवृक्षैर्घनीभूतं निबिडतरम् । केका वाणी मयूरस्येत्यमरः । मधु दैत्येनाधिष्ठितं वनं मधुवनम् । धारा सैन्याग्रिम-स्कन्द-सन्तत्योः पतनान्तरे । द्रव-द्रव्य-प्रपाते च तुरङ्गगतिपञ्चमे । खड्गादीनाञ्च निशिते मुखे धारा प्रकीर्त्तिता इति विश्वः । अत्र धारापदेन द्रव-द्रव्य-प्रपातवत् अति बहुलकान्तिश्रेणी प्रतीयते । द्वादशमिति पूरणे दशान्ताड्ड इति डित्वादनो लुक् । धवलितमिति नाम निष्पन्नत्वात् कर्म्मणि क्तः ॥३२॥

अनु०—इस तरह तुम मयूरों की ध्वनि से मुखरित एकादश वनों

ङ्घन करके आम्र-वृक्षावलि-परिपूर्ण बारहवें सघन-वन
र में प्राप्त होगे। इन बारहवन समूहों से घिरी हुई याद
नी मथुरा-नगरी विराजमान है, जिसकी धवल-की
से समस्त विश्व-ब्रह्माण्ड निर्मल हो रहा है। तात्पर्य यह
थुरापुरी में यादवों ने सभी ऐसे शुभ-कर्म किए हैं जि
विमल-कीर्ति विश्व में व्याप्त हो गई है ॥३२॥

भागरूप–दोहा

ये ग्यारह वन देखि कें, मधु वन जाओ हंस।
निरखि सफल दृग कीजिये, विहगन के अवतंस ॥३२॥

[मूल की भाषा पद्य-छन्द रोला]

इन ग्यारह वन बीच में मोर बोलत जिन माहीं।
उल्लङ्घन करि इनहिं सघन तरु आम लखाहीं॥
ता बारहवें मधुवन में सित धरनी दरसत।
यादवगण के यश सों तहाँ मधुपुरी सरसत॥३२॥

सारांश–सोरठा

ग्यारह वन विख्यात वृन्दा देवी लौं प्रकट।
मधुवन सघन लखात सो बारहवों जानिये ॥३२॥

◇◇◇◇

निकेतैराकीर्णा गिरिशगिरिडिम्भप्रतिभटै-
रनष्टम्भस्तम्भावलिविलसितैः पुष्पितवना।
निविष्टा कालिन्दीतटभुवि तवाधास्यति सखे
समन्तादानन्दं मधुरजलवृन्दा मधुपुरी॥३३॥

—मधुपुरीं दर्शयति निकेतैरिति। हे सखे मधुपुरी अर्थात् तवा
ास्यति। कीदृशी समन्तात् सर्वतः निकेतैः गृहैराकीर्णा व्या

कीदृशैर्गिरिशगिरिः कैलासः तस्य डिम्भाः अत्यल्पपर्वताः तेषां प्रति-भटैस्तुल्यैः पुनः सौधैरित्युक्तम् । पुनः कीदृशैः अवष्टम्भस्तम्भावलिरव-ष्टम्भस्तम्भश्रेणी तया विलसितैः मनोहरैः । सा कीदृशी समन्तादित्य-स्यात्रापि सम्बन्धः समन्तात् पुष्पितं वनं यस्यां सा पुनः कीदृशी कालिन्दीतटभुवि यमुनातीरभूमौ निविष्टा मिलिता पुनः कीदृशी सम-न्तान्मधुरं रसवत् स्वादु जलवृन्दं जलसमूहो यस्यां सा । अनेन निर्मलजलनिवासा इव तस्य तथाति प्रमोदहेतु र्भविष्यतीति ध्वनितम् । पुष्पितेति तारकादित्यादितः अवष्टम्य इति दुहादेराकृतिगणत्वमङ्गीकृत्य क प्रत्ययेन साधनीयम्,लक्ष्यदर्शनात् । अवष्टम्भस्तम्भावलिविलसितैरिति पाठस्तु अयत्नादेव एव स्तम्भेव वाह्याश्रयनिकटर्वैरिति यत्वं आश्रयणीया स्तम्भा इत्यर्थः । वेश्म-सद्म-निकेतनमित्यमरः । डिम्भोऽर्भकः स एव डिम्भप्रतिभटो व्याख्यात एव ॥२२॥

अनु०—हे सखे हंस ! श्रीमथुरापुरी कैलाश के सदृश अचल-स्तंभ-समूह-शोभित अनेक भव्य भवनों से विराजमान है । अर्थात् मथुरा में अनेक गगन-चुम्बी शुभ्र अट्टालिकाएं हैं उन्हें देख सहसा मनमें भान होगा कि ये छोटे २ कैलाश-पर्वतके शिखर हैं । वहाँ के समस्त वन पुष्प-किसलय परिशोभित तथा जल-मधुर एवं निर्मल है । श्रीयमुना तट निकटवर्ती मधुपुरी तुमको सर्व प्रकार से आनन्द-दायिनी होवै ॥२२॥

मुक्तोल्लास—दोहा

सुलभा सकल त्रिलोक की, निरखौ अमित अपार ।
हंस ! मधुपुरी जानिये सब पुरीन कौ सार ॥२३॥

मूल की भाषा पद्य—छन्द गीतिका

कैलाश के तौरन सरिस जहँ श्वेत आभा घरन की ।
तिन में सखे ! खंभान कंचन खचित छवि विस्तरन की ॥

वह बसी यमुना कूल, राजैं वाटिका फूलन भरी।
तहँ मधुर जन सोहैं, तुमहिं होगी सुखद सो मधुपुरी ॥३३॥

सारांश—सोरठा

श्वेत सदन दरसाहिं ऊँचे शिवगिरि टौर से।
कनक खम्भ जिन माहिं हंस लखौ सो मधुपुरी ॥३३॥

०००००

वृषः शम्भो यस्यां दशति न समेकत्र यवसं
विरिञ्चेरन्यस्मिन् गिलति कलहंसो बिसलताम्।
क्वचित् क्रौञ्चारातेः कवलयति केकी विषधरं
विलीढे शल्लक्या बलरिपुकरी पल्लवमितः ॥३४॥

टीका—सकलदेवसाङ्कर्यं भङ्ग्या कथयति वृष इति। यस्यां मधुपुर्यां शम्भोः शिवस्य वृष एकत्र एकस्मिन् कुत्रापि प्रदेशान्तरे यवसं कोमल-तृणं दशतीत्यस्यांपादनात् परिपूरितोदरतया भोक्तुमसमर्थोऽपि अति-रमणीयकोमलतृणानि केवलं लोभाकाङ्क्षति दंशत्येवेति गम्यते। अन्यस्मिन् स्थाने विरिञ्चेः ब्रह्मणः कलहंसो बिसलतां मृणालं गिलति भक्षयति, एतेन अतिकोमलस्वादुतया चर्वणापेक्षां विनापि गिलती-त्युक्तम्। क्वचित् क्रौञ्चारातेः कार्त्तिकेयस्य केकी मयूरः विषधरं सर्पं ग्रासीकरोति। इतः स्थानान्तरे बलरिपोः इन्द्रस्य ऐरावतः शल्लक्या पल्लवं विलीढे स्वादति। एतेन शिव-विरिञ्चि-कार्त्तिकेयेन्द्रवाहनानामवस्थानात् तेषामपि दर्शनं भवतोऽयत्नादेव भविष्यतीति अयत्नादेव तत्तीर्थमपि गन्त-व्यमित्युक्तम्। दशतीति दंश दंशने शाङ्गिणो लुक् लभेत्यादिना शाङ्गिणो लुक्, विलीढे इति लिह आस्वादने स्वरितत्वादात्मने पदम्। शल्लकी पशु-वृक्षयोरिति मेदिनी। गजप्रियो वृक्षविशेषः शल्लकी ॥३४॥

अनु०—इस मधुपुरी में कहीं पर तो श्रीशंकर का नन्दी-वृषभ

हरित-तृण चर रहा है और कहीं पर ब्रह्मा का बाहन हंस धवल मृणाल भक्षण कर रहा है एवं कहीं पर कार्तिकेय का बाहन-मयू सर्प का आहार करने में लगा है और किसी स्थान पर इन्द्र क ऐरावत अपनी प्रिय शल्लकी लता के पल्लवों का आहार क रहा है ॥३४॥

भागरूप-दोहा

हंस ! किये मथुरा गमन, बड़ो जानिये भाग।
जहँ दर्शन कों जात नित, सुरगण करि अनुराग ॥३४॥

मूल की भाषा पद्य—छन्द विष्णु पद

कहुँ तृण वृषभ शम्भु कौ चरत तहां भ्राजै।
पङ्कज नाल खात काहू थल बिधि मराल राजै॥
कार्तिकेय कौ मोर कतहुँ तहँ पन्नग ग्रास करै।
कतहुँ सालयीपत्र स्वादु सों इन्द्र मतंग चरै ॥३४॥

सारांश—सोरठा

निरखि सुरन के थान जानत सब देवागमन।
तातें करहु पयान हंस मधुपुरी कों तुरत ॥३४॥

००००

अबोधिष्ठाः कायान्नहि विघटितां प्रच्छदपटीं
विमुक्तामज्ञासीः पथि पथि न मुक्तावलिमपि।
अयि श्रीगोविन्दस्मरणमदिरामत्तहृदये
सतीति ख्यातिं ते हसति कुलटानां कुलमिदम्॥३५॥

टीका—पञ्चभिः श्लोकैः श्रीकृष्णस्य पुरप्रवेशे मथुरास्त्रीणां सम्भ्र वर्णयति अबोधिष्ठा इत्यादि। यस्यां मधुपुर्यां मुरारेः श्रीकृष्णस्य स्वै यथा स्यात् अभिनव प्रवेशे प्रथमप्रवेशसमये इत्यनेन प्रकारेण पथि पथि

नारीणां रतिरभसः जल्पाः कामरोगोजृम्भितशब्दाः बभविरे बभूविरे इत्यर्थः, पञ्चभिः श्लोकैरन्वयः। तामाह-न कायाद्‌ इति, अलिसम्भ्रमेण श्रीकृष्णावलोकनाय धावन्तीं सखीं वीक्ष्य काचिद् वदाह तद्वर्णयति हे सखि कायाद्विघटितां पतितां प्रच्छदपटीं आवरणनिचोलं न ऐक्षिष्ठाः पथि पथि विगलितां मुक्तावलिमपि नाज्ञासीः न ज्ञास्यसि। अयि कोमलानुमञ्जरो हे श्रीगोविन्दस्मरणमदिरामत्तहृदये श्रीगोविन्दस्य स्मरणं चिन्तनमेव मदिरा तया मत्तं ज्ञानरहितं हृदयं मनो यस्याः सम्बोधनमिदम्। कुलटाकुलं वारस्त्रीनिकरः ते तव सती साध्वीति ख्यातिं प्रसिद्धिं हसति उपहसतीत्यर्थः। अयमर्थः परपुरुषस्मरणशास्त्रेण ईदृक् मत्तचित्ततां सतीनामेवम्भूतामसम्भाव्य वृथैव सतीति ख्यातिरि-त्युपहसतीति। तथा च भरतः-'चलद्वारापि मातङ्गी कम्पिताङ्गी पदे पदे। त्यक्ता शंङ्का विसञ्जीरा कुलजापि च सा भवेति'॥ हसधातुरकर्म्मकोऽपि उपहासे सकर्म्मकः। यथाह-भविद्वयामपि शक्रमत्तु कामिति नैषधीये॥३४

अनु०—श्रीकृष्णचन्द्र ने जब प्रथम बार मधुपुरी-प्रवेश किया था तो वहाँ की सुन्दरी-गण उनका रूप-दर्शन कर एक अलौकिक प्रेमानन्द में मग्न हो गई थीं। कवि इन पाँच श्लोकों में उसी का वर्णन करता है—कोई पुर-वधू दूसरी को सम्बोधन करके कहने लगी 'अयि प्रिय सखि! श्रीकृष्णचन्द्र की स्मरण-रूप-मदिरा का पान कर तुम्हारा हृदय उन्मत्त होगया है, इसी कारण तुम्हें यह ज्ञान नहीं है कि मार्ग चलते हुए देह से तुम्हारा दुकूल स्खलित हो रहा है, कण्ठहार से मुक्ता-समूह मार्ग में बिखर रहे हैं इसका भी तुम्हें ज्ञान नहीं है? तुम्हारी पतिव्रताओं में ख्याति होने के कारण यहाँ का असती-समाज ऐसे आचरण देख कर तुम्हारा परिहास करेगा ॥३४॥   भाषारूप-दोहा

प्रथम गमन श्रीकृष्ण के, मथुरा पुरी मझार।
नारि परस्पर करि रहीं, वार्त्ता रस श्रृङ्गार ॥३४॥

सखी कौ बचन सखी सों-सोरठा

हास्य रसिक शिर मौर, सखी दूसरी सों कहत।
त्यागि तिरीछे त्यौर, लखत न कत निज तन दशा ॥
ताही कों अब हंस सों, ललिता पाय प्रसंग।
बरनत तिन नारीन को, प्रीति पुनीत अभंग ॥३५॥

मूल को भाषा पद्य-छन्द गीतिका

श्रीकृष्ण आगम श्रवण मदिरा तें भई तब देह की।
ता दशा कों अवलोकि कुलटा करत हाँसी नेह की ॥
जो सतीपन विख्यात तेरौ, आज सो मिथ्या भयौ।
उर उघरि अञ्चल,छूटि मुक्तालख तें मारग छयौ ॥३५

सारांश-सोरठा

हरि आगम सुनि कान तोहि न सुधि तन की रही।
का गति होय निदान कृष्ण समागम के भये ॥३५॥

[दूसरा अर्थ वैष्णव पक्ष में]

आगरूप-दोहा

सगुण रूप में ही रहत, केवल जिन की प्रीति।
तिन को निर्गुण माहिँ मन, लगत नाहिँ यह रीति ॥३

मूल की भाषा पद्य-छन्द गीतिका

शुभ चरित श्रीगोबिन्द मदिरा पान तें निज हिय भर्यौ।
यह सत्य ख्याति निहारि कें परिहास नास्तिक गन कर्यौ॥
शुचि प्रेम वश राखी न सुधि देहादि जग जस गाथ की।
तुम मुक्त पथ त्यागो सकल सुनि कथा श्री यदुनाथ की ॥

सारांश-सोरठा

करत भक्ति स्वीकार ब्रह्म ऐक्यता कों निदरि।
हरि जन चारु विचार जानत हैं या भेद कों ॥३५॥

००००

असव्यं बिभ्राणा पदमधृतलाक्षारसमसौ
प्रयाताऽहं मुग्धे विरम मम वेशैः किमधुना।
अमन्दादाशङ्के सखि पुरपुरन्ध्री-कलकला-
दलिन्दाग्रे वृन्दावन-कुसुमधन्वा विजयते ॥३६॥

टीका—काचित् सम्भ्रमवती स्त्री वेशं कुर्व्वतीं प्रसाधिकामाक्षिपतीति यदाह तद्वर्णयति असव्यमिति। अधृतलाक्षारसं अप्राप्तालक्तकरसं असव्यं दक्षिणपदं बिभ्राणा प्रयाता यास्यामि चलिताऽस्मीति वा। हे मुग्धे मूढ़े विरम वेशकरणान्निवर्त्तस्व। ननु अधृतवेशविन्यासा कथं बहिर्यास्यसि चेत्तत्राह अधुनेति अधुना मम वेशैः किं किं कार्य्यमित्यर्थः। ननु दूरे हरिः वर्त्तते किमिति सम्भ्रान्तासीति चेत्तत्राह हे सखि! अहमाशङ्के अमन्दात् अत्युच्चात् पुरन्ध्रीणां नगरस्त्रीणां यः कलकलः मङ्गलध्वनिः पुरपुरस्त्रीति पाठे पुरूणां बहूनां पुरस्त्रीणां यः कलकल इत्यर्थः। हं प्रश्ने-ऽङ्गीकृतौ रोषे इति प्रश्नः, वृन्दावनकुसुमधन्वा वृन्दावनगोचरकामदेवः विजयते, सर्व्वोत्कर्षेण वर्त्तते इत्यर्थः, यद्वा कामपि अप्राप्तलाक्षारस-दक्षिणपदां व्रजन्तीं स्त्रियं वीक्ष्य वेशकरणायोग्यतां प्रसाधिकामाक्षिपति हे मुग्धे असौ अधृतलाक्षारसं असव्यपादं बिभ्राणा सती प्रयाता। हं इति कोपाविष्कारे, अधुना श्रीकृष्णदर्शनसमये मम वेशैः किं अहमपि अकृत-वेशैव यास्यामि त्वं विरम वेशकरणान्निवर्त्तस्व इति पूर्वस्याद्ध स्यान्वयः। "मन्दाः स्मेराश्च रोगार्त्त मूढाभाग्यशनैश्चरा इत्यमरः" "प्रघाण-प्रघा-णालिन्दा बहिर्द्वार प्रकोष्ठके इत्यमरः"। कोलाहलः कलकल इति। हं 'प्रश्नेऽङ्गीकृतौ रोषे इति' विश्वः। वृन्दावनकुसुमधन्वा इत्यस्यायं भावः विभ्रमे सत्वे प्रधानेऽपि वृन्दावने यः सर्व्वेषां चित्तक्षोभकः सर्व्वनिरूप-मासीम-लावण्यधामत्वादतिमात्रयैव दृश्यते इति। विभ्रमनामालङ्कारः यदुक्तं-"त्वरया हर्षरागादेर्दयितागमनादिषु। अस्थाने भूषणादीनां वि-न्यासो विभ्रमो मतः" ॥३६॥

अनु०—श्रीकृष्णचन्द्र मथुरा-प्रवेश कर रहे हैं, इस समय निज वेश-रचना-परायण कोई पुर-वधू निज सखी से कहती है—अयि मुग्धे ! अब वेष-रचना का कोई प्रयोजन नहीं है। बस कर, आभूषणों को तो हम सदा ही धारण करती रहती हैं। किन्तु श्रीकृष्ण-चन्द्र का दर्शन परम-दुर्ल्लभ है। तुम नहीं समझती हो, मेरे दाहिने चरण में अलक्तक (महावर) नहीं लग सकने पर भी मैं तो जा रही हूँ। हे सखि ! सुन मथुरा-वासिनी पुर-सुन्दरियों का आनन्द-कोलाहल उच्च स्वर से सुनाई पड़ रहा है अतः मैं अनुमान करती हूँ कि वृन्दावन के मूर्तिमान् नव-कन्दर्प हमारे द्वार के सन्मुख आ पहोंचे हैं अब एक क्षण भी विलम्ब हो जाने से वे वहां से आगे पधारेंगे तो मुझको पुनः श्रीकृष्ण दर्शन नहीं हो सकेगा ॥२६॥

प्राग्रूप—दोहा

जानि निकट अवसर सुखद, आगम श्रीव्रजचन्द ।
कहत सखी सों सुन्दरी, पूरन परमानन्द ॥२६॥

मूल की भाषा पद्य—छन्द गीतिका

करि रहीं पुर की नारि मंगल रूप कोलाहल जहाँ ।
या हेतु जाने जात श्रीव्रजनाथ आये हैं तहाँ ॥
वे द्वार पर शोभित भये मैं जाउँ फल यह नेह को ।
हरि दरस जीवन सार जनि शृङ्गार करि या देह को ॥२६॥

सारांश—सोरठा

सखी ! दाहने पाय लगी न जावक रहन दे ।
नहिँ अब मोहि सुहाय महदी माँग सुगंध तन ॥२६॥

०००

अयं लीलापाङ्गस्नपितपुरवीथीपरिसरो
नवाशोकोत्तंसश्चलति पुरतः कंसविजयी ।
किमस्मानेतस्मान्मणि-भवनपृष्ठाद्विलुठती
त्वमेका स्तब्धाक्षि स्थगयसि गवाक्षावलिमपि ॥२७॥

टीका—सौधस्य गवाक्षसमीपं व्रजन्ती काचित् तत्रस्थया कयाचित् असाङ्कर्ष्यार्थ प्रतिक्षिप्ता सती सेयं यदाह तद्वर्णयति अयमिति । अय कंसविजयी पुरश्चलति अस्मात् तस्मान्मणिभवनपृष्ठाद्विलुठती प्रेरयन्ती त्वं हे स्तब्धाक्षि निश्चलाक्षि ! अपि सम्भावनायां किमित्याक्षेपे गवाक्षावलीं वातायनश्रेणीं स्थगयसि आवृणोसि । एकया सकलगवाक्षावरणमयुक्तमित्याक्षेप उचितः । अयं कीदृक् लीलापाङ्गस्नपितपुरवीथीपरिसर इति, लीलायुक्ताभ्यां अपाङ्गाभ्यां स्नपितोऽभिषिक्तः पुरस्य वीथीपरिसरो येन, लीलया नेत्रान्तरेण दर्शनसेकं स्थानं गौण्या अभिहितं तात्स्थ्यात्, परिसरपदेन परिसरस्थिताः लोका उच्यन्ते । यथाभिषेकेशाभिमूलः स्नानेनातिहृष्टो भवति तथा नेत्रान्तेन दृष्टापीति तात्पर्य्यम् । पुनः कीदृक् नवाशोकोत्तंसः अभिनवाशोककुसुमैर्धृतशेखरः । "अशोकस्य पुष्पं अशोकं वृक्षौषधिभ्यामंशे चेति टक् फलेऽप्यत्वादेरिति तस्या लुक् ।" 'स्थगयसीति स्थगे सम्वरणे ह्लादित्वात शतृ'। "लीलां विदुः केलि-विलास-हास-शृङ्गार-भाव-प्रभव-क्रियासु" इति विश्वः । "वीथी पंक्तौ गृहाग्रे च रूपकान्तर-वर्त्मनाविति" मेदिनी । 'पर्य्यन्तभूः परिसर इत्यमरः'। "उत्तंसः कर्णपूरे स्यात् शेखरे चावतंसवदिति" विश्वः ॥२७॥

अनु०—ये श्रीकृष्णचन्द्र अशोक-कुसुमों का कर्णभूषण धारण किए, लीला कटाक्षमय-अवलोकन से प्रेम-रस वर्षाते हुए मथुरा-नगर के राज-मार्ग को प्रेमार्द्र करते जा रहे हैं। तुम तो निर्निमेष हो श्रीकृष्ण का दर्शन कर रही हो अर्थात् एकटक होकर श्रीकृष्ण-दर्शन में आसक्त हो । हमको तो अपने मणि-भवन के ऊपर भाग

से दर्शन करने से रोकती हुई तुम एकाकिनी दर्शन-सुख का आस्वादन कर रही हो, इतना ही नहीं हम लोग श्रीकृष्ण का दर्शन न कर सकें इसके लिए हमारे झरोखों को भी बन्द किए देती हो। यह प्रणय-ईर्ष्या के कारण श्रीकृष्ण दर्शन में बाधा देने वाली पुर-वधूटी के प्रति अन्य किसी सुन्दरी का वचन-भङ्गी-क्रम से इस श्लोक में वर्णित है ॥३७॥

आगरूप-दोहा

सखी दूसरी सों कहत, ललना एक ललाम।
औरन दूर हटाय तू, लगी लखन घनश्याम ॥३७॥

मूल की भाषा पद्य-सवैया

जिन नैन निहारि कटाच्छन तें यह भूमि सबै छवि धाम करी।
नव फूल अशोक सुशोभित अंग चले पुर मारग कंस अरी ॥
तजि चालि अचंचल लोचन या मनि भौन झरोखन चाह भरी।
इकली निरखै सरकै न कहूँ छिन देत भट्ट अवकाश न री ॥३७॥

सारांश-सोरठा

चखनि टक टकी टारि औरन हूँ कों लखन दै।
ठाढ़ीं ये पुर नारि किये लालसा दरस की ॥३७॥

००००

मुहुः शून्यां दृष्टिं वहसि रहसि ध्यायसि परं
शृणोषि प्रत्यक्षं न परिजन-विज्ञापनशतम्।
ततः शङ्के पङ्केरुहमुखि ययौ श्यामलरुचिः
स यूनामुत्तंसस्तव नयनवीथीपथिकताम् ॥३८॥

टीका—श्रीकृष्णं दृष्ट्वा दूरान्तरिते तस्मिन् ध्यायन्तीं कामपि सखी प्राह हे पङ्केरुहमुखि पद्मवक्त्रे अतोऽहं शङ्के स श्यामलरुचिः श्रीकृष्णस्तव नयनवीथ्यां गृहाग्रवर्त्ती-मार्गे अति-विस्तारशालित्वात् तत्र पथिकतां

दर्शनविषयमिति यावत् । स कः यः यूनां तरुणानां उत्तंसः शेखरः श्रेष्ठ इति यावत् । तत्र लिङ्गमाह–मुहुः पुनः पुनः शून्यां दृष्टिं वहसि धारयसि निष्फलत्वात् शून्यत्वं वहसि एकान्ते परं केवलं ध्यायसि चिन्तयसि ध्याने लिङ्गं प्रत्यक्षं, परिजनानां ज्ञापनशतं विज्ञापनाः न शृणोषि यतः तादृक् लीलाविलासानुपमलावण्यधामावलोकनं विना एतत् सर्व्वमसम्भावितमतः तव नयनपथिकतां यत्याचित्याशङ्का ॥२८॥

अनु०—हे कमलनयने ! तुम बार-बार लक्ष्य-हीन दृष्टिपात करती हो, निर्जन-स्थान में जाकर किसी का ध्यान करने लगती हो, प्रत्यक्ष भाव से तुम्हारी सखिगण जो २ प्रार्थना करती हैं उसे नहीं सुनती हो । इन कारणों से अनुमान होता है कि वह नव-युवक मुकुट-मणि, श्यामल तनु श्रीकृष्णचन्द्र तुम्हारे नयन-पथ का पथिक हो चुका है । निर्जन में ध्यान करना, अपनी सखियों के वचन न सुनना आदि श्रीकृष्ण दर्शन के अनुभाव हैं ॥२८॥

प्रागरूप-दोहा

कहत दूसरी सखी सों, चतुर अंगना एक ।
भोरी कहा निहारती, थल थल पल प्रत्येक ॥२८॥

मूल की भाषा पद्य–छप्पय

ए अलि ! सूने ठौर ध्यान करि इत उत हेरत ।
सुनत न सौ सौ बेर प्रकट ये सखिजन टेरत ॥
कंज मुखी या हेतु होत शङ्का उर मेरे ।
युवजन के शिर मौर श्यामसुन्दर कहुँ तेरे ॥
भये पथिक पथ दृगन के विरसे तव अन्तः करन ।
झलकत झाँकी की झमक दमक गात गोरे बरन ॥२८॥

सारांश–सोरठा

दासी सौ सौ बेरि टेरत ताहि न सुनत कछु ।
धरत ध्यान मुख फेरि सोचति लोचन मूंदि कै ॥२८॥

विलज्जं मा रोदीरिह सखि पुनर्यास्यति हरि-
स्तवाऽपाङ्गक्रीडा-निबिडपरिचर्य्याग्रहिलताम् ।
इति स्वैरं यस्यां पथि पथि मुरारेरभिनव-
प्रवेशे नारीणां रति-रभसजल्पा ववलिरे ।।३६।।
(पंचभिःकुलकं)

टीका--कामप्यतिशयहरिविरहोत्कण्ठितां रुदतीं सखीं प्राह इति वर्ण-यति विलज्जमिति । हे सखि ! विलज्जं यथा स्यात्तथा मा रोदीः रोदनं मा कुरु यत इह अस्मिन् वर्त्मनि हरिः श्रीकृष्णः तवापाङ्गक्रीडानिबिड-परिचर्य्याग्रहिलतां यास्यति, तवापाङ्गयो र्या क्रीडावलोकनं सैव निबिडा-तिशयिनी परिचर्य्या पूजा तस्या ग्रहिलतां ग्राहकत्वम् ।"मन्दस्वच्छन्दयोः स्वैरम्" ।।३६।। (कुलकं)

अनु०--कोई पुर-वधू , श्रीकृष्ण दर्शन में विफल-मनोरथ हुई किसी अन्य सुन्दरी से बोली--सखि ! निर्लज्ज हो रोदन मत करो, श्री-कृष्णचन्द्र फिर भी तुम्हारे नयनाञ्चल की लीला-विलासमयी-सेवा को ग्रहण करने का आग्रह करेंगे अर्थात् इसी मथुरा-पुरी में तुम्हारे प्रति प्रेम-प्रदर्शन करेंगे । श्रीकृष्णचन्द्र के प्रथम-मथुरा-प्रवेश के अवसर पर महिला-गण में स्वच्छन्द भाव से इस प्रकार परस्पर प्रेममय-आलाप हुआ था ।।३६।।

प्राग्रूप--दोहा

वार्ता कृष्ण मिलाप की, कहीं सखी सों बाल ।
तिन कों ललिता हंस सों, वरनन करत रसाल ।।३६।।

मूल की भाषा पद्य--सवैया माधवी

तजि लाज करै मत रोदन तू मिलि हैं हरि फेर सखी अब ही ।
यह चंचलता तव नैननि की शुचि सेवन तासु लता उलही ।।

यदि भाव परस्पर नारिन तें सब भूमि कुतूहल छाय रही।
गवने हरिजू अपनी रुचि सों मथुरा वहु मोद भरी उमही ॥३६॥

सारांश—सोरठा

कृष्ण स्वतन्त्र स्वभाव प्रथम पधारे मधुपुरी।
राग स्थायी भाव बाढ्यौ पुर नारीन में ॥३६॥

००००

सखे साक्षाद्दामोदर-वदन-चन्द्रावकलन-
स्फुरत्-प्रेमानन्द-प्रकरलहरीचुम्बितधियः।
मुहुस्तत्राभीरी-समुदयशिरोन्यस्तविपद्-
स्तवाक्ष्णोरामोदं विदधति पुरा पौरवनिताः ॥४०॥

टीका—तत्र स्वच्छन्दपुरवनितावलोकनेन तव सुखातिशयो भविष्यतीति आह सखे इति। तत्र मधुपुर्य्यां पौरवनिता तवाक्ष्णोरामोदं हर्षं पुरा मुहुः वारं वारं विदधति करिष्यन्ति पुरा शब्दयोगे भविष्यति पुराद्यै-रिति भाविनि लमट्। कीदृश्यः साक्षात् प्रत्यक्षं दामोदरवदनचन्द्रस्य यत् अवकलनं अवलोकनं तेन स्फुरन्ती या प्रेमानन्दप्रकरस्य लहरी-स्तरङ्गस्तया चुम्बिता व्याप्ता धीर्यासां ताः, सततं साक्षात् दामोदरवद-नचन्द्रदर्शनेन परमानन्दाप्लुतहृदयाः, पुनः कीदृश्यः आभीरीणां गोपीनां समुदयस्य समूहस्य शिरसि न्यस्ता विपत् विपत्ति र्याभिः, पुरा श्री-कृष्णरूप-गुणादिश्रवणे तासां उत्कण्ठारूपा या विपदासीत् तामस्माकं शिरसि विन्यस्य स्वयं सुखिन्य इत्यर्थः। आनन्दमिति वा पाठः ॥४०॥

अनु०—हे सखे! मथुरापुरी में प्रत्यक्ष-रूप से श्रीकृष्ण मुख-चन्द्र दर्शन करके पुर-वनितागण के मन में असीम आनन्द-तरंग उद्-वेलित हो उठी। गोपी-गण के मस्तक पर दुःख-भार अर्पण कर वे सुख से काल-यापन कर रही हैं। उनका दर्शन करने से तुम्हारे नयनों को आनन्द प्राप्त होगा। तात्पर्य यह है कि वे इस समय

श्रीकृष्ण को पाकर सौभाग्यवती हो चुकी हैं अतः उनका दर्शन कर तुम भी आनन्दानुभव करोगे ॥४०॥

मुखोल्लास-दोहा

जाते नहिँ मथुरा पुरी, जो हरि ब्रज कों त्यागि।
तौ जरावती कौन बिधि, गोपिन तन बिरहागि ॥४०॥

मूल की भाषा पद्य-छन्द अवङ्गम

सखे ! पुरस्त्रीजन कों तहां निहारि कै,
मानहुँगे आनन्द मोद उर धारि कै।
दामोदर मुख चन्द्र दरस तिन कों भयौ,
तातें उठी तरङ्ग-सुरस अतुल छयौ ॥
ता रस चुंबित अन्तः करण प्रमाद सों,
तिनहिँ देखिये जाय हंस ! अति चाव सों ।
जिन गोपिन शिर विपति भार राखी धुरी,
देखौ उन अबलान जाय तुम मधुपुरी ॥४०॥

सारांश-सोरठा

हंस ! मधुपुरी माहिँ नारीगण कों देखि कें।
या में संशय नाहिँ होगी तुम्हें प्रसन्नता ॥४०॥

००००

अथ क्रामं क्रामं क्रमघटनया संकटतरान्
निवासान् वृष्णीनामनुसर पुरीमध्यविशिखाम् ।
मुरारातेर्यत्र स्थगित-गगनाभिर्विजयते
पताकाभिः संतर्पितभुवनमन्तःपुरवरम् ॥४१॥

टीका—अथ श्रीकृष्णपुरप्रवेशमुपदिशति अथेति । अथ अनन्तरं तत्र मुरारातेः विजयते तत् अन्तःपुरवरं अनुसर याहि किं कुर्वन् क्रमघटना चेष्टा अन्वेषणं तया वृष्णीनां निवासान् क्रामं क्रामं क्रान्त्वा क्रान्त्वा अतिक्रम्य,

कीदृशान् संकटतरान् घनीभूतान् दुर्गम्यान् वा, पुनः कीदृशान् पुरीमध्यविशिखान् पुरीमध्यविशिष्टा चूडा येषां मणिरत्नादिघटितशिखानित्यर्थः। कीदृशं अन्तःपुरं पताकादिभिरुपलक्षितं कीदृशीभिः स्थगितगगनाभिः आवृताकाशादिभिः पुनः कीदृशं सन्तर्पितभुवनं सन्तर्पितानि असुरवधेन निष्कण्टकीकृतत्वात् भुवनानि येन तत्। शिखा "शिखायां चूडायां ज्वालायामग्रमात्रके" इति विश्वः। "पताका वैजयन्ती च सौभाग्य-नाटकाङ्कयोरिति" मेदिनी। "संकटं ना तु सम्बाध इत्यमरः"। क्रामं क्राममिति अभीक्ष्णे क्त्वा स्थाने णमुट् द्विरुक्तिः, विशिखामिति पाठे वृष्णीणां निवासान् क्रामं क्रामं पुरीमध्ये विशिखां प्रतोलीं अनुसर तमेवाह मुरारातेरन्तः पुरवरं विजयत इति सम्बन्धः। एतत् पक्षे मुरारातेरिति षष्ठ्यन्तत्वम्। "रथ्या-प्रतोली-विशिखे" इत्यमरः ॥४१॥

अनु०—इसके पश्चात् मथुरा-पुरी में जहां क्रमानुसार यादवों के प्रधान-द्वार, तोरणादि युक्त सघन-सुचारु बसे हुए सुन्दर-भवन विराजमान हैं, उन सबको उल्लङ्घन करते हुए तुम श्रीकृष्णचन्द्र के श्रेष्ठ अन्त-पुर अर्थात् निज-भवन में प्रवेश करना। वहां के भवनों की विचित्र पताकाओं से आकाश भी आच्छादित होरहा है। यह अन्तःपुर अपने सौन्दर्य एवं ऐश्वर्य द्वारा सकल विश्व को आप्यायित कर रहा है ॥४१॥

प्रागल्भ्य—दोहा

हंस ! पुरी कों देखि पुनि, निरखि कृष्ण के भौन।
सम्प्रति लीजै जन्म फल, कीजै मथुरा गौन ॥४१॥

मूल की भाषा पद्य—कुंडलिया

क्रम तें मथुरा जाय के लखौ पुरी छवि धाम।
जहां सकल यादवन के गृह निवास अभिराम॥
गृह निवास अभिराम गली मग रुचिर विशद वर।
मध्य तासु के कृष्ण भवन रमणीय अधिकतर॥

ता पर बहु विधि ध्वजा पताका लगीं मनोरम।
सब सद्मन तें श्रेय निरखियो हंस यथा क्रम ॥४१॥

सारांश—सोरठा

लखिये मथुरा जाय, हंस! सदन यादवन के।
ध्वजा पताका पाय, सोहत ऊँचो हरि भवन ॥४१॥

◇◇◇◇

यदुत्सङ्गे तुङ्गस्फटिकरचिताः सन्ति परितो
मरालाः माणिक्यप्रकरघटितत्रोटिचरणाः।
सुहृद्बुद्ध्या हंसाः कलित-मधुरस्याम्बुजभुवः
समर्य्यादाः येषां सपदि परिचर्य्यां विदधति॥४२॥

टीका—अन्तःपुरं वर्णयति-यदुत्सङ्गे इति। एतदादिश्लोकत्रये यत्पदानां तदन्तःपुरवरमित्यनेन सम्बन्धः। यदुत्सङ्गे यस्यान्तःपुरस्य उत्सङ्गे क्रोडे सर्व्वतः तुङ्गस्फटिकरचिता उत्तमस्फटिकनिर्म्मिताः मरालाः राजहंसाः सन्ति गौण्यावृत्त्या तुङ्गशब्दः श्रेष्ठेऽत्र, कीदृशाः माणिक्येति माणिक्यप्रकरेण पद्मरागमणिनिकरेण घटितं निर्म्मितं त्रोटिचरणं येषां ते राजहंससादृश्याय विशेषणम्। तथाचामरः—"राजहंसास्तु ते चञ्चुचरणैः लोहितैः सिताः"। त्रोटश्च चञ्चुश्च चरणौ च त्रोटिचरणम्। हंसाः सुहृद्बुद्ध्या समर्य्यादा सन्तः सपदि येषां कृत्रिमहंसानां सपर्य्यां पूजां विदधति कुर्व्वन्ति, कीदृशाः कलितेति मधुना रम्याणि मधुरम्याणि च तानि अम्बुजानि चेति तेषां तु भूमिः कारणं मृणालमित्यर्थः। कलिता धृता उपढौकिता इति यावत् मधुरस्याम्बुजभुवो यैः सुहृदो मत्वा उत्तोलितमृणालानि तेभ्य उपढौकनी कुर्व्वन्तीत्यर्थः। मधुरम्यत्वेन सद्य उत्तोलनं सूचितम्। यद्वा सपदि दर्शनक्षण एव कलिता धातूनामनेकार्थत्वात् परित्यक्ता मधुरम्या अम्बुजभूमिः पद्मानां भूमिः पद्मषण्ड-

स्थानं चैस्तैः गलदमन्दमकरन्दं मनोहरपद्मखण्डमपि त्यक्त्वा तेषां पद्मनालसहिता एव सपर्य्यां कुर्व्वन्तीत्यर्थः ॥४२॥

अनु०—उस मधु-पुरी के अन्तःपुरस्थ गृह-शिखर पर स्फटिक-मणि निर्मित बहुत से विशाल-हंस बने हुए हैं जिनके चोंच तथा चरण माणिक्य-मण्डित हैं, ब्रह्मा जब-जब उस जगह श्रीकृष्ण-दर्शनार्थ आगमन करते हैं, तब उनका हंस, उन्हें अपने सजातीय-बन्धु जानकर शिष्टाचारानुरूप उन स्फटिक-निर्मित कृत्रिम हंसों के प्रति-सम्मान प्रदर्शन पूर्वक अभ्यर्थना किया करता है ॥४२॥

प्रागरूप-दोहा

ता मथुरा में और हू, अचरज लखौ मराल।
सोहत हरि के भवन पर, कृत्रिम हंस विशाल ॥४२॥

मूल की भाषा पद्य-छन्द गीतिका

उच्च स्फटिकमय हंस जिनके चोंच चरण सुहावने।
मणि माणिकन सों बने सो हरि भवन पै बैठे घने ॥
श्रीकृष्ण सों आवत मिलन चतुरास्य जब मथुरा पुरी।
विधियान जानि सजीव तिन कों सेवते सहचातुरी ॥४२॥

सारांश—सोरठा

नहिँ मानत निर्जीव अन्य भाव जिन कें न कछु।
सेवा करत अतीव सरल चित्त विधियान वे ॥४२॥

००००

चिरान्मृग्यन्तीभिः पशुपरमणीनामपि कुलै-
रलब्धं कालिन्दीपुलिनविपने लीनमभितः।
मदालोकोल्लासिस्मितपरिचिताऽस्यं सहचरि
स्फुरन्तं वीक्षिष्ये पुनरपि किमग्रे मुरभिदम् ॥४३॥

टीका—व्रजे राधायाः सख्या समं विरहव्याकुलाया यत् कथोपकथन-

मभूत् तत् श्रुत्वा राधया प्रेषितेन शुकमिथुनेनाभ्यस्तम् । तच्छुक-मिथुनं हरये उद्धवकरे राधया प्रेरितं मथुरायां श्रीहरिपुरे यत् पठति तत् कथयति द्वाभ्यां चिरादिति । यस्यां पुर्यां आभीरीवृन्दैः गोपीसमूहैरिन्द्रानुजकृते श्रीकृष्णार्थं उद्धवकरे यत् शुकमिथुनेनाभ्यस्तं तच्छुकमिथुनं हरये उद्धवकरे राधया प्रेरितं मिथुनं शुकद्वन्द्वं उपहृतं उपकौकितमभूत्, तत् शुकमिथुनं इति ब्रूते परस्परं कथयतीति द्वितीयेणान्वयःइति । किं हे सहचरि अग्रे स्फुरन्तं देदीप्यमानमपि सम्भावनायां मुरभिदं श्रीकृष्णं पुनः कि प्रेक्षिष्ये द्रक्ष्यामि । राधाया वचनमेतत् । कालिन्दीपुलिनविपिने यमुनातटस्थवने लीनं विश्लिष्टं कौतुकेन तिरोभूय स्थितं, रासलीलायां वा, पुनः कीदृशं अभितः सर्व्वतश्चिरात् चिरकालं व्याप्य मृगयन्तीनां अन्वेषणं कुर्व्वन्तीनां पशुपरमणीनां गोपीनां कुलैरलब्धं अप्राप्तम्, यद्वा अभितः समीप एव लीनमिति सम्बन्धः । अयमर्थः य इहैव लीनश्चिरमन्विष्यन् प्राप्यते सोऽतिदूरवर्त्ती पुनः किं द्रष्टव्य इति संभाव्य तेनैवेति । किम्भूतं मदालोकन उल्लासि अत्युल्लासेन शीलं यत् स्मितं तेन परिमितं युक्तमास्यं यस्य तं, यद्वा मदालोकनोल्लासयुक्तं स्मितं पूरितमास्यं यस्य तं, परिचितशब्देन गौण्यावृत्त्या युक्तमुच्यते । 'समीपोभयतः शीघ्र-साकल्याभिमुखेऽभित'इत्यमरः ।'गर्हा समुच्चय-प्रश्न शंका-सम्भावनास्वपीति' च । 'किं प्रश्ने च कुत्सायामिति' विश्वः । दिवादौ मृग-अन्वेषणे परस्मैपदीति मनोरमा ॥४३॥

अनु०—श्रीराधिका कहती थीं कि हे प्रिय-सहचरि ! जो श्यामसुन्दर स्वयं यमुना-पुलिन कुंज-कानन में छिपे हुए थे और ब्रज-ललना समूह जिनको बहुत काल से अन्वेषण करने पर भी नहीं पा सका था एवं हमको देखकर जिनके मंजु मुख पर उल्लास सहित मृदु-मधुर हास्य रेखा बार २ उदय हो उठती है उन श्रीकृष्णचन्द्र को हमारे ये नयन क्या फिर भी अपने सम्मुख दर्शन पाकर कृतार्थ हो सकेंगे ? ॥४३॥

भाग्रूप–दोहा

भूत काल संकेत के, हरि चरित्र सत भाय।
हंसहि तोती के वचन, ललिता रही सुनाय ॥४३॥

मूल की भाषा पद्य–छन्द गीतिका

जहँ गोपनारी वृन्द खोजत फिरीँ सब बहु काल सों।
नहिँ मिले कालिन्दी पुलिन, सो देखते तिन बाल कों॥
मुख मन्द हाँसी सों प्रकाशित रहे विपिन लुकाय के।
निश्चय मिलेंगे हे सखी! हरि फेरि तो सों आय के ॥४३॥

सारांश–सोरठा

कालिन्दी के कूल, खोजत मिले न हरि तहां।
सो सब बिधि अनुकूल सखि! अब दर्शन देहिँगे ॥४३॥

◇◇◇◇

बिषादं माकार्षी द्रुतमवितथव्याहृतिरसौ
समागन्ता राधे धृतनवशिखंडस्तव सखा।
इति ब्रूते यस्मिन् शुकमिथुनमिन्द्रानुजकृते
यदाभीरीवृन्दैरुपहृतमभूदुद्धव-करे ॥४४॥ (युग्मकं)

ीका——सख्या: प्रबोधवचनं यत् श्रुतं तत् पठतीति कथयति विषाद-
मति श्रद्धमधिगतार्थम्। हे सखि राधे विषादं माकार्षीः मा कुरु असौ
व सखा श्रीकृष्ण: द्रुतं समागन्ता समागमिष्यति। ननु आगमने
े हेतुस्तत्राह अवितथव्याहृति यतः अवितथा सत्या व्याहृतिः कथा
स्य स गमनसमये सान्त्वयामास सप्रेमैवायास्य इति दौत्यकैरिति
ायास्ये इत्यङ्गीकारात्। तथा चोक्तं–ईश्वराणां वचः सत्यमिति। स
ोदृक् धृतनवशिखण्डं धृतोऽवतंसीकृतो नवशिखण्डो मयूरपिच्छं येन

नः । 'वितथं त्वनृतं वचः' इत्यमरः । 'व्याहृतिरुक्तिर्लपितमिति' च । 'शिखण्डौ बर्हचूडयोरिति' मेदिनी । 'नवं नव्ये पुमान् स्तुतौ च' ॥४४॥

अनु०—यह सुन कर कोई एक श्रीराधिकाजी की प्रिय-सखी बोल उठी थी कि—'हे राधिके ! तुम वृथा सोच मत करो क्योंकि हमारे प्यारे श्रीकृष्णचन्द्र सत्यवादी हैं । वे पुनः वृन्दावन आकर दर्शन देने की हमसे प्रतिज्ञा कर ही चुके हैं । मथुरा पधारते समय हम लोगों की दयनीय दशा देखकर उन्होंने कई बार अपना दूत भेज-भेज कर उस अपने आगमन की प्रतिज्ञा को हमसे कहला भेजा था, अतएव तुम विश्वास रक्खो कि उनका वचन कदापि मिथ्या नहीं होगा और नवल-मयूर-चन्द्रिकाओं से सुशोभित वह तुम्हारे प्रियतम सखा श्रीकृष्णचन्द्र शीघ्र ही यहां आगमन करेंगे ।' श्री-उद्धव जब वृन्दावन आये थे तब गोप-सुन्दरियों ने उनके हाथों में श्रीकृष्णचन्द्र के पास दो शुकपक्षी भेजे थे, वे दोनों मथुरा नगरी की गली-गली में सबको यही बोली सुनाते थे । हे हंस ! जब तुम उस स्थान पर पहोंचेगे तब उन पक्षियों की वाणी अवश्य ही सुन आओगे, यही श्रीललिताजी के कथन का तात्पर्य है ॥४४॥

भावरूप—दोहा

शुक ने राधा सों कहे, हितकारी जो बैन ।
तिन कौं ललिता हंस सों, बरनत मन सुख दैन ॥४४॥

मूल की भाषा पद्य—कुंडलिया

तोता राधा सों कहत जनि जिय करहु विषाद ।
मोर पच्छ नव मुकुट धर सत्य शील मर्याद ॥
सत्य शील मर्याद नन्द नन्दन तुम प्यारे ।
वेगि देहिंगे दरस सदा गोपिन दृग तारे ॥
व्रज वनिता मिलि भेज्यौ उद्धव सँग हित श्रोता ।
मथुरा हरि के निकट मिथुन यह बोली तोता ॥४४॥

सारांश—सोरठा

जनि मन करहु मलीन करि राधिका सों कह्यौ।
साँचे सखी प्रवीन वेगि दैहिँगे दरस हरि ॥४४॥

परसों आने के विषय में भाषा के एक प्राचीन कवि ने यह सवैया कहा है:—

परसों परसों कहि लाल गये अटके कहुँ जाय बिती परसों।
इत नेह की नाव कुवाट लगी उत मेह कहै बरसों बरसों॥
मन ही मन सुन्दर सोच करै अपनो नहिँ दुःख कहै परसों।
जिय चाहत है उड़ि जाउँ सखी सु उड़्यौ नहिँ जाय बिना परसों४:

००००

घनश्यामा भ्राम्यत्युपरि हरिहर्म्यस्य शिखिभिः
कृतस्तोत्रा मुग्धैरगुरुजनिता धूमलहरी।
तदालोकाद्धीर स्फुरति तव चेन्मानसरुचि-
र्जितं तर्हि स्वैरं जडसहनिवासप्रियतया ॥४५॥

टीका—तत्र हरिहर्म्योपरि स्थिरतरं धूमपटलमवलोक्य मेघबुद्ध्या मानसगमनेच्छाकर्षीरित्याह घनश्यामा इति। हरिहर्म्यस्य श्रीकृष्णाधिष्ठितसौधस्य उपरि घनश्यामा सजलजलदनीला अगुरुजनिता कालागुरुदाहनिष्पादिता धूमलहरी धूमपटली शाम्यति स्थीरीभूय सदा तिष्ठति, शमुधातोरत्रावस्थानार्थता धातूनामनेकार्थत्वात्। भ्राम्यतीति पाठे मण्डलीभूय भ्रमतीत्यर्थः। कीदृशी मुग्धैः अथ च मूढैः मेघधूमयोरनिश्चयात्,शिखिभिः मयूरैः कृतस्तोत्रा कृतं स्तोत्रं यस्याः सा,अतिबहुलधूमं दृष्ट्वा मेघबुद्ध्या माद्यन्तः शिखिनो रुदन्तीति शब्द एव स्तुतिरत्रेत्यर्थः। एतेनाजस्रागुरुधूमभूमा सूचितः। हे धीर! सारासारविवेचकचतुर तदालोकात् तस्याः धूमलहर्य्याः दर्शनात् चेत् यदि तव मानसरुचिः घनागमनकालमाशङ्क्य मानसरोवरगमनेच्छा स्फुरति आविर्भवति तर्हि तद्

जडसहनिवासप्रियतया जडैः सह एकवासप्रियत्वेन स्वैरं स्वच्छन्दं अबाधं यथा स्यात्तथा जितं सर्वोत्कर्षेण स्थितमित्यर्थः। जडैः सह वासः प्रियः यस्य तस्य भावः तया। अयम्भावः-राजहंसादि आसन्नवर्षाकाले जलाभावलम्बिनं मेघमालोक्य वज्रपातभिया पलाय्य मानसरोवरं यान्ति इति प्रसिद्धिः। अन्यदपि तादृग् बहुलधूमपटलमालोक्य धीरोऽपि भवान् विशेषमनाकलय्य यदि मानस्याः मनोन्मुखः स्यात् तदा सकलजनव्यापकतया जडतया उत्कर्ष एवेति जडैः सह निवासनिरतो जड एव भवतीति ध्वनितम्। अथ च 'डोलोयानश्च जड' इति नाद्यं जन सहनिवास प्रियतयेति-स्वाभाविकोऽर्थः। हंसानां सदा जलवासित्वात् तत्र शब्दः व्याजः। "मुग्ध सुन्दरमुखयोरित्यमरः" "जडो मूर्खे हिमग्रस्ते च शूकशिम्बी जडा मतेति विश्वः" ॥४१॥

अनु०—हे धीर हंस! श्रीकृष्णचन्द्र के राज-भवन के ऊपर घन-घटा के समान, कस्तूरी, अगर, चन्दनादि की श्यामल वर्ण, धूम-रेखा उठती रहती है। वहां निवास करने वाला मयूर-वृन्द अपने मनमें उसे मेघ-माला समझ कर आनन्दित हो मधुर केका में स्तुति वचन कहता रहता है। अतः श्रीकृष्णचन्द्र के उस समस्त राज-वैभव को देखने की अभिलाषा तुम्हारे मनमें अवश्य ही उत्पन्न होगी और ऐसा होने पर विविध लोकाकीर्ण उस विशाल नगर में निवास करने रूप तुम्हारे प्रेम की विजय होगी अर्थात् ऐसी जन-संकुल,चहल-पहल वाली राजधानी में रहने की तुम्हारी इच्छा अवश्य ही बलवती हो उठेगी। श्लेषार्थ-यदि तुम्हारी मानसरोवर जाने की इच्छा होगी तो बड़ा अनुचित होगा (इस पद्य में भ्रान्तिअलङ्कार है) ॥४५॥

भाषारूप-दोहा

हंस ज्ञान-चित सर्वदा, राखि काल अरु देश।
तब कहियो श्रीकृष्ण सों, मथुरा जाय सँदेश ॥४५॥

मूल की भाषा पद्य—छप्पय

अगर धूम को घटा प्रेम की जानि मोर गन।
करन लगत हैं नृत्य ताहि लखि ह्वै प्रमुदित मन ॥
तुम जनि भूलहु देखि ताहि जिय जानि वारिधर।
निज गृह की सुधि करहु चित्त रति आनि मानसर ॥
उन अज्ञानिन को संग लहि करि निवास तिन के निकट।
निज इच्छा सों फँसिये न तहँ मोह जाल तिन के विकट ॥४५॥

सारांश—सोरठा

धूम अगर को देखि कृष्ण भवन पै मेघ सम।
बर्षा ऋतु चित लेखि बिनु हरि मिलैं न घर फिरौ ॥४५॥

००००

ततो मध्ये कक्षं प्रति-नवगवाक्षस्तवकितं,
चलन्मुक्तालम्बस्फुरितममलस्तम्भनिवहम् ।
भवान् द्रष्टा हेमोल्लिखितदशमस्कन्धचरितै-
र्लसद्भित्तिप्रान्तं मुरविजयिनः केलिनिलयम् ॥४६॥

टीका—हरेः केलिनिलयदर्शनं तदनन्तरं भविष्यतीत्याह तत इति। ततस्तदनन्तरं भवान् मध्ये मुरविजयिनः श्रीकृष्णस्य केलिनिलयं क्रीडा-मन्दिरं द्रष्टा द्रक्ष्यति लुट् तान्, कीदृशं प्रतिनवगवाक्षं अतिमनोहर-गवाक्षं प्रति स्तवको मुक्तादिरचितगुच्छा तद्युक्तं मत्वर्थे इन्। यद्वा स्तवकी-कृत्या निर्म्मितत्वात् गवाक्ष एव स्तबकाः प्रतिनवा अतिमनोहरा गवाक्षस्तवका यस्य सन्ति इति प्रशंसायां भूम्नि वा कर्म्मधारयादपि मत्वर्थीय इन्। पुनः कीदृशं चलन्तो ये मुक्ता लम्बामालाकारप्राप्ता मुक्तायष्टयः तैः स्फुरितं अतिशयशोभमानं, पुनः कीदृशं अमला स्फटि-कमया स्तम्भनिवहाः यत्र, पुनः कीदृशं हेमेति-हेम्ना काञ्चनेन उल्लिखि-

तानि चित्रीकृतानि यानि दशमस्कन्धचरितानि दशमस्कन्धे प्रतिपादितानि पूतनावधादिश्रीकृष्णचरितानि तैर्लसत् शोभमानं भित्तिप्रान्तं यत्र, समस्तस्यासमस्तेन नित्यापेक्षेण सङ्गतिरिति असमस्तेनापि सम्बन्धः। "कक्षा दोर्मूलकक्षयोः सौरभकतृणे कक्षः सर्पकानलविरुधोः। कक्षा-दूष्यहर्निकायश्च प्रकोष्ठे राजवेश्मसु। स्पर्द्धा पदप्रधाने पश्चादञ्चल-पल्लवे। वेष्यतोऽग्रेऽपि कक्षा स्यादिति विश्वः" ॥ ससकक्षाभ्यन्तरे राजा तिष्ठतीति नीतिशास्त्रम्, कक्षाणां मध्यं मध्यकक्षमव्ययीभावनिपातनाद्‌ज्ञेयं। "स्तम्भः स्थूणा-जड़िभावयोरिति" मेदिनी। "भित्तिकुड्या प्रभेदयोरिति" च ॥४६॥

अनु०—अब श्रीमथुरा नगर के राज भवनान्तर्गत श्रीकृष्णचन्द्र के केलि-भवन का वर्णन करते हैं:—हे हंस! वहां अन्य कक्षों के मध्य में विराजमान विचित्र झरोखों में विभूषित श्रीकृष्णचन्द्र के लीला-भवन को तुम देख पाओगे। यह विलास-भवन वायु की लहरों से आन्दोलित मुक्ता-मालों से जग जगमगाता हुआ, निर्मल स्फटिक मणियों से खचित तथा अनेक मणि जटित स्तंभों से सुशोभित है। इस भवन की भित्तियों के प्रान्त भागों पर श्री-भागवत के दशमस्कंध वर्णित श्रीकृष्ण चरित्र की ब्रजलीलावली उत्तम रूप से स्वर्ण चित्रों में चित्रित है। आज कल भी श्रीकृष्ण-चन्द्र अपनी मधुर ब्रजलीलाओं का निरीक्षण कर आनन्दानुभव करते हैं।" इससे भगवान् की ब्रजलीलाओं का उत्कर्ष व्यक्त होता है ॥४६॥

प्रागूरूप-दोहा

हंस मधुपुरी जाय के, देखौ दृश्य विचित्र।
जो दुर्लभ प्राणीन कों, सो तुम निरखहु मित्र ॥४६॥

मूल की भाषा पद्य—छप्पय

ता पीछे तुम हंस! केलिगृह हरि कौ देखौ।

परकोटा के मध्य पहुप अरु गुच्छा पेखौ ॥
तिन की जाली और झरोखा मोती माला ।
दीप्तमान शुचि खंभ पांति बहु भांति विशाला ॥
अरु भींत पुनीतन पै लिखे दिव्य कान्ति कलधौत जल ।
शुभ दशमस्कन्ध चरित्र प्रभु पूतनादि वध यश विमल ॥४६।

सारांश-सोरठा

परकोटा के माहिँ केलिभवन श्री कृष्ण में ।
श्रम चित्त हरषाहिँ स्वर्ण लिखित प्रभु चरित लखि ॥४६।

००००

अलिन्दे तस्यास्ते मरकतमयी यष्टिरमला
शयालुर्यां रात्रौ मदकलकलापी कलयति ।
निरातङ्कं तस्याः शिखरमधिरुह्य श्रमनुदं
प्रतीक्षेथाः भ्रातर्वरमवसरं यादवपतेः ॥४७॥

टीका—तत्र विश्रामस्थानं कथयति-तस्य केलिनिलयस्य अलिन्दे द्वार-समीपे ऽजिरे मरकतमयी यष्टिः विश्रामस्तम्भोऽस्ति विकारे मयट्,कीदृशी अमला अतिस्वच्छा,यां यष्टिं मदकलकलापी मत्तमयूरः रात्रौ शयालुः सन् कलयति आश्रयति । रात्राविरयनेन दिवा तस्यानवस्थानमुक्तम् । निशङ्कं यथा स्यात्तथा तस्य यष्टिशिखरं अग्रमधिरुह्य यादवपतेः श्रीकृष्णस्य वरं श्रेष्ठं अतिनिभृतमिति यावत् अवसरं प्रतीक्षेथाः । कीदृशं शिखरं श्रमनुदं श्रमस्य हारकं पक्षिवासायोपकल्पितत्वात् दिवा मयूरस्यानवस्थानाच्च निरावङ्कत्वं श्रमनुदमित्यनेन रमणीयत्वं विशालत्वञ्चोक्तम् । यादवपतित्वात् सर्वयादवास्तु समीपे सर्वदैव तिष्ठन्तीत्युक्तम् । अतो निभृतावसरापेक्षा । "यष्टिः पुंसि स्याद्ध्वजदण्डके" इति मेदिनी । 'आतङ्को रोग-सन्तापशङ्कासु मुरजध्वनौ' इति च । 'शयालुः स्याद्जागरे निद्राशीले च कुञ्जरे' इति च । 'गुह्ये चावसरे पुमानिति' च । 'प्रस्थाने

चेति" मेदिनी । "शिखरा स्त्री द्रुमाग्रेऽद्रिश्रृङ्गे पुलककक्षयोः । पक्व-दाडिमबीजाभ-माणिक्य-सुफलाग्रयोरिति" च ॥४७॥

अनु०—हे हंस ! श्रीकृष्णचन्द्र के विलास भवन के अलिन्द (बरामडे) में मरकतमणि निर्मित एक ऊँचा स्तंभ है, रात्रि के समय निद्रालु, मदमत्त-मयूर इसी स्तंभ का आश्रय लेते हैं। उसी परिश्रम-निवारक मणि-स्तंभ का आश्रय लेकर निर्भय होकर आप भी श्रीयदुराज कृष्णचन्द्र के सुअवसर की प्रतीक्षा करना अर्थात् जब श्रीकृष्णचन्द्र प्रसन्न होकर तुम्हारी ओर दृष्टिपात करें उसी शुभ अवसर की प्रतीक्षा करना। वह यादव-पति तुम्हारी ओर कृपा-कटाक्ष से निरीक्षण अवश्य ही करेंगे, यह भाव है ॥४७॥

प्राग्रूप-दोहा

केलि सदन श्री कृष्ण कौ, भवनन में अवतंस।
ताके अद्भुत चिन्ह ये, सुनिये भ्राता हंस ! ॥४७॥

मूल की भाषा पद्य-छप्पय

ता क्रीडागृह बहिर्द्वार के उपरि भाग पर।
विमल नीलमणि रचित यष्टि परमा प्रकाशकर ॥
तहाँ सजीव मोर जो अति निद्रा सों कातर।
शयन करत है ता कपोत पालिका शिखर पर ॥
तुम चढ़ौ जाय ता पर तहाँ, विरमहु चित ह्वै के निडर।
फिर शुभ अवसर लखि के कहौ हरि सों यह सन्देश वर॥४

००००

निविष्टः पल्यङ्के मृदुलतरतूलीधवलिते
त्रिलोकीलक्ष्मीणां ककुदि दरसाचीकृततनुः।
अमन्दं पूर्णेन्दुप्रतिममुपधानं प्रमुदितो
निधायाग्रे तस्मिन्नुपहितकफोणिद्वयभरः ॥४८॥

टीका--तदानीं यादृशो भगवतो दर्शनं भविष्यति तदनुभवेन कथयति द्वाभ्यां निविष्ट इति। मुकुन्दः श्रीकृष्णः साक्षात् प्रत्यक्षं प्रमदसुधया हर्षामृतेन ते तव दृशौ लक्ष्यते इति द्वितीयेनान्वयः। एतेन दर्शनमात्रेण सुधाधाराभिषिक्तयोः तव दृशोः महानन्दो भविष्यतीति भावः। अतः तदनु परमानन्दलाभाय भवता अवश्यमेव गन्तव्यम्। मुकुन्दशब्दोपादानात् तव मुक्तिरपि दर्शनमात्रेण सुलभा इत्युक्तम्। यतो मुकं मुक्तिं ददातीति मुकुन्दपदव्युत्पत्तिः स। कीदृक् पल्यङ्के खट्वायां निविष्टः कृतशयनः, कीदृशे मृदुलरा अतिकोमला या तुली आस्तरणविशेषः तया धवलिते शुभ्रीकृते, पुनः कीदृशे त्रिलोकीलक्ष्मीणां त्रैलोक्यसम्पदां ककुदि श्रेष्ठे अमूल्य इति यावत्। स कीदृक् दरेति ईषत् साचीकृता वक्रीकृता तनुर्येन स्वभावाख्यानमेतत्। पुनः कीदृक् अमन्दमित्यादि अमन्दं अनल्पं अतिशुभ्रत्वात् पूर्णेन्दुप्रतिमं पूर्णचन्द्रतुल्यं उपधानं गण्डकं अग्रे निधाय तस्मिन्नुपधाने उपहिते कफोणिद्वयस्य भरो येन। संनिधायाधः पार्श्वे तदुपरि दधद्वा कफोणिमिति पाठान्तरम्। तदायमर्थः उपधानं अधःपार्श्वे च निधाय तस्योपधानस्योपरि वामकफोणि वामकूर्परं दधतीति, स कीदृक् मुदित इति हृष्टः। "पल्यङ्को-मञ्च-रोमाञ्च-पर्यङ्क-वृषी-पर्यन्तीकासु चेति कुञ्चिकायां स्यादिति मेदिनी"। "उपधाने विषे गण्डो प्रणयेऽपि नपुंसके इति च"। "गण्डुर्त्रालिश" इति प्रसिद्धः "स्यात् कफोणिस्तु कूर्पर" इत्यमरः। "कफोणि-कफलि-द्वयो रिति शब्दमहार्णव इति रायमुकुटधृतम्"। "भरः स्वर्णे हरे विश्वः पर्यङ्क खट्वाशयनं। मञ्च पर्यङ्क-पल्यङ्काः-खट्वायाः समा इत्यमरः"। "तुलिका पुंसि भारोऽतिशयभारयोरिति मेदिनी"। "ककुत् स्त्री ककुदेऽप्यस्त्री वृषाङ्के च ध्वजे वरे" इति मेदिनी ॥७८॥

अनु०—त्रिभुवन की छवि के प्रधान आश्रय स्वरूप, अति कोमल रुई के गद्दे बिछे हुए—शुभ्र पर्य्यङ्क पर, कुछ वक्र भाव द्वारा अपना श्रीअङ्ग स्थापित किए हुए श्रीकृष्णचन्द्र अपनी दोनों कोहनियों को

एक बृहत् पूर्णचन्द्र समान तकिए पर रक्खे हुए विराजमान हैं॥४८

भागरूप-दोहा

हंस तहां तुम बैठियों ह्वै कें सजग अमन्द।
अवशि देहिंगे दरस प्रभु, कृष्णचन्द्र सुखकन्द ॥४८॥

मूल की भाषा पद्य—छप्पय

सकल त्रिलोकी की शोभा सकेलि जनु लीनी।
धुनी रुई सम श्वेतवर्ण कोमल रुचि भीनी॥
ऐसो शय्या रचित रुचित पर्य्यंक बिराजै।
टेढ़ौ किये शरीर अद्धं अतिशय छवि छाजै॥
तहँ पूर्णचन्द्र सम गेंडुआ परम मनोहर मृदुल तर।
धरि नीचे ताहि प्रसन्न हरि तापर कुहनी वाम कर॥४८॥

सारांश—सोरठा

सित गेंडुआ ललाम शुक्लवर्ण शुचि सेज पै।
धरि कुहनी कर वाम बैठे हरि दैंगे दरस॥४८॥

००००

उदञ्चत्-कालिन्दीलहरिसुभगम्भावुकरुचिः
कपोलान्तः प्रेङ्खन्मणिमकरमुद्रामधुरिमा।
वसानः कौशेयं जितकनकलक्ष्मीपरिमलं
मुकुन्दस्ते साक्षात्प्रमदसुधया सेक्ष्यति दृशौ ॥४९॥(युग्मकं)

टीका—पुनः कीदृक् उदञ्चत् कालिन्दीति। उदञ्चत् सत्या याः कालिन्दी-लहर्य्यः लहरत् सुभगं भावुकाः इति मनोहरा रुचि र्यस्य, कपोलान्तयो र्गण्डप्रान्तयोः प्रेङ्खन्त्यौ चलन्त्यौ ये मणिमकरमुद्रे कुण्डले ताभ्यां मधुरिमा मनोहरत्वं यस्य, सः पुनः कीदृक् कौषेयं पीतवस्त्रं वसानः परिदधानः कीदृक् जितेति जितोऽभिभूतः कनकलक्ष्म्याः सुवर्णशोभायाः

परिमलं अधिकं येन तत् अन्यत् व्याख्यातम् । लहरीरिति ह्रस्वान्तोऽपि स्त्रियां 'उदञ्चत् कावेरीलहरिषु परिष्वङ्ग' इत्यादि' प्रमाणे प्रयोगः । सुभगं भावुक इति सुभगपूर्व्वादभूव खुकञ् प्रत्ययः नकारागमः । मुद्रा-शब्दोऽर्थमध्यादया कुण्डलादौ वर्त्तते । 'मधुरं रसवत् स्वादु प्रियेषु मधुरोऽन्यवदिति' विश्वः । गौण्यावृत्त्या शोभायामत्र मधुरशब्दः, पृथ्वादिमन् । "सर्वावस्थाविशेषेषु माधुर्य्यं रमणीयता" इति साहित्यदर्पणः । "परिमलो विमर्देऽपि स्यान्मनोहर-गन्धयोः । वातोपभोग-सम्मर्दे-विमर्दे शे च सौरभ" इति विश्वः । अत्र तु गौण्या परिमलशब्द आधिक्यवृत्तिः । "मुकुन्दु कौ महेशे चेति" कोषान्तरम् ॥४६॥ (युग्मकं)

अनु०—निर्मल यमुना जल के समान जिनकी मनोरम देह कान्ति, युगल कपोलों के निकटवर्त्ती मणि-मण्डित उज्ज्वल-कुण्डल-द्वय शोभित होरहे हैं । कनक-कान्ति को पराजित करने वाले कौशेय-वसन अर्थात् ज्योतिर्मय पीताम्बर को धारण किए हुए ऐसे यदु-राज श्रीकृष्णचन्द्र प्रत्यक्ष रूप में दर्शन देकर, हे हंस ! तुम्हारे नयन युगल को तृप्त करेंगे ॥४६॥

आशरूप—दोहा

हंस समय वह जानियों, सब प्रकार सुखकन्द ।
देंहि दरस घनश्याम जब, पूरन परमानन्द ॥४६॥

मूल की भाषा पद्य—छप्पय

यमुनाजल सम नील कलेवर शुचि रुचि दरसत ।
मकराकृत मणि जटित कुंडलनि सुखमा सरसत ॥
तिन की आभा आय कपोलनि पै छवि पावत ।
पीताम्बर की दमक चमक कंचनहि लजावत ॥
वह रूपराशि सोभा सदन मोहन मदन मुरारि हरि ।
सो सुधानन्द निज दरस सों सींचहिं तुम दृग नेह भरि ॥४६

सारांश–सोरठा

कलित कलेवर श्याम तापर सुबरन दुति बसन।
कुंडल ललित ललाम देहिं तुम्हें यह दरस हरि ॥४९॥

◇◇◇◇

विकद्रुः पौराणीरखिलकुलवृद्धो यदुपते–
रदूरादासीनो मधुरभणितीर्गास्यति तदा।
पुरस्तादाभीरी-गणभयदनामा स कठिनो
मणिस्तम्भालम्बी कुरुकुलकथां सङ्कुलयिता ॥५०॥

टीका—अस्मिन्नेवावसरेऽस्मत्कथा भवता प्रस्तोतव्या इति कृष्णे अन्योपकथा-श्रवणादिमुपदिशति विकद्रुरिति। विकद्रुर्नाम यादवविशेषकः स यदा यदुपतेः श्रीकृष्णस्य अदूरात् समीपे आसीनः उपविशन् पौराणीः प्राचीनः पुराणसम्बन्धिनीवार्त्तामिति गाथां गास्यति गानप्रबन्धेन कथयिष्यते तदा अस्माकीनां गिरं मुरभिदे उपहरेथाः इति पञ्चदश-श्लोकेन सम्बन्धः। स कीदृक् अखिलकुलवृद्धः समस्तयदुकुलमध्ये वृद्धः अतिप्राचीनः कथयति यदा, स प्रसिद्धः कठिनः क्रूरो ऽक्रूर इत्यर्थात् पुरस्थालम्बी सन् तदवलम्बनशीलः मणिस्तम्भमवष्टभ्येति यावत्। कुरुकुलस्य युधिष्ठिरादेः कथां तदन्वेषणाय श्रीकृष्णेन प्रेरितत्वात् संकलयिता कथयिष्यति, स कीदृक् आभीरगणस्य भयदः नाम यस्य यन्नाम मात्रेणापि गोपीनां भयं भवति अतस्तदपुरस्तात् हठात् न वक्तव्यमिति भावः ॥५०॥

अनु०—वहां श्रीकृष्णचन्द्र के निकट बैठे हुए, यादव कुल के वयोवृद्ध, मधुर भाषी विकद्रु, पुराण-गाथा गान कर रहे होंगे एवं उनके सन्मुख ही मणिमय-स्तंभ का सहारा लिए हुए वही कठोर हृदय–जिसका नामोच्चारण भी गोपीगण को विभीषिका उत्पादक है, अर्थात् जो हमारे इस दुःख का मूल कारण है, वही

बैठा हुआ कुरु-कुल की कथाओं का विशद-वर्णन
ोगा ॥५०॥

भागूरूप—दोहा

बैठे होंगे ता समय, मुख्य सभासद आय।
तिन कों हू अवलोकियो हंस तहां चित लाय ॥५०

मूल की भाषा पद्य—छप्पय

यदुकुल माहिँ विकद्रु वृद्ध यादव, समीप हरि।
कहत होहिँगे कथा पुरानी मधुर गिरा करि॥
गोपिन भयप्रद कठिन हृदय अक्रूर क्रूर मन।
पीठ धरे मणि जटित खम्भ सों तहाँ कृष्ण सन॥
सो कहत होंहिगे सामुहीँ कुरुकुल सम्बन्धी कथा।
जो हथिनापुर सों आय कें समाचार लाये यथा

सारांश—सोरठा

वृद्ध विकद्रु उदार कृष्ण निकट अक्रूर सह।
वार्त्ता विविधि प्रकार करत लखोगे हंस तुम ॥५०

००००

शिनीनामुत्तंसः स किल कृतवर्म्माप्युभयतः
प्रणेष्येते बालव्यजनयुगलान्दोलन-विधिः।
स जानुभ्यामष्टापद-भुवमवष्टभ्य भविता
गुरोः शिष्यो नूनं पदकमलसंवाहनरतः ॥५१॥

—शिनीनामिति-सर्वत्र यदेत्यस्य सम्बन्धः। शिनीनां शिन
त्तंसः श्रेष्ठः सात्यकिरित्यर्थः। किल निश्चये, कृतवर्म्मा
नाम यदुश्रेष्ठः स च, तौ उभयतः पार्श्वद्वये बालव्यजनद
यस्यान्दोलनविधिं प्रणेष्यते करिष्यते, यदा गुरोः बृहस्पतेः

'उद्धवो बुद्धिसत्तमः इति दशमोक्तेः' जानुभ्यां अष्टपदभुवं काञ्चनमय भूमि अवष्टभ्याश्रित्य नूनं निश्चितं पदकमलयोः सम्बाहनं मर्द्दनं तत्र रतः तदासक्तो भविता भविष्यति पूर्ववत् सम्बन्धः। "अष्टापदो स्त्री कनके शारीणां फलकेऽपि च। अष्टापदी चन्द्रमल्यां शरभे मर्कटे पुमान्" इति मेदिनी ॥५१॥

अनु०—यादव वंशावतंस सात्यकि और कृतवर्मा ये दोनों यदु-कुल तिलक भगवान् श्रीकृष्णचन्द्र के दोनों ओर बैठे हुए चँवर सञ्चालन कर रहे होंगे तथा सुवर्ण रचित भव्य भवन के ऊपर भाग पर अपने दोनों जानुओं के बल विराजे हुए बृहस्पति शिष्य वह उद्धव श्रीकृष्ण की चरण सेवा में रत हुआ दृष्टिगोचर होगा॥५१॥

आमुख-दोहा

अन्य सभासद कृष्ण के कुल भूषण श्रीमान।
लोचन गोचर होहिंगे सुनिये हंस सुजान॥५१॥

मूल की भाषा पद्य-कुंडलिया

यादव भूषण सात्यकी कृतवर्मा मतिमान।
चँवर डुलावत कृष्ण के दोनों ओर प्रधान॥
दोनों ओर प्रधान स्वर्णमय भूमि जहाँ की।
तापर घुटुअनि बैठि लहैं सीमा परमा की॥
चरण-कमल सेवत होंगे साहलाद प्रकट भव।
सुर गुरु शिष्य प्रवीण महा उद्धवजी यादव॥५१॥

सारांश-सोरठा

चँवर करत दुहुँ ओर कृतवर्मा अरु सात्यकी।
उद्धव प्रेम अथोर सहित सेवते हरि चरण॥५१॥

००००

विहङ्गेन्द्रो युग्मीकृतकरसरोजो भुवि पुरः
कृतासङ्गो भावी प्रजविनि निदेशेऽर्पितमनाः ।
छदद्वन्द्वे यस्य ध्वनित-मधुरावासिवटवो
व्युदस्यन्ते सामस्वरकलितमन्योन्यकलहम् ॥५२॥

टीका—विहङ्गेन्द्र इति । यदा च विहङ्गेन्द्रो गरुडः पुरोऽग्रे युग्मीकृत-करसरोजः भावी भविष्यति 'अयुग्मं युग्मकृतमिति चिन्त्यः' सम्पुटीकृतकर-द्वय इत्यर्थः । भुवि भूमौ कृतासङ्गः कृतस्थितिरूपः संश्लेष आलिङ्गन-त्वात् भूम्यवस्थानम् । पुनः कीदृक् प्रजविनि अतिशीघ्रसाध्ये निर्देशे शासनेऽर्पितमनाः कदा किमाज्ञापयतीति एकतानचित्तः प्रजविनीत्युक्त-मन्यसाध्यत्वाभावसूचनार्थम् । यस्य विहगेन्द्रस्य छदद्वये पक्षद्वये ध्वनति शब्दं कुर्वति सति मधुरावासिवटवः मधुरावासिनो बालकाः सामस्वर-कलितं साम्नि वेदे स्वरा उदात्तादयः तन्निमित्तं कलितं जातं अन्योन्यकलहं परस्परविवादं एवं भवति एवं न इति रूपं व्युदस्यन्ति दूरीकुर्वन्तीत्यर्थः । सामसमपक्षिध्वनिश्रवणात् तदुपदेशेनैव सन्देहभ-ञ्जनात् कलहत्यागः । तथा च श्रुतिः—"त्रिवृद्वेद सुपर्णात् न्यायश्च वहति पुरुषमिति" । "सुपर्णोऽसौ गरुत्मान् त्रिवृत्ते शिर" इत्यादि श्रुतेः । "छदः पलाशे गरुति ग्रन्थे पर्ण-तमालयोरिति" मेदिनी । "स्व-रोऽकारादिमात्रासु मध्यमादिषु च ध्वनौ । उदात्तादिषु च प्रोक्तः स्वरो नासासमीरणे" इति विश्वः ॥५२॥

अनु०—श्रीकृष्णचन्द्र के सन्मुख पक्षिराज-गरुड़ युगल कराञ्जलि बाँधे सावधान मन से शीघ्र भावि आदेश का पालन करने के लिए प्रतीक्षा करते हुए खड़े होंगे और उस समय गरुड़ जी के युगल पक्षों के संचालन के शब्द से मथुरा निवासी ब्रह्मचारी बालकगण का साम वेदोच्चारण विषयक पारस्परिक विवाद शान्त हो गया होगा । अर्थात् गरुड़-पक्ष-सञ्चालन के भीषण शब्द के सामने

कुछ भी नहीं सुनाई पड़ रहा होगा । अतः वेदाङ्ग-शिक्षा-वि
विवाद, उस समय निवृत्त होगया होगा ॥५२॥

प्राग्रूप–दोहा

ललिता कहत मराल सों, सपदि मधुपुरी जाय ।
परम पवित्र निहारिये, सरस दरस चित लाय ॥५२

मूल की भाषा पद्य–छप्पय

सब पच्छिन में श्रेष्ठ गरुड़ हेरें हरि इच्छा ।
निज कर कमलन जोरि किये आदेश प्रतिच्छा ॥
सजग रहत सब काल कृष्ण सन्मुख पृथवी पर ।
उड़त कढ़त जिनके पंखन सों सामवेद स्वर ॥
सुनि ताहि तजत हैं वाद सब मथुरावासी बटुक वर ।
जो होत रहत उन में तहां स्वर उदात्त अनुदात्त पर ॥

सारांश–सोरठा

सुनिये हंस सुजान गमन कीजिये मधुपुरी ।
पाय दरस हरि यान जन्म लाभ निज लीजिये ॥५२॥

०-००

न निर्वक्तुं दामोदरपदकनिष्ठाङ्गुलिनख–
द्युतीनां लावण्यं भवति चतुरास्योऽपि चतुरः ।
तथापि स्त्रीप्रज्ञासुलभतरलत्वादहमसौ
प्रवृत्ता तन्मूर्त्तिस्तबरतिमहासाहसरसे ॥५३॥

टीका—ननु महैश्वर्य्याः कति कति यादवाः सन्ति तत्रायं हरिरिति
ज्ञातव्यमिति चेत्तत्राह न निर्वक्तुमिति । चतुरास्यो ब्रह्मापि दामोद
कनिष्ठाङ्गुलिनखद्युतीनां श्रीकृष्णचरणकनिष्ठाङ्गुलिनखकान्तीनां लाव
शोभां न निर्व्वक्तुं निःशेषेण कथयितुं चतुरो दक्षो न भवति अ

मितशोभत्वात् । तथाप्यसावहं स्त्रीप्रज्ञा तरलस्वभावात् स्त्रिया या प्रज्ञा बुद्धिस्तया सुलभं यत्तरलत्वं चाञ्चल्यत्वं तस्मात्, स्त्रियो हि स्वभाव-तरला भवन्तीति हेतोश्च तन्मूर्त्तिस्तवरतिमहासाहसरसे प्रवृत्तास्मि तस्य दामोदरस्य स्तवे या रतिरासक्तिः सैव महासाहसरसस्तत्र । "चतुरश्चातुर-कर-चक्रगण्डे नियन्तरि । एतौ स्यातां चाटुकारे दक्षे च नेत्रगोचरे" इति विश्वः । "तरलं चञ्चले षिङ्गे स्वभावेऽपि त्रिलिङ्ग-कम् । हारमध्यमणौ पुंसि यवागू सूर्योऽस्त्रीयामिति"मेदिनी । "साहसं तु बलात्कारकृते कार्यें मदेऽपि च । निद्धारेऽजगरे सूनि षड्के" इति विश्वः । "मूर्त्तिर्काठिन्यकाययोरित्यमरः" ॥५३॥

अनु०—अब श्रीकृष्ण की रूप-माधुरी का वर्णन करते हैं—जिन श्रीकृष्णचन्द्र के चरण-कनिष्ठाङ्गुलि के नख कान्ति की लावण्यता को वर्णन करने को चतुर चतुरानन भी समर्थ नहीं है, कारण कि उनके श्रीअङ्गकी स्तुति करने के लिए प्रेम की आवश्यकता है और वह मुझ में नहीं होने पर भी स्त्रीजनोचित स्वाभाविक साहस तथा चपलता द्वारा प्रेरित होकर मैं ऐसे दुःसाहस-पूर्ण कार्य में प्रवृत्त हुई हूँ । अर्थात् जिन श्रीकृष्ण के रूप वर्णनों में ब्रह्मा की भी सामर्थ्य नहीं है उसे मैं प्रेम हीन सामान्य स्त्री कैसे वर्णन कर सकूंगी ॥५३॥

आशुरूप—दोहा

हरि छवि वर्णन करन में, अनौचित्य जिय जानि ।
कहत हंस सों सरल चित, ललिता अति मृदु बानि ॥५३॥

मूल की भाषा पद्य—छप्पय

पद सरोज श्रीकृष्णचन्द्र की कनिष्ठ अँगुली ।
ताकी नख दुति वरनत मति विरंचि की न तुली॥
तिन श्रीहरि के अंगनि की माधुर्य बड़ाई ।
को करि सकै बखान बुद्धि ऐसी किन पाई ॥

वह शोभा वर्णन करन कों नारि बुद्धि चंचल परम।
निज साहस रस में मग्न भइ जानत का मारग मरम॥५३॥

सारांश–सोरठा

हरि छवि कहत लजात निर्मल बुद्धि विरंचि की।
सो कत बरनि सिरात मैं ललिता तियमति सहज॥५३॥

००००

विराजन्ते यस्य व्रजशिशुकुल-स्तेयविकल–
स्वयम्भू-चूडाग्रै लुं लितशिखराः पादनखराः।
दृशं यानालोक्य प्रकटपरमानन्दविवशः
सदेवर्षिर्मुक्तानपि मुनिगणान् शोचति भृशं॥५४॥

टीका—अष्टाभिः श्रीमूर्त्तिं वर्णयति विराजन्त इति। मानवाः शिरसो वर्ण्याः देवताः पदतस्तथा इति कविसम्प्रदायानुसारेण पादमारभ्य वर्णना। यस्य श्रीकृष्णस्य पादनखराः विराजन्ते उत्कर्षमाविष्कुर्वन्तीत्यर्थः। कीदृशाः व्रजेति व्रजशिशुगणस्य गोपशिशूनां स्तेयं चौर्य्यं तेन विकलो यः स्वयम्भूर्ब्रह्मा तस्य चूडाग्रै मुकुटकोटिभिः लुलिता ईषत् स्पृष्टा वा शिखरा अग्रभागो येषां ते, ईश्वरस्यापराधो मया कृतः किं दण्डं मयि करिष्यतीति विकलताभिया अनतिशयसमीपागमनात् शिखराणामेव लुलितत्वं पुनः पुनः प्रणामादष्टत्वं यानि पादनखराणि दृशामवलोक्य देवर्षिर्नारदः मुक्तानपि तनुभृतो जीवान् भृशं शोचति। एतादृक् प्रकटपरमानन्दलीलाविलासरूपस्य मुक्तानुभवाभावात् मुक्तानां शोच्यता। स कथम्भूतो देवर्षिः प्रकटो अस्याविर्भूतो यः परमानन्दः तेन विवशः तद्दर्शनमात्रेणाविर्भूतपरमानन्देन विवश स्तब्ध इति यावत्। सात्त्विकोऽयं भावः। तथा चोक्तं–"स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरसादोऽथ वेपथुः। वैवर्ण्यमश्रु प्रलयः इत्यष्टौ सात्त्विकाः स्मृताः"॥'ते स्तम्भस्वेदरोमाञ्चाः स्वरभेदोऽथ वेपथुः। वैवर्ण्यमश्रुप्रलयः इत्यष्टौ सात्विकाः स्मृताः'॥

प्रियस्य दर्शनञ्चैव सङ्गमं स्मरणं तथा। हेतुत्रयं समासाद्य सात्विकः संप्रवर्त्तते" ॥ यस्येति पदानां मूर्त्तीत्यादि समुदायान्तर्गत उक्त सम्बन्धः ॥५४॥

अनु०—श्रीकृष्णचन्द्र के सखा स्वरूप, गोप बालक तथा गो वत्सों को अपहरण करने के कारण व्यग्रचित्त, प्रणामोन्मुख ब्रह्मा के किरीटों के स्पर्श करने से जिनके श्रीचरणों का नखाग्रभाग सुशोभित हो रहा है एवं देवर्षि नारद जिन चरण नखों का दर्शन कर स्वानुभूत आनन्दातिरेक में विह्वल हो गए थे, केवल इतना ही नहीं जो सायुज्य मुक्ति भी लाभ कर चुके हैं, उनके भाग्य को भी धिक्कारते हुए वे दुःख प्रकाश करते हैं अर्थात् उन सब मुक्त पुरुषों का भी कैसा दुर्भाग्य है कि जो ऐसे मूर्तानन्द के असाधारण सौन्दर्य माधुर्य का आस्वादन सुख नहीं प्राप्त कर सकते हैं ॥ ५४ ॥

आगूरूप-दोहा

हरि चरणन तें सीस लों, शोभा अङ्ग अपार।
प्रथम करत ललिता अबै, नख वर्णन सुखसार ॥५४॥

मूल की भाषा पद्य—छन्द दोवै

ब्रज के बालक अरु बछरा बहु आय विरंचि चुराये।
ता अपराध विकल ह्वै के विधि, हरि चरणन शिर नाये ॥
तिन मुकुटन के अग्रभाग सों घिसे कृष्ण नख पद के।
निरखि प्रेम बस मुक्तन पर मन सोच भयौ नारद के ॥
आशय याकौ यह, ज्ञानीजन सगुन रूप जिन त्यागे।
अनुभव गम्य ब्रह्म वक्ता ह्वै निरगुन पथ अनुरागे ॥
तिन के अर्थ देवऋषि के उर सरल सोच यह आयौ।
ज्ञान मान में रहे मस्त इन दरशन सुख नहिँ पायौ ॥५४॥

सारांश—सोरठा

सेवा जानि प्रधान करत सदा साकार की।
नाहिन मुक्ति सुजान चाहत हरि की भक्ति बिनु ॥५४॥

००००

सरोजानां व्यूहः श्रियमभिलषन् यस्य पदयो-
र्ययौ रागाढ्यानां विधुरमुदवासव्रतविधिम्।
हिमं वन्दे नीचैरनुचितविधानव्यसनिनां
यदेषां प्राणान्तं दमनमनुवर्षं प्रणयति ॥५५॥

टीका—सरोजानामिति। सरोजानां व्यूहः समूहः यस्य पादयोः श्रियं शोभां अभिलषन् प्राप्तुमिच्छन् विधुरं चिन्ताकुलं यथा स्यात्तथा उदवासव्रतविधिं सततजलनिवासरूपव्रतविधानं ययौ, कीदृशानां रागाढ्यानां रागोऽतिलोभः मात्सर्यं वा तेन आढ्यानां युक्तानां अथ च रागो लौहित्यं रक्तपद्मानामित्यर्थः। अहं नीचैरिति नम्रं यथा स्यात्तथा हिमं शिशिरं वन्दे, तत्र हेतुः यद् यस्मात् अनुचितविधानव्यसनिनां अयोग्यक्रियाव्यवसाययुक्तानामेषामनुवर्षं वीप्सायामनु वर्षे वर्षे प्राणान्तं नाशरूपं दमनं दण्डं प्रणयति करोति। अयोग्यव्यवसायिनां यो दण्डं करोति स राजा वन्द्य एवेत्यर्थः। एतेन हिमस्य राजत्वञ्च ध्वनितम्। यद्वा नीचैरिति हिमानामित्यर्थः। "रागोऽनुरागो मात्सर्यं क्लेशादौ लोहितादिषु। अङ्गरादौ नृपे राग" इति विश्वः ॥५५॥

अनु०—कमलों के समूह श्रीकृष्णचन्द्र के चरण-कमल के सौन्दर्य कान्ति की अभिलाषा करके मनुष्यों के लिए क्लेश-प्रद ऐसे जल निवास रूप तपोनुष्ठान को अङ्गीकार किया है। मैं उस हिमन्त ऋतु की बार २ वन्दना करती हूँ जो कमलों के लिए हैमन्तिक, हिम-प्रपात करके उसको शीर्ण विशीर्ण कर मृत्युरूप दण्ड विधान

है अर्थात् अपराधी को यथोचित दण्ड देने के कारण नीय है। उस हिमंत ने उचित ही आचरण किया है, है ॥५५॥

प्राग्रूप-दोहा

समता करत बड़ेन की, वे नहिं आदरनीय।
या कौ प्रकट उदाहरन, लखौ हंस कमनीय ॥५५॥

मूल की भाषा पद्य-छप्पय

कमलन चाही हरि चरणन सम ललित लुनाई।
पै नहिं वा सुन्दरता की समता तिन पाई॥
राग युक्त तिन लहि विराग जल में निवास व्रत।
लियौ फलोदय हेतु तदपि सो आस भई गत॥
यह नीति निरखि ललिता कहै हिम कों मैं बन्दन करत।
न नीचन के प्रति वर्ष जो दंड दैय प्राणन हरत ॥५

सारांश-सोरठा

हरि पद होन समान जल धसि तप कीनो कमल।
लखि यह नीच विधान मारा दंड हिम नें दियो ॥५५

००००

रुचीनामुल्लासैर्मरकतमयस्थूलकदली-
कदम्बाहङ्कारं कवलयति यस्योरुयुगलम्।
यदालानस्तम्भद्युतिमवललम्बे बलवतां
मदादुद्दामानां पशुपरमणीचित्तकरिणाम् ॥५६॥

—ऊरू वर्णयति रुचीनामिति। यस्योरुयुगलं रुचीनां कान्ति विलसितैः मरकतमयस्थूलकदलीकदम्बाहङ्कारं मरकतमय्यो कदल्यः बृहत्कदलीवृक्षास्तासां कदम्बस्य समूहस्य अह

'वयमति-विशालकायद्दा' इति गर्वं कवलयति ग्रासीकरोति दूरयतीति यावत्। तद्विशिष्टं यत् ऊरुयुगलं पशुपरमणीनां चित्तान्येव दुर्गमत्वात् करिणो तेषामालानशुभ्रस्य द्युतिं कान्तिं अवलम्बे प्राह, कीदृशां बलवतां करिणोऽपि तथा सर्वेन्द्रियाणामवशत्वात् बलवत्वात् चित्तस्य तथा चोक्तमेकादशे-"मनोवशेऽन्ये ह्यभवन् स्म देवा मनस्तु नान्यस्य वशं समेति" इति, "भीष्मो हि देवः सहसः सहीयानिति च" देवा इन्द्रियाणि देवो मनः, पुनः कीदृशानां मदात् मत्ततायाः हेतोः उद्दामानां छिन्नशृङ्खलानां दम्यतेऽनेनेति दामो रज्जुः अद्न्तः, यद्वा दामोदरमलं भावे घञन्तादमलरहितानामित्यर्थः। चित्तपक्षे-दाम कुलाचारादिः, तथा च शान्तिशतके-'यदामौ दुर्वारः प्रसरति मदश्चित्तकरिणां, कुत' इत्यादौ श्लोके प्रमाणं द्रष्टव्यमिति। "आलानं बन्धनस्तम्भे करिणामित्यमरः"। "मदो विकारः सौभाग्य-यौवनाद्यवलेपज इति" साहित्यदर्पणः। "मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः। मद्ये च मद आख्यातो मदो निकृष्टवस्तुनीति" विश्वः ॥२६॥

अनु०—श्रीकृष्णचन्द्र के उरु युगल की कान्ति छटा मरकत मणि निर्मित कदली वृक्षों का गर्व खर्व करती है जोकि श्रीकृष्णचन्द्र के प्रेम गर्व से उद्धत एवं बलवान् गोपीगण के चित्तरूप गजराज के बाँधने को 'बन्धन-स्तंभ' रूप हो रहा है ॥५६॥

प्राग्रूप-दोहा

मैं मराल तुम सों कहत, कछु निज मति अनुसार।
जंघा श्री ब्रजचन्द्र की, बरनि लहै को पार ॥५६॥

मूल की भाषा पद्य—छन्द रोवै

हरि के बिवि जंघन कौ ऐसौ रुचिर प्रकाश सुहायौ।
खम्भ स्थूल कदलि मर्कत के तिन कौ गर्व मिटायौ॥
निज मद तें बलवान गोप नारिन के जनु चित वारण।
सो इन गज बन्धन खंभन सों बँधत किये हित धारण ॥५६॥

सारांश—सोरठा

लगे जंघन माहिँ गोपीजन मन रहत हैं।
हेतु दूसरौ नाहिँ आश्रय थल तिन कौ यहै ॥५६॥

०००

सखे ! यस्याभीरीनयनशफरीजीवनविधौ
निदानं गाम्भीर्य्यप्रसरकलिता नाभिसरसी ।
यतः कल्पस्यादौ सनकजनकोत्पत्तिवडभी-
गभीरान्तःकक्षाधृतभुवनमम्भोरुहमभूत् ॥५७॥

टीका—नाभिं वर्णयति, हे सखे यस्य श्रीकृष्णस्य नाभिसरसी आभीरी-नयनसफरीजीवनविधौ निदानं आदिकारणं, आभीरीणां नयनान्येव सफर्य्यः प्रोष्ठिकाः तासां प्राणधारण-विधानार्थ्यः, कीदृशी नाभिर्गाम्भीर्य्यस्य यः प्रसरस्तेन कलिता युक्तेति भावत् । तस्याः महत्त्वमाह यत इति यतो यस्यां नाभिसरस्यां कल्पस्यादौ प्रथमकल्पारम्भे अम्भोरुहं पद्ममभूत् । कीदृशं तत् सनकजनकेति सनकजनको ब्रह्मा तस्य उत्पत्तये वडभी चन्द्रशालिका रूपा या गभीरा अन्तःकक्षा: मध्यप्रदेशः तत्र धृतानि भुवनानि चतुर्द्दशलोको येन तत् । पाद्मकल्पे हि नारायणस्य नाभिपद्मे ब्रह्मा संभूयते तेनैव पद्मेन प्रलये तत्र लीनानसौ कालं कल्पयेदिति पौराणीकी वार्त्ता । तथा च तृतीये—'अनेन लोकान् प्राग्लीनान् कल्पयितास्मीत्यचिन्तयेदिति' । सनकजनकपदेन सनकस्य सर्व्वज्येष्ठत्वात् तस्य जनकतया सर्व्वकारणत्वं ब्रह्मणा उक्तम् । एतस्याप्युत्पत्तिहेतुत्वात् आदिकारणत्वमुक्तं श्रीकृष्णस्य । तथा च दशमे-"यन्नाभिजातादरविन्दकोषाद् ब्रह्माविरासीद् यत एष लोकः" इति । अन्तःकक्षापदेन भुवनानामेकत्र ,कुत्रापि स्थितत्वात् तस्या अपरिच्छेद्यतोक्ता । "नाभिः मायुयङ्के क्षेत्रे चक्रान्तश्चक्रवर्त्तिनोः । नाभिः प्रधाने कस्तूरीमदे चक्रा-

दिकेऽपि च" इति विश्वः। "वड्मी चन्द्रशालिका इति कोषान्तरम्" चान्द्रलोति ख्याता ॥५७॥

अनु०—हे सखे ! श्रीकृष्णचन्द्र का गम्भीरता युक्त नाभि सरोवर गोपीगण के नयन-रूप चंचल मछलियों के प्राण-रक्षण का एक मात्र जीवनोपाय है। कल्प के आदि काल में जिसमें से एक कमल उत्पन्न हुआ था, जिसके गम्भीर गर्भ-गृह में तीनों भुवन विराजमान हैं और वही कमल, ब्रह्माजी की उत्पत्ति का आधार भूत, काष्ठ-स्वरूप है। जैसे किसी गृह को धारण करने के लिए निम्न भाग में थूनी लगाते है, उसी प्रकार वह कमल ब्रह्मा के गृह का काष्ठ स्वरूप है ॥५७॥

भावरूप—दोहा

हे मराल परसा परम, कहत नाभि गम्भीर।
है सचेत सुनिये सखे, शुचि स्वभाव मति धीर ॥५७॥

मूल की भाषा पद्य—छन्द घनाक्षरी

गोपिन के नैन रूप मीनन कौ जीवन जो,
कलित गँभीरता कौ पूरन प्रसर है।
कल्प के आदि माहिँ सनक मुनिजी के पिता,
ब्रह्माजी की उत्पत्ति कौ जानौ जाहि घर है ॥
ताके अति भीतर की कक्षा तें प्रकट भयौ,
लोकन अधार कंज भव्य दिव्य तर है।
एहो सखे हंस ! ता कौ लीजिये दरस जाय,
ऐसौ कृष्णचन्द्र जी कौ नाभि सरोवर है॥५७॥

सारांश—सोरठा

आदिहि तें विख्यात कृष्ण नाभि महिमा रही।
भाव यहै दरसात ललिता जी के कथन कौ ॥५७॥

००००

द्युतिं धत्ते यस्य त्रिवलिलतिका सङ्कटतरं
सखे ! दामश्रेणीक्षणपरिचयाऽभिज्ञमुदरम् ।
यशोदा यस्यान्तः सुरनरभुजङ्गैः परिवृतं
मुखद्वारा वारद्वयमवलुलोके त्रिभुवनम् ॥४८॥

टीका—उदरं वर्णयति द्युतिमित्यादि । हे सखे ! यस्योदरं द्युति शोभां धत्ते, कीदृशं त्रिवलिरेव लतिका द्युतिकोषान्तरं सङ्कटतरं त्रिवलिरेव लतिका तया सङ्कटतरं संवाधं, पुनः कीदृशं दामश्रेणीति दामश्रेण्या यशोदयोपनीतरज्जुश्रेण्या क्षणं यः परिचयः संश्लेषरूपस्तयाभिज्ञम् । हैयङ्गवचौर्य्ये यशोदया उदूखले बद्धत्वात् श्रेणी-शब्दो दाम्नां बाहुल्य-सूचनाय, तथा च दशमे-'एवं स्वगृहदामानि यशोदा संदधत्यपीत्यादि' । तत्राश्चर्य्यमाह-यशोदेति यशोदा नन्दपत्नी यस्योदरस्याभ्यन्तरे मुख-द्वारा मुखमेव द्वारा तया वारद्वयं स्तनदानसमये मृद्भक्षणे योगे सति च वारद्वयं यथा स्यात्तथा त्रिभुवनं दृष्टवती । कीदृशं सुराः देवाः नराः मनुष्याः भुजङ्गाः सर्पास्तैः परिवृतं अङ्गुलमिति यावत् । एतेन स्वर्गम-र्त्यपातालानीति ज्ञेयम् । मुख्यत्वात् सुरेत्याद्युक्तम् । अन्यदपि तत्तन्निवासी ज्ञातव्यम् । एतदुपलक्षणम् । पृथिव्याद्यष्टावरणस्य दृष्टत्वात् । "द्युतिः श्री रश्मिशोभयोरिति मेदिनी" । "सङ्कटं नातृसंरोध इत्यमरः"। सङ्कटशब्दो दन्त्यादि संप्रोदश्च कटच् इति कटच् प्रत्ययान्तः । रायमुकुटेन च-सम्यक् कटत्यावृणोति इति वाक्यं दर्शितम् । एवञ्च पुरुषोत्तमदेव-कृत-नकारभेदे शंकट-कट-शश इति तालव्यादि शङ्कटशब्दः कृष्णस्त्वा-चीति समञ्जसम्, "लुकि दर्शने धातुः" ॥४८॥

अनु०—इस श्लोक में श्रीकृष्ण का दामबन्धन, मृद्भक्षण तथा जृंभण तीन लीलाओं का वर्णन है—हे सखे ! श्रीकृष्णचन्द्र का उदर माता यशोदा द्वारा बन्धनार्थ लाई हुई रज्जुओं का क्षणमात्र संगम लाभ करने से त्रिवली युक्त होकर अपूर्व कान्ति धारण कर

चुका था अर्थात् इस रज्जू द्वारा श्रीकृष्णचन्द्र की अपूर्व शोभा प्रगट हुई थी। सुन्दर वस्तु में कुछ भी असुन्दर नहीं होता। यशोदाजी ने श्रीकृष्ण के जँभाई लेते समय मुख फैलाने पर उनके मुख में नर, नाग, गन्धर्व आदि त्रिलोकी अर्थात् विश्व ब्रह्माण्ड का दर्शन किया तथा मृद्भक्षण करने पर "व्यादेहीति विदारिते शिशु मुखे दृष्ट्वा समस्तं जगद्" इस तरह वे दो बार विश्व का दर्शन कर चुकी हैं। ऐसे ऐश्वर्य की स्फुरणा व्रज सुन्दरीगण के हृदय में विरह के समय ही हो सकती है ॥५८॥

प्रागूरूपदोहा

हे मराल कहि सकत को, शोभा उदर अमन्द।
मातु यशोदा नें लह्यौ, जो लखि परमानन्द ॥५८॥

मूल की भाषा पद्य-छन्द घनाक्षरी

एहो सितकंठ सखे! धारण कियौ है जानें,
अद्भुत अनूपरूप सुखमा सुघर कौ।
जापै विराजमान त्रिवली लता समान,
मातु डोरी बंधन में ज्ञानबान कर कौ॥
बाल लीला माहिँ जसुधा द्वै बार लख्यौ,
तीनों लोक जाल नर नागन अमर कौ।
प्रेम पुंज भक्तन कों आठौं जाम शुभ है जो,
सुभग ललाम सो उदर दामोदर कौ ॥५८॥

सारांश-सोरटा

माता बंधन काल डोरी श्रीहरि के उदर।
सह सुर नर अरु व्याल लखी त्रिलोकी कान्ह मुख ॥५८॥

००००

उरो यस्य स्फारं स्फुरति वनमालावलयितं
वितन्वानं तन्वी-जन-मनसि सद्यो मनसिजम् ।
मरीचीभिर्यस्मिन् रविनिवहतुल्योऽपि वहते
सदा खद्योताभां भुवनमधुरः कौस्तुभमणिः ॥५९॥

टीका—वक्षो वर्णयति उरो यस्येति । यस्योरो वक्षः स्फुरति शोभते । कीदृशं स्फारं विस्तीर्णं, पुनः कीदृशं वनेति-वनमालया वलयितं वेष्टितं, किं कुर्वत् तन्वीजनानां युवतीनां मनसि सद्यो दर्शनमात्रेण मनसिजं कन्दर्पं वितन्वानं विस्तारयत् । तेजो बाहुल्यं दर्शयति-यस्मिन्नुरसि मरीचिभिः कान्तिप्रवाहैः रविनिवहतुल्योऽनेकसूर्य्यतुल्योऽपि कौस्तुभ-मणिः सदा खद्योताभां ज्योतिरिङ्गणतुल्यतां वहते धारयति । अतिनिवि-डघनश्यामकान्तीनां प्रकर्षेण तिरस्कृतत्वात् खद्योतसादृश्यम् । स कीदृक् भुवनमधुरः भुवनेषु सुन्दरः । "मरीचिरपि भेदो नागम स्तारया पुंस-कमिति" । 'स्फारः स्यात् पुंसि विकटे कारकादेश्च बुद्बुदे इति च' । "विकटं विस्तीर्णं खद्योतो ज्योतिरिङ्गण" इत्यमरः । मधुर उक्तः ॥५९॥

अनु०—श्रीकृष्णचन्द्र जी का विशाल वक्षस्थल वनमाला द्वारा विभूषित एवं दीप्तिमान् है जिसका दर्शन करने मात्र से कृशाङ्गी सुकुमारी सुन्दरियों के हृदय में अप्राकृतिक काम का उद्गम होता है अर्थात् अन्य वस्तुओं की आसक्ति त्याग कर प्रेमवती नारीगण का उसी में अनुराग बढ़ता है । वनमाला की किरणों द्वारा सहस्र सूर्यों के समान कान्तिमयी, त्रैलोक्य-मनोहर कौस्तुभ मणि भी उसी वक्षस्थल पर खद्योत की तरह हत-प्रभ सी होकर विरा-जमान है ॥५९॥

भावरूप-दोहा

वक्षस्थल छवि कृष्ण की, भक्तन कों सुख धाम ।
हंस ! जाहि लखि लजत हैं,सजल जलद अति श्याम॥५९॥

मूल की भाषा पद्य-घनाक्षरी

अति विस्तार सों विशाल वनमाल सहित,
राजत रसाल शोभा सूचक ललाम कौ।
दामिनी उद्योत कामिनीन के हरत मन,
दरशन ही तें उपजायक है काम कौ॥
कौस्तुभ मणि तेज में रवि समुदाय सम,
भुवन निकाय हेतु छवि अभिराम कौ।
ताकी हू दमक तहां जुगनू चमक जैसी,
ऐसी नील कान्तियुत वक्षस्थल श्याम कौ॥५६

सारांश-सोरठा

वक्षस्थल ब्रजचन्द कौस्तुभ-मणि वनमाल युत।
लोकन कों सुखकन्द ताकौं हंस निहारिये॥५६॥

००००

समन्तादुन्मीलद्बलभिदुपलस्तम्भयुगल-
प्रभाजैत्रं केशिद्विजलुलितकेयूरललितम्।
स्मरक्लाम्यद्गोपीपटलहठकण्ठग्रहपरं
भुजद्वन्द्वं यस्य स्फुटसुरभिगन्धं विजयते॥६०॥

टीका—बाहू वर्णयति समन्तादिति। यस्य भुजद्वन्द्वं विजयते सर्व्वोंत्कर्षेण वर्त्तते। कीदृशं समन्तात् सर्व्वतः उन्मीलन्ति प्रकाशमाना या बलभिदुपलस्तम्भयुगलस्य इन्द्रनीलमणि-पाषाण-घटितस्तम्भसमूहस्य प्रभा कान्तिस्तस्या जैत्रं जयशीलं, पुनः कीदृशं केशीति केशि नाम्ना हयाकृतिदैत्यस्य द्विजाः दन्तास्तै लुंठिते पदे नीते ये केयूरे ताभ्यां ललितं अतिमनोहरं, पुनः कीदृक् स्मरेति-स्मरेण क्लाम्यन्तीनां ग्लपितानां पटलस्य समूहस्य हठेन बलात् यः कण्ठग्रहः कण्ठग्रहणं तत्र,परं

ज्यापृतं, पुनः कीदृक् स्फुटेति-स्फुटो व्यक्तो अतिप्रकटः सुरभिः घ्राणतर्पणो गन्धो यस्य तद्, समन्तादित्यव्ययम्। "दन्त विप्राण्डजा द्विजा" इत्यमरः। "हठो विप्रतिपत्त्यां स्यात् प्रसभेऽपि चेति" विश्वः। "अथ पटलं समूहे परिवारे परिच्छेदे। छदि स्यप्रोग्रतिलके क्लीबं वन्दे पुनर्न ना इति"। सुरभिर्घ्राणेन्द्रियतुष्ट-कारको गन्धः। तथा चामरः। "सुरभि घ्राणतर्पणः" इति ॥६०॥

अनु०—जिन श्रीकृष्णचन्द्र की प्रकाशवान् इन्द्रनीलमणि के स्तंभों के समान दोनों भुजाएँ जिनमें केयूर (बाजूबन्द) शोभा पा रहे हैं और जो केशी दानव के दशनों द्वारा दष्ट हो चुकी हैं, जिनको आलिंगन तथा कण्ठ में धारण करने के लिए काम-पीड़ित व्रजांगना गण सदा उत्कण्ठित एवं तत्पर रहती हैं, वे मधुर सुगन्धि युक्त विराजमान हैं ॥६०॥

प्रागरूप—दोहा

भव्य भुजा श्रीकृष्ण की, सोहत सुखमा मूल।
रहत हंस! जो सर्वदा, भक्तन पर अनुकूल ॥६०॥

मूल की भाषा पद्य—छन्द गीतिका

रोचक प्रकट शुचि गंधयुत सब सो शिरोमणि आगरी।
सब ओर तें दीप्त सों शुभ नील मणिन उजागरी॥
जिन तें बने युग खम्भ तिनकी कान्ति जीतनहार जो।
केयूर केशीदन्त मर्दित बलित छवि निर्वार सो॥
अति काम पीड़ित गोपललना सदन सुखमा साज की।
तिन की भईं सो कंठ भूषण भुजा दोउ व्रजराज की॥

सारांश—सोरठा

भूषित रस शृङ्गार लसत वीरता सहित जे।
महिमा अमित अपार भुज बिशाल श्रीकृष्ण की ॥६०॥

००००

जिहीते साम्राज्यं जगति नवलावण्यलहरी-
परीपाकस्यान्तर्मुदितमदनावेशमधुरम् ।
नटद्भ्रूवल्लीकं स्मितनवसुधाकेलिसदनं
स्फुरन्मुक्तापंक्तिप्रतिमरदनं यस्य वदनम् ।।६१।।

टीका—श्रीमुखं वर्णयति-यस्य वदनं जगति नव लावण्यलहरी-परिपाकस्य साम्राज्यत्वात् अति-मनोहरा या लावण्यलहरी लावण्यतरङ्गस्तस्याः परिपाकः परिपूर्णता तस्याः साम्राज्यं आधिपत्यं जिहीते अधितिष्ठति प्रतिक्षण-नूतनासीमलावण्यराशिसमग्रत्वश्रेष्ठं प्राप्नोतीत्यर्थः । ततः सर्वलावण्यस्य नीचत्वात् । कीदृशं अन्तरिति अन्तर्मध्य अन्तरे मुदितस्य मदनस्य य आवेशः समस्तेन मधुरमतिमनोहरं अतिशय सौन्दर्यलाभात् मदनस्य मुदितत्वम्, पुनः कीदृशं नटन्ती लीलापरत्वात् नृत्यन्तीव भ्रूवल्लीजनता यत्र, बहुव्रीहौ कः, पुनः कीदृक् स्मितेति स्मितनवेऽति-सन्देशकुशलमेव सुधा अतिमनोहरकत्वात् अमृतं तस्या केलिसदनं लीलामन्दिरं तमेव, तत्र स्मितसुधायाः विद्यमानत्वात्, यद्वा स्मितनवसुधा च केलिकरिणा मदितायाः सदनम्,क्वचिद्व्यभिचारात् केलिशब्दस्य सम्बन्धेन प्राग्भावः । पुनः कीदृशं स्फुरदिति-शोभमाना या मुक्तापङ्क्तिस्तत् प्रतिमस्तुल्या रदना दन्ता यत्र तत् । ' जिहीते इति ओहाङ्गतौ ह्वादि:" । "लावण्यं कमनीयता" । "रदना दशना-दन्ता" इत्यमरः ।'लीला विदुः केलि-विलास-हास-शृङ्गारभाव-प्रभव-क्रियास्विति' विश्वः ।।६१।।

अनु०—जो नव-लावण्य-लहरियों के परिपाक स्वरूप अन्तः प्रमोद से विकसित एवं मदनावेश से मनोहर है जिसमें चंचल भ्रकुटिलता नृत्य करती रहती है और जो नवल-हास्य, सुधा-केलि का विलास-सदन है, जिसमें प्रकाशमयी मुक्तावलि के समान दन्त पंक्ति सुशोभित है ऐसा श्रीकृष्णचन्द्र का मुखारविन्द विराजमान है ।।६१।।

प्राग्रूप-दोहा

दर्शनीय मुख कृष्ण कौ, सो निहारियें हंस !
लोचन निज कीजै सफल, सुनिये खग अवतंस ॥६१॥

मूल की भाषा पद्य-छप्पय

शोभा लहर त्रिलोकी की अतुल सुघराई ।
नव सुन्दरता विभव कान्ति आनन पर आई ॥
मदन हर्ष अन्तर कौ दरसत सुधा केलि घर ।
रुचिर मन्द मुसकानि चपल भ्रू लता मनोहर ॥
शुचि दाँत पाँति मोतीन की सरल लड़ी शुभ साज की ।
जन प्रेमपुंज मन मोदकर मुख छवि श्री ब्रजराज की ॥६१॥

सारांश-सोरठा

भौंह लता सुख दानि राजत मुख श्रीकृष्ण पर ।
सुधा मन्द मुसकानि दाँत पाँति मोतीन सम ॥६१॥

००००

किमेभिर्व्याहारैः कलय कथयामि स्फुटमहं
सखे निःसन्देहं परिचयपदं केवलमिदम् ।
परानन्दो यस्मिन्नयनपदवीभाजि भविता
त्वया विज्ञातव्यो मधुरस्व ! सोऽयं मधुरिपुः ॥६२॥

टीका—इदानीं "पादादियावद्धसितं गदाभृत" इति कविनोक्तक्रमेण मुखपर्यन्तं विवरण परानन्दो तदत्र परमं चिन्हमिति तद्लोकेषुपसंहरति किमेभिरिति । हे सखे एभिर्व्याहारैः क्रमपरिचयकथाभिः किं, न किञ्चिदित्यर्थः । निःसन्देहं यथा स्यात् स्फुटं व्यक्तं इदं परिचयपदं परिचयस्य चिन्हं कथयामि शृणु, केवलं अव्यभिचारिकं तदित्याह-यस्मिन्निति यस्मिन् जने नयनपदवीभाजि सति परानन्दो भविता, हे मधुरस्व ! हे

मधुरध्वान ! सोऽयं मधुरिपुः श्रीकृष्ण इति त्वया ज्ञातव्यः, इति शब्द-स्याध्याहारः । पदवी-शब्दोपादानेन भास्तां तावदखिलाङ्गस्य लावण्यानुभववार्त्ता चक्षुः गोचर एव परमानन्दप्रकाशो भवतीति ध्वनितम् । "व्याहार उक्ति र्लपितमित्यमरः" । "पदं शब्दे च वाक्ये च व्यवसायापदेशयोः । पादतच्चिह्नयोः स्थानत्राणयोः वस्तुवस्तुनोरिति" मेदिनी । "केवलः कुहने पुमान् नपुंसकस्तु निर्णीते । वाच्यवाचककृत्स्नयोरिति" च । परा-शब्दोपादानादस्य चाह्लादानन्दता ध्वनिता ॥६२॥

अनु०—हे मधुरभाषी, मधुर शब्दकारी सखे ! अब मुझको तुमसे विशेष कथन की आवश्यकता नहीं है, सुनो, मैं जिससे स्पष्टरूपेण श्रीकृष्णचन्द्र पहचाने जा सकें ऐसा चिह्न बतलाती हूँ । जिसके दर्शन मात्र से तुम्हारे हृदय में आनन्द का उद्रेक हो जावे उन्हे तुम जान लेना कि ये ही श्रीकृष्णचन्द्र हैं । इस श्लोक से श्रीकृष्ण का आनन्द-घन-विग्रह होना ध्वनित होता है । श्रुति में कहा है:—'रसो वै सः, रसं ह्येवाऽयं लब्ध्वा आनन्दी भवति ।' उसी अभिप्राय से भगवान् बादरायण ने कहा है—'आनन्द मयोऽभ्यासात्' श्रीमद्भागवत् में—'आनन्दमूर्त्तिमुपगुह्य' ऐसा कहा है और ब्रह्म-संहिता में भी 'सच्चिदानन्द विग्रहः' ऐसा कहा है । महाभारत में श्रीकृष्ण शब्द की निरुक्तिः—'कृषिर्भू वाचकः शब्दः णस्तु निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ।' ऐसा कहा है ॥६२॥

प्राग्रूप—दोहा

ललिता बरनत हंस सों, प्रकट चिह्न हरि रूप ।
पहले जो बर्णन किये, तिन तें पृथक अनूप ॥६२॥

मूल की भाषा पद्य—छन्द दोवै

हे प्रिय हंस मधुर स्वर ! मैंने जो ये अङ्ग गनाये ।
इनकौ कहा कथन सुनिये अब कहत चिह्न प्रगटाये ॥

जा पुरुषहि निरखत दृग पावहिं परमानन्द तुम्हारे।
जानन योग्य तुमहिँ सोई मधुसूदन नन्द दुलारे ॥६२॥

सारांश—सोरठा

होय परम आनन्द जिन के दर्शन मात्र सों।
भक्त जनन सुख कन्द कृष्णचन्द्र सो जानिये ॥६२॥

००००

विलोकेथाः कृष्णं मदकलमरालीरतिकला—
विदग्ध व्यामुग्धं यदि पुरवधूविभ्रमभरैः।
तदा नास्मान्ग्राम्याः श्रवणपदवीं तस्य गमयेः
सुधापूर्णं चेतः कथमपि न तक्रं मृगयते ॥६३॥

टीका—अनवसरे कथनं निषेधति विलोकेथा इति। हे मदकलमराली-रतिकलाविदग्ध! मदेन मत्ततया कलरवासक्ता या मराली हंसी तस्या रतिकलासु विदग्ध पण्डित! एतेन हंसस्यापि उत्तमनायिकारतिविदग्धत्वात् भवानपि सर्वं वेत्तीत्युक्तम्। यदि पुरवधूविभ्रमभरैः मथुरास्त्रीणां विलासभरैः व्यामुग्धं आक्षिप्तचित्तं कृष्णं विलोकेथाः द्रक्ष्यसि तदा अस्मान् गोपीः तस्य, रतिकलासु विदग्ध! पण्डित! एतेन हंसस्यापि। श्रवणपदवीं न गमयेः कर्णपथं न प्रापयेः। नास्मान् कथयिष्यतीति भावः। तत्र हेतुः अस्मान् कीदृशीः यतो ग्राम्या ग्राम्यत्वात् लीलाविलासचातुर्याभाव उक्तः। अर्थान्तरोपन्यासमाह-सुधापूर्णं अमृतेन पूर्णं चेतः कथमपि कदाचिदपि तक्रं न मृगयति न वाञ्छतीत्यर्थः। तत्र नागरस्त्रीविभ्रमाक्षिप्तचेतसः श्रीकृष्णस्य ग्राम्याणां गोपीनां कथास्वादाय न भविष्यतीति प्रस्तुतस्य तत् साधनायास्योपन्यासादर्थान्तरोन्यासोऽयम्। तथा च दण्डी—"ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन। तत् साधनसमर्थस्य न्यासो योऽन्यस्तु वस्तुन" इति। तथा च भरतः—"बाहुमूलं स्तनं नाभीमुरुमूलञ्च मेखलाम्। व्याजतो

दर्शयेत् यत्र रसोऽसौ विभ्रमो मतः" इति । मुग्धपदोपादानेन सुरतसूचकानामेवोपस्थानात् विभ्रमस्तु सुरतसूचक एव । तथा चोक्तं– "नीवीमोचनवद्धो मुहुर्मुहु जृम्भा च संश्लेषः । स्वाधरदानग्रहणं चालकपरिचुम्बनं रतोत्सुकेति" । "अपि सम्भावना-प्रश्न-शङ्का-गर्हा-समुच्चये । तथा युक्तपदार्थे च कामचारक्रियासु चेति" विश्वः ॥६३॥

अनु०—हे रसिक ! तुम मदमत्त मरालियों के साथ विलास में रसिक हो अतएव रसानुकूल आचरण विज्ञान में भी निपुण हो इस कारण यदि तुम श्रीकृष्णचन्द्र को मथुरा नगर की सुन्दरियों के विलास में आसक्त पावो तो हम अरसिका, वन–वासिनियों की कथा उनके सन्मुख प्रगट मत करना, कारण कि ऐसा करने से उनके विलासानन्द में विघ्न पहोंचेगा क्योंकि जो लोग अमृत पान करते हैं वे छाछ को क्यों खोजने लगे ? अर्थात् श्रेष्ठ वस्तु पाने पर निकृष्ट का कौन आदर करता है । मथुरापुरी की रसिक सुन्दरियों को पाकर अब श्रीकृष्ण हम वनवासिनियों की याद भूल गए हैं ॥६३॥

भावरूप–दोहा

फिर फिर तुम सों कहत हौं, करौ हंस ! निर्धार ।
समाचार यह कृष्ण सों; कहियो समय विचार ॥६३॥

मूल की भाषा पद्य-छन्द गीतिका

हे मत्त हंसी रमण में अति चतुर हंस ! सँदेश ये ।
कहिये न सहसा कृष्ण सों धरि धीर अवसर देखिये ॥
पुर बधुन हास विलास तत्पर होंहि गहिये मौन कों ।
कोउ छक्यौ अमृत सों न खोजत चूक रुचि शुचि होन कों॥६३

सारांश–सोरठा

जानिय हंस सुजान ! अभिप्राय मम कथन कौ ।
सन्मुख पुर अवलान कहियो जिन सन्देश यह ॥६३॥

यदा वृन्दारण्यस्मरणलहरीहेतुरमलं
पिकानां वेवेष्टि प्रतिहरितमुच्चैः कुहुरितम्।
वहन्ते वा वाताः स्फुरितगिरिमल्लीपरिमला-
स्तदैवास्माकीनां गिरमुपहरेथाः मुरभिदे ॥६४॥

टीका—कथनावसरमाह यदिति। यदा पिकानां कोकिलानां उच्चैः कुहुरुतं कुहुरिति ध्वनिः प्रतिहरितं दिशि दिशि वेवेष्टि व्याप्नोति, कीदृशं वृन्दारण्यस्मरणलहरी ग्रतिशयस्मरणं स्मरणस्य धारावाहित्वसूचनाय लहरीशब्दोपन्यासः। पूर्व्वानुभूतत्वात्तस्या हेतुः, पुनः कीदृक् अमलं रसोर्जितत्वात् पञ्चमत्वाच्च। तथा चोक्तं-"पुष्पस्य धारणे काले पञ्चमं रौति कोकिल" इति। यदा वाता वहन्ते वाताः कीदृशाः स्फुरितेति स्फुरिता या गिरिमल्ल्यः कुटजपुष्पाणि ताभिः परिमलः सुरभिगन्धो येषु ते। अन्येष्वपि पुष्पेषु सत्सु वृन्दावनेऽतिशयानुभूतवनपुष्पत्वात् वनस्य वा पादानां अयमपि वृन्दावनस्मरणहेतुः। तदा आस्माकीनां अस्मत् सम्बन्धीनां गिरं मुरभिदे श्रीकृष्णाय उपहरेथाः। उपढौकिनी कुर्य्या इति पूर्व्वोक्तश्लोकानां सम्बन्धः ॥६४॥

अनु०—जब वृन्दावन की स्मृति उदय होने का कारण स्वरूप मथुरा नगरी में जब कोकिल का कुहूरव कर्णगत होगा एवं विकसित-मल्लिका-सुरभित-पवन प्रवाहित होगा इन सब कारणों से जब उनके हृदय में वृन्दावन की स्मृति जाग्रत हो उठे उस समय हे हंस! तुम हमारे सन्देश को श्रीकृष्णचन्द्र के निकट निवेदन करना अर्थात् अन्य समय वे हमें क्यों स्मरण करने लगे; किन्तु जब कुहूरव, सुरभित-पवन जो कि वृन्दावन की विशिष्ट सम्पत्ति है, वह उस स्थान पर यदि सम्भव हो सकेगी तो कहीं श्रीकृष्ण के हृदय में व्रजस्थली की स्मृति जाग्रत हो सकती है। ऐसी दशा में शायद उनको हमारी याद अवश्य आवेगी ॥६४॥

प्राग्रूप दोहा

हंस ! हमारौ हित धरें, निज चित परम उदार।
यह सँदेश श्रीकृष्ण सों, कहियों समय विचार ॥६४॥

मूल की भाषा पद्य—छन्द गीतिका

कुहु कुहु करें कोकिल विमल सब दिशन ऊँचे सुरव लहैं।
अथवा प्रकाशित-पवन गिरमल्लीन की परिमल बहैं॥
तब होय वृन्दा विपिन की सुधि कृष्ण के चित आय के।
मुरमथन सों कहियो सँदेसौ समय ऐसौ पाय के॥६४॥

सारांश—सोरठा

कोकिल मधुर अलाप करें बहैं सुरभित पवन।
करै काम जग ताप तब सँदेस हरि सों कहौ॥६४॥

००००

पुरा तिष्ठन् गोष्ठे निखिलरमणीभ्यः प्रियतया
भवान् यस्यां गोपीरमण विदधे गौरवभरम्।
सखी तस्या विज्ञापयति ललिता धीरललित
प्रणम्य श्रीपादाम्बुजकनकपीठीपरिसरे ॥६५॥

टीका—अथ राधाया विरहावस्थां कथितुं प्रथमं तावदात्मनः प्रणाम-वक्तुमुपदिशति । हे धीरललित ! श्रीकृष्ण ! तस्या राधायाः सखी ललिता नाम्नी श्रीपादाम्बुजकनकपीठीपरिसरे श्रीपादाम्बुजयोः या कनकपीठीका तस्याः परिसरे प्रान्तदेशे सभयतया समीपे गमनाभावात् प्रणम्य विज्ञापयति वक्ष्यमाणानीति शेषः । ननु राधिका इति चेत् तत्राहपुरेति । पुरा पूर्वं गोष्ठे व्रजे तिष्ठन् हे गोपीरमण ! स्वातन्त्र्येणा-त्मवल्लभतां द्योतयितुं सम्बोधयति । किञ्च आत्मकान्तापरित्यागे दोष-

बाहुल्यं नैपुण्यञ्च सूचितम् । निखिलरमणीभ्य अपेक्ष्येति "यजमर्भा-दित्वात्" पञ्चमी । यद्वा "बहुवचनात् क्वचित् पञ्चमी चेति" निर्द्धा-रणार्थे पञ्चमी । गोपीनां मध्य इत्यर्थः । यस्यां राधायां भवान् गौरव-भरं गौरवातिशयं विदधे कृतवान् । धीरललितो यथा—"निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यादिति" । अस्मात् विहाय निश्चि-न्तत्वात् सतत-कलापरत्वाच्च धीरललितत्वम् । चतुर्विधाः नायकाः भवन्ति । धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च । धीरप्रशान्त इति तत्रायं धीरललित इति ॥६२॥

अनु०—हे धीरललित, हे गोपीजन रमण ! क्या उन गोपियों को आप भूल गए ? आप तो चिरकाल से ही प्रेमिकाओं के प्रेम के वशीभूत हैं । प्रथम ब्रजवास के समय, गोपीगण में से जिसके साथ आपका प्रेम अधिक था और जिसे 'प्रियतमा' कहकर विशेष सम्मान प्रदान किया था, उसी राधा की सखी यह ललिता आप के श्रीचरणों के कनक-मण्डित पाद-पीठ के निकट प्रणाम करती हुई यह निवेदन करती है ॥६५॥

प्राग्रूप-दोहा

ललिता हरि सौं मिलन कौ, हंसहि समय बताय ।
अपनी सुधि करवावती, पिछली कथा सुनाय ॥६५॥

मूल की भाषा पद्य—छप्पय

हे गोपीजन रमण ! आप जब हे ब्रज माहीँ ।
राधा सौं जो हित हो, आनि तियन सन नाहीँ ॥
धीर ललित ! सब भांति तासों सुख मान्यौ ।
तासु सखी मैं ललिता यह निज नाम बखान्यौ ॥
चरण कमल मृदु आप के जा कंचन चौकी पै लसैं ।
ता निकट निवेदन करत मैं, करि प्रणाम हित उर बसैं ॥६५॥

सारांश-सोरठा

पिछली सुधि करवाय ललिता अपनौ नाम कहि।
करि प्रणाम शिर नाय करत प्रार्थना कृष्ण प्रति ॥६५॥

००००

प्रयत्नादाबाल्यं नवकमलिनीपल्लवकुलै-
स्त्वया भूयो यस्याः कृतमहह सम्वर्द्धनमभूत्।
चिरादूधोभारस्फुरणगरिमाक्रान्तजघना
बभूव प्रष्ठौही मुरमथन सेयं कपिलिका ॥६६॥

टीका—प्रथमं तावन्निजावस्थाकथने धाष्टर्यमाशङ्क्य श्रीकृष्णेन प्रयत्नाद्वर्द्धितानां गवादीनामवस्थामाह प्रयत्नादिति। हे मुरमथन! सेयं कपिलीका कपिला नाम्नी प्रष्ठौहीबाल् गर्भिणी बभूव। बाला चासौ गर्भिणी चेति कर्म्मधारय:। प्रथमगर्भयुक्तेत्यर्थ:। कीदृशी चिरात् चिरकालं व्याप्य ऊधोभारस्य आपीनमारभ्य यत् स्फुरणं स्फुरितत्वं तस्य गरिमा गुरुत्वं तेन आक्रान्ते श्रमान्विते जघने यस्या:, तस्यायत्नातिशयं कथयन्ती तद्दर्शनार्थमागमनमुचितमित्यभिप्रेत्याह-प्रयत्नादिति आरभ्य बाल्यमभिव्याप्य नवकमलिनीपल्लवकुलै: नूतनपद्मपत्रसमूहै: त्वया भूय: प्रचुरं यथा स्यात्तथा यस्या: कपिलाया: सम्वर्द्धनं स्नेहेनानुकूलनं कृतमभूत्। अहह इति एतादृशीमपि प्रणयपात्रीं विस्मृत्य तरांस्तत्र तिष्ठतीति खेद:। "अहहेत्यद्भुते खेदे" इत्यमर:। "प्रष्ठौही बा बालगर्भिणीति च" ॥६६॥

अनु०—अब व्रजवास की अतीत स्मृति को उद्दीपित करती हुई श्रीललिता हंस को यह सन्देश सुनाने का आदेश करती है—'हे कृष्ण! बाल्य काल से ही आप जिस कपिला गौ को नूतन कमल पत्रों से लालन पालन किया करते थे, उस प्रथम गर्भिणी कपिला का स्तन वृद्धि के कारण जघन-देश अति भाराक्रान्त हो

है, इस कारण एक बार आप यहां आकर उसकी अ
ना का निरीक्षण तो कर जाओ यही श्रीललिता के वचन
प्राय एवं इनकी अभिलाषा है ॥६६॥

प्रागूरूप—दोहा

पुनि मराल सों करत है, ललिता यह संकेत।
कृष्णचन्द्र सों जाय के, कहिये विनय समेत ॥६३॥

मूल की भाषा पद्य—छन्द दोवै

कपिल वर्ण बछिया वहु जतननि बालकाल तें पाली।
प्रति दिन रहे चुगावत ताकों नूतन पात मृनाली ॥
सो अब भई गर्भिणी, अतिशय जंघा ताकी भारी।
होत खेद चलिवे में वाकों लखिये आय मुरारी ॥६६

सारांश—सोरठा

व्याहैगी तत्काल गाय गर्भिणी दिनन की।
आय सपद् गोपाल लीजै गोरस रसिक वर ॥६६॥

००००

समीपे नीपानां त्रिचतुरदला हंत गमिता
त्वया या माकन्दप्रियसहचरीभावनियतिम् ।
इयं सा वासन्ती गलदमलमाध्वीकपटली-
मिषादग्रे गोपीरमण रुदती रोदयति नः ॥६७॥

—श्रीकृष्णेनारोपितां वासन्तीं स्मरयति समीप इति । हे गं
! सेयं वासन्ती माधवीलता अग्रे पुरतः गलद्गमलमाध्वीकपट
त् वरन्निर्म्मलमधुधाराकुलकुलास् रुदती सती नोऽस्मान् रोद
ो विरहेण रुदतीं वासन्तीं वीद्यास्माकं स्मरणात् रोदनं भव

त्युक्तम् । तस्मात् 'अस्या विरहापनोदनाय अवश्यमेव गन्तव्यमिति ध्वनितम् । इयं कीदृशी या वासन्ती हन्त इति खेदे, त्रिचतुरदला, नीपानां कदम्बानां समीपे माकन्दप्रियसहचरीभावनियतिं त्वया गमिता, माकन्द आम्रवृक्षस्तस्य पत्नीभावस्य नियतिं विधानं तत्र रोपितो माकन्दः वासन्तीकन्यकया आलिङ्गित इव श्रीकृष्णस्तु स्वयं पितैव, अतो ऽतिस्नेहपरत्वाद्गागमनमाचिह्नम् । त्रिचतुरदलत्वेनातिबालत्वं युक्तम् । "माकन्दः सहकारेऽस्त्री रात्रीनगरभेदयोरिति" मेदिनी । "प्रियस्तु स्पर्शन-व्याजे" इति विश्वः ॥६७॥

अनु०—हे गोपीरमण ! हे गोपिकानन्दनवर्द्धन ! आपके व्रज-वास के समय कदम्ब वृक्षों के निकट वाली जिस-माधवी लता मे तीन-चार पत्रों का उद्गम हुआ था और तुम जिसे आम्रवृक्ष की प्रिय-सहचरी बना गए थे अर्थात् आम्रतरु के साथ जिसकी जोड़ी मिला गए थे, वही वासन्ती लता आज हमारे सन्मुख विमल, मकरन्द-धारा वर्षण के मिष मानों तुम्हारे विरह में रोदन करती हुई हम सबों को भी रुला रही है । अर्थात् तुम्हारी विरह-वेदना हृदय में गंभीर भाव से प्रगट होकर हम सबको शोकाकुल कर रही है ॥६७॥

प्रागूरूप-दोहा

फूली लखि तरु अरु लता, बढ़ी मदन तन ज्वाल ।
बरनत ललिता हंस प्रति, विरह व्यथा व्रजबाल ॥६७॥

मूल की भाषा पद्य—छप्पय

हे गोपीजन रमन ! कदम्बन थल नियराये ।
लता माधवी तीन चार दल जामें आये ॥
कियौ आपनें ताकौ व्याह आम्र पादप सँग ।
सो अब प्रफुलित भई भरत मकरन्द पहुप अँग ॥

मानौ या मिस रावरे दरस हेतु रोदन करत।
और रुआवत हमहुँ कों दृगन नीर निस दिन झरत ॥६७॥

सारांश–सोरठा

नूतन निकट रसाल फूली वासन्ती लता।
ताहि निरखि ब्रजबाल दुखित होत हरि ! आप बिनु॥६७॥

००००

प्रसूतो देवक्या मधुमथन यः कोपि पुरुषः
स जातो गोपालाभ्युदयपरमानन्दवसतिः।
धृतो यो गान्दिन्या कठिनजठरे सम्प्रति ततः
समन्तादेवास्तं शिव शिव गता गोकुलकथा ॥६८॥

टीका—अतिकरुणास्य तवास्मान् परित्यागस्तु अक्रूरदोषेणेत्यादि अक्रूरमाक्षिपति प्रसूत इति। हे मधुमथन ! देवक्या यः कोऽपि मनोवचनागोचरः पुरुषः प्रसूतः स गोपालाभ्युदयपरमानन्दवसतिः गोपाणामभ्युदयः अभीष्टस्तत्सहितस्तेन वा यः परमानन्दस्तस्य वसति र्निलयो जातः। अनेन धन्या सा देवकी या परोपकारकः प्रसूत इति ध्वनितम्। गान्दिन्या कठिनजठरे यो धृतः ततो हेतोः सम्प्रति इदानीं शिव शिव इति खेदे गोकुलकथा सर्वत एव अस्तं गता, कठिनजठराद्भूतत्वात् सोऽप्यतिकठिनः, यतः उक्तं—"कारणगुणाः कार्य्यगुणानारभन्ते" इति एतेन त्वया बिना सर्वेषामेव ब्रजवासिनां महती विपत् इत्युक्तम् ॥६८॥

अनु०—हे मुरारे ! देवकी से उत्पन्न हुआ कोई पुरुष जो गोपगण का अभीष्ट विषय एवं मंगलों का निधान तथा आनन्द का निवास स्थल हो चुका था अर्थात् वह गोपगणों की अभिलाषाएं पूर्ण करके उनको आनन्द-प्रदान किया करता था। सो गान्दिनी के कठोर जठर से उत्पन्न हुए, नाम ग्रहण के भी अयोग्य

ऐसे क्रूर अक्रूर ने "हाय, हाय, आज गोकुल की कथा ही विलुप्त करदी ! अर्थात् गोकुल का लीला-माधुर्य एवं प्रेम विलास तो दूर रहा, उसकी चर्चा, उसकी बात ही अब विनष्ट हो गई। श्रीकृष्ण ने गोकुल में कोई लीलायें की थीं उनकी स्मृति ही अतीत के गर्भ में विलीन हो गई ॥६८॥

प्राग्रूपदोहा

सब प्रकार आनन्द प्रद, गोप वृन्द के आप।
दीनौ यह अक्रूर नें, हमहिँ विरह सन्ताप ॥६८॥

मूल की भाषा पद्य-छन्द दोवै

हे मधुमथन ! देवकी नें तुम सुत विचित्र जन्माये।
गोपालन कौ भाग्य जग्यौ आनन्द सदन मन भाये॥
कठिन गर्भ गान्दिनि तें प्रकटे जग अक्रूर अमाने।
शिव शिव जिन तें गोकुल के सब सुख सबाद सिपाने ॥६८॥

सारांश-सोरठा

प्रकटे मर्धारिपु आप गोप जनन कल्याण हित।
दारुण दुःख कलाप भये हेतु अक्रूर हैं ॥६८॥

००००

अरिष्टेनोद्धूताः पशुपसुदृशो यान्ति विपदं
तृणावर्त्ताक्रान्तो रचयति भयं चत्वरचयः।
अमी व्योमीभूता व्रजवसति-भूमीपरिसरा
वहन्ते नस्तापं मुरहर विदूरं त्वयि गते ॥६६॥

टीका—त्वां विना त्वया निहता अपि दानवाः तां जयन्तीति कोपमुदी-पयन्ति आह अरिष्टेनेत्यादि। हे मुरहर ! त्वयि विदूरं गते सति पशु-पसुदृशो गोपरमण्यः अरिष्टेन अरिष्टासुरेण उद्धृताः कम्पिताः सत्यः विपदं विनाशं यान्ति, अथ च अरिष्टेन अशुभेन त्वया विना सर्वगोप्य

अशुभाक्रान्ता नाशं यान्ति । अथवा इदानीं गोपीनामीदृक् कार्श्यं यत् अरिष्टेन काकेन कङ्केन वा उद्धूताः पवनवालचलिता अपि सत्यः विपदं वीनां पक्षीणां पदं स्थानं आकाशं यान्ति । एतेन केवलमस्थिचर्मावशिष्टा सत्यः त्वदागमनप्रत्याशया प्राणान् धारयन्तीति दशमावस्थां प्राप्तप्राया इत्युक्तम् । चत्वरचयः चत्वराणि तृणावर्त्तनासुरेणाक्रान्तः सभयं रचयति जनयति, अथच तृणावर्त्तः परिणामः तेनाक्रान्तः चत्वरेषु त्वां विना जनानामवस्थानाभावात् सर्व्वतस्तृणानि जातानि, अतः कान्ततया तदालोकः स्त्रीणां भयं भवतीत्यर्थः । अमी व्रजवसतिभूमिपरिसराः व्रजप्रान्तदेशाः व्योमीभूता जाता नोऽस्माकं तापं वहन्ते कुर्व्वन्ति अतिभयाकुलतया सर्व्वत्र तस्यालोकनात्, अथच व्योमीभूता शून्यीभूता भवद्भिरहेण सर्वशून्यप्राया अवलाकारणात् मनस्तापः । "अरिष्टः फेनिले निम्बे अशुभे काककङ्कयोः । अरिष्टं सूतिकागारे तक्रे चिन्हे शुभाशुभे । अरिष्टं रिष्टमित्युक्तमविवृषभयोः मतः" इत्यनेकार्थध्वनिमञ्जरी ॥६६॥

अनु०—हे मुरारे ! आपके दूर देश मधुपुरी चले जाने पर अब अरिष्टासुर द्वारा युद्धार्थ आह्वान की हुई गोप-सुन्दरी गण बड़े विपद में पड़ गई हैं एवं यहां के सभी चौराहे तृणावर्त्त असुर के भय से आक्रान्त हो भयानक प्रतीत होते हैं । प्रायः इस वृन्दावन का समस्त सीमा-प्रदेश व्योमासुर द्वारा अधिकृत हो जाने से हमारे मन को पीड़ा एवं उद्वेग उत्पन्न कर रहा है ! पक्षान्तर में इस पद्य की यह व्याख्या हो सकती है कि—तुम्हारे मधुपुरी चले जाने पर गोपीगण, आसन्न अशुभ-सूचक चिन्ह देखकर व्याकुल हो रही हैं, चौराहे धूलि-तृण-पुञ्ज-पूर्ण भयानक होरहे हैं और तो क्या समग्र व्रज-मण्डल ही शून्य दीखने से सन्तापजनक हो रहा है ॥६६॥

आगूल्प-दोहा

शून्य दशा जैसी भई, हरि बिन ब्रज की हंस।
कहिये उन सों जाय के, तैसी खग अवतंस ॥६६॥

मूल की भाषा पद्य-छप्पय

विपति ग्रसी अति दुखित अरिष्टासुर सों गोपी।
रहत भयंकर तृणावर्त्त गति हम पर रोपी॥
बसत रही जो सघन सदा सों ब्रज की धरनी।
सो अब व्योमासुर सम लागत है भय बदनी॥
तजि गये दूर जब तें रह्यौ हम सब कौ दुख मय कथन।
अब होत शुभागम आप के, मिटहि ताप हे मुर मथन ॥६६

तात्पर्य-बरवै छन्द

बछरा परत अरिष्टासुर सम जान,
तृणावर्त सम होत भभूरे भान
व्योमासुर लौं यह ब्रज भूमि लखात,
कृष्ण विरह सों जरत हमारे गात
आय मिटाओ गोपिन कौ सब क्लेश,
कहौ हंस तुम हरि सों यह सन्देश॥५

००००

त्वया नागन्तव्यं कथमपि हरे! गोष्ठमधुना
लताश्रेणी वृन्दावनभुवि यतोऽभूद्विषमयी।
प्रसूनानां गन्धं कथमितरथा वातनिहितं
भजन् सद्यो मूर्च्छां वहति निवहो गोपसुदृशां ॥७०

टीका—आगमननिषेधव्याजेन स्वं स्वं दशां व्यञ्जयन्ती तस्य झटित्या-
गमनसम्भ्रममेवाभिप्रेत्याह त्वया इति। हे हरे! कथमपि-कदाचिदपि

गोष्ठं त्वया नागन्तव्यं तत्र हेतुमाह लतेति । यतो वृन्दावनभुवि लता-श्रेणी अधुना इदानीं विषमयी अभूत् , तत्र लिङ्गमाह—इतरथा अन्यथा गोपसुदृशां निवहः गोपीचयः वातनिहितं पवनेनार्पितं प्रसूनानां गन्धं भजन् कथं सपदस्तत्क्षणमेव मूर्च्छां वहति प्राप्नोति । नहि विषमयं बिना दूरात् पवनानीतगन्धभजनमात्रेण मूर्च्छा भवति, तस्मात् विषमयमेव । गोपसुदृशामित्युक्त्या पुंसां मूर्च्छाया अभावात् विरहजनितमूर्च्छा वा ध्वनिता ॥७०॥

अनु०—हे हरे ! अब आपको इस गो गोप-स्थल वृन्दावन में नहीं आना चाहिए, कारण कि वृन्दावन का लता-समूह अब विषाक्त होगया है । यदि ऐसा न होता तो वायु द्वारा प्रेरित उनका गन्ध ग्रहण करके ये व्रज-सुन्दरीगण मूर्च्छा दशा को क्यों कर प्राप्त होती ? तात्पर्य यह है कि—गोपी-गण की मूर्च्छा का कारण कृष्ण-विरह ही है । विषाक्त पुष्प-गन्ध के आघ्राण छल से श्री-कृष्ण-विरह का विषवत् प्रभाव व्यञ्जित होता है ॥७०॥

प्रागरूप-दोहा

आप न आवेंगे यहां, भयौ हमहिँ बिस्वास ।
करत हंस सों कृष्ण प्रति, ललिता बचन विलास ॥७०॥

मूल की भाषा पद्य-छन्द गीतिका

हे कृष्ण ! अब नहिँ आय हौ व्रज, बात यह निहचै भयी ।
तुम जानि वृन्दावन धरनि की लता पाँतिन विषमयी ॥
यदि ये हलाहल युत नहीं तौ सुमन गंध समीर ह्वै ।
क्त गोपिका होतीं तुरत मूर्छित अधीर शरीर ह्वै ॥७०॥

सारांश-सोरठा

करहिँ न कबहुँ प्रमान लता पांति व्रज विष भरी ।
ये सब सुधा समान होंहि आप के दरश सों ॥७०॥

००००

कथं सङ्गोऽस्माभिः सह समुचितः संप्रति हरे !
वयं ग्राम्या नार्यस्त्वमसि नृपकन्यार्चितपदः ।
गतः कालो यस्मिन् पशुपरमणीसङ्गमकृते
भवान् व्यग्रस्तस्थौ तमपि गृहवाटीविटपिनि ॥७१॥

टीका—अन्तराविष्कृतक्रोधा सोल्लुण्ठमाह कथमिति । हे हरे ! सम्प्रति इदानीं अस्माभिः सह सङ्गम अर्थात् भवतः कथं समुचितः, नैवेत्यर्थः । "सम्प्रति" पदोपादानात् तदानीं समुचित आसीदित्युक्तम् । तत्र हेतुमाह-वयं ग्राम्या आत्मविदग्धा इत्यर्थः । त्वं नृपकन्याभिरर्चितौ सेवितौ पादौ यस्येति, अतोऽयोग्या अधीरत्वात् क्रोधं सम्वरितुमसमर्था, गत इति-स कालो गतः अतीतः कोऽसौ कालः इत्यत आह-यस्मिन् काले पशुपरमणीसङ्गमकृते गोपीनां सङ्गमकृते गोपीनां सङ्गमार्थं व्यग्रः सन् निशि निशि भवान् वहिः सीमनि सीमान्ते जजागार जागरितवान् व्यग्रस्तस्थौ । तमसि गृहवाटीविटपिनि इति चतुर्थचरणे क्वापि पाठः । तदायमर्थः—तमसि अन्धकारे गृहवाटीविपिने गृहसमीपे वाटिकायां वृक्षे व्यग्रः सन् निशि निशि भवान् वहिः सीमनि सीमान्ते जजागार जागरितवान् व्यग्रस्तस्थौ इत्यन्वयः । एतेन इदानीमेव महत्त्वं भवत इत्युक्तम् । इयं धीराधीरानायिका तथा चोक्तं—"धीराधीरा तु सोल्लुण्ठभाषितैः खेदयत्यमुम्" अमुं नायकमित्यर्थः ॥७१॥

अनु०—हे हरे ! अब हम लोगों का सङ्ग करना क्या आपको उचित है ? अर्थात् अब आप हमारे साथ रहना क्यों उचित समझेंगे । कारण कि, हम अविदग्धा (ग्राम्य) वन वासिनी नारी हैं एवं आपके चरणों की सेवा मथुरा पुरी की राजकन्याएँ करती होंगी । हाय ! वह समय अब नहीं रहा जब आप गोपी मिलन की आशा से अर्थात् श्री राधिका का संग-सुख लाभ करने के लिए निशीथ के अन्धकार में सघन पल्लवावृत, वृक्ष-तल प्रदेश में उत्क-

ुत ही प्रतीक्षा किया करते थे ! ज्ञात होता है पहली बातें आ
ति-पटल पर उदय भी नहीं होती होंगी ? कारण कि, अब
प राजकन्या-गण की सेवा प्राप्त करते हैं । उत्कृष्ट वस्तु
ने पर निकृष्ट का आदर कौन करै ? ॥७१॥

आगरूप-दोहा

ललिता हंसहि सजग करि, कहत कृष्ण के काज ।
सब गोपिन की ओर सों विनय यहै ब्रजराज ॥७१॥

मूल की भाषा पद्य-छप्पय

उचित कौन बिधि साथ आपके रहन हमारी ।
हे हरि ! हम हैं सरल हृदय अत्यन्त गँवारी ॥
अब पद सेवा करत आपकी राज कुमारी ।
बीत गयौ वह समय जबै गलियन अँधियारी॥
तुम सदन वाटिका तरुन तर गोपिन संग बिहार हित ।
नित ठाढ़े जोवत बाट हे आतुर ह्वै आसक्त चित ॥७१॥

सारांश-सोरठा

नाहिं समय वह आज बीथिन बाट निहारते ।
आवत होगी लाज सुधि कीन्हे ता काल की ॥७१॥

००००

वयं त्यक्ताः स्वामिन् यदिह तव किं दूषणमिदं
निसर्गः श्यामानामयमतितरां दुष्परिहरः ।
कुहूकण्ठैराण्डावधि सह निवासात् परिचिता
विसृज्यन्ते सद्यः कलितनवपक्षो बलिभुजः ॥७२॥

—तवास्मत्त्यागे श्यामता एव दोष इत्याह वयमित्यादि । हे स्व
! वयं त्यक्ता अर्थक्रियात्वादिह कर्म्मणि क्तः, इदं किं तव दूषणं दो

नैवेत्यर्थः । तर्हि कस्यायं दोष इति चेत्तत्राह निसर्ग इति । श्यामानां मलीनानां अयं अतितरां दुष्परिहरो दुस्त्यज्यो दोष इति, कोऽसौ दोष इति सदृष्टान्तमाह-कुहूकण्ठैरिति कुहूकण्ठैः कोकिलैः अण्डावधि डिम्भावधि कृत्वा सहनिवासात् एकत्र वासाद्धेतोः परिचिताः बलिभुजः काकाः कलितनवपक्षैः संजातनूतनपत्रैः सद्भिः सपरतरत्वरणमेव विसृज्यन्ते त्यज्यन्ते कोकिलाः श्यामाः भवानपि श्यामः अतो नैसर्गिकोऽयं दोषः कथं त्याज्यः, एतेन बाल्यावधि गोपपालितस्य तत्त्यागात् कृतघ्नश्च ध्वनितः । तथा च भवता दशमे-"आप्तकामा ह्याप्तकामा अकृतज्ञा गुरुद्रुह"इति । श्यामानामिति सम्बन्धे षष्ठी । 'अण्डं मुष्के चापं स्यादिति" मेदिनी । "ध्वाङ्क्षात्मघोष-परभृद्वलिभुक्वायसा अपि" इत्यमरः॥७२॥

अनु०—हे नाथ ! आपके द्वारा हम परित्याग की जा चुकी हैं, क्या यह निन्दनीय बात है ? अर्थात् हमें त्याग कर देने से जगत् में आपको कोई दोष नहीं देगा ? कारण कि, श्यामरंग वालों की तो यह स्वाभाविक सी बात है ! देखो, कोकिल-गण, बाल्य काल में काकों के दिए हुए आहार से पुष्ट होती हैं किन्तु पंख निकल आने पर अर्थात् उड़ने की सामर्थ्य होने पर तत्काल उन काकों का संग छोड़ चली जाती हैं ! ध्वनि, अनुध्वनि पूर्ण इस पद्य में श्रीकृष्ण का चित्त-काठिन्य तथा प्रेम-औदास्य आदि अनेक आदेय प्रतीत होते हैं ॥७२॥

प्रागरूप—दोहा

ललिता ह्वै अति मलिन मन, कहत कृष्ण प्रति बैन ।
हंस ! कहौ हरि सों तुरत, वार्त्ता ये मति ऐन ॥७२॥

मूल की भाषा पद्य—छन्द गीतिका

का दोष स्वामी ! रावरौ, जो तजीं ब्रज बाला सबै ।
है श्याम वर्ण स्वभाव यह करि सकत सो त्यागन कबै ॥

कल कंठ अंडा पलत हैं काकन सदन मन भावते।
पुनि पंख निकरें त्यागि सो शिशु कोकिलन में आवते ॥७२॥

सारांश—सोरठा

राखत स्वारथ प्रीति कारे रँग वारे सकल।
करी कहा अनरीति तजी आप ब्रज बाल जो ॥७२॥

◇◇◇◇

अयं पूर्वो रङ्गः किल विरचितो यस्य तरसा
रसादाख्यातव्यं परिकलय तन्नाटकमिदम्।
मया पृष्टव्योऽसि प्रथममिति वृन्दावनपते!
किमाहो राधेति स्मरसि कृपणं वर्णयुगलम् ॥७३॥

टीका—प्रस्तुतं कथयति अयमिति। मया रसात् रागात् किल वार्त्तायां प्रयत्नादावाख्यमित्यादि श्लोकोक्तेः, अयं पूर्वो रङ्गः यस्य विरचितः कृतं आख्यातव्यं इदञ्च नाटकं नाटकतुल्यं कलय शृणु, श्रव्य-दृश्यभेदात् काव्यं द्विविधं भवति। तत्र श्राव्यं माघादि, दृश्यं नटैरनुष्ठेयत्वात् नाटकं अनर्घराघवादिः। रङ्गो नृत्यस्थानं तत्र विघ्नोपशान्तये नर्तकैः क्रियमाणं वन्दनादि पूर्वरङ्ग उच्यते। तथा चोक्तं—"यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये। कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते"। तदेवाह—प्रष्टव्यमिति। अये हे वृन्दावनपते! प्रथमं तावत् प्रष्टव्योऽसि राधेति वर्णयुगलं किं स्मरसि अहो न वा? कीदृक् कृपणं अतिदीनं,वर्णस्य तथात्वाभावात् राधाया एव दैन्यं ज्ञेयम्। अयमाशयः-नामैव यदि विस्मृतं कुतस्तर्हि तद्विरहवेदना विज्ञाता इत्यतः प्रथमं नामस्मरणप्रश्नः। "रसो मन्धरसे जले शृङ्गारादौ विषे तिक्तादौ द्रव्य-गन्धरागयोः। इह धातु प्रभेदे च पारद-स्वादयोः पुमानिति" मेदिनी। "आहो उताहो किमुत विकल्पे किं किमुत च" इत्यमरः। "वाणी द्विजादौ शुकादौ स्तुतौ वर्णस्तु शङ्कवे" इति च ॥७३॥

अनु०—हे वृन्दावनपते ! जिस नाटक के पूर्व-रङ्ग या अभि
पूर्व में विघ्न-बिनाश के हेतु मङ्गलाचरण स्वरूप को मैं
सन्मुख कथन कर चुकी हूँ अब उसके विप्रलम्भ-रस मय,
को सावधान हो श्रवण कीजिए। मैं प्रथम आप से यह प्रश्न
हूँ कि, उस दीन 'राधा' का नाम भी कभी आपको याद
है ? अर्थात् उसके विषय में भी कभी कुछ बातें आपके स्मृ
में उदय होती हैं ॥७३॥

प्रागरूप-दोहा

ललिता हरि सों कहन हित, हंसहि रही जताय।
होत कबहुँ श्रीकृष्ण कों, राधा की सुधि आय ॥७३॥

मूल की भाषा पद्य—छन्द रौला

हे वृन्दावन नाथ कृष्ण ! मैं पूर्वरङ्ग यह।
विरच्यौ राधा विरह रूप नाटक कौ रस सह ॥
सुनिये निश्चय सपदि प्रथम मैं ताहि उच्चारत।
द्वै अक्षर कौ राधा नाम कहा ? उर धारत ॥७३॥

सारांश—सोरठा

अति लघु राधा नाम जाके द्वै अक्षर सरल।
लेत कबहुँ घनश्याम व्यथित विरह निज जानि के ॥७३॥

००००

अये कुञ्जद्रोणीकुहरगृहमेधिन् किमधुना
परोक्षं वक्ष्यन्ते पशुपरमणीदुर्नियतयः।
प्रवीणा गोपीनां तव चरणपद्मेऽपि यदियं
ययौ राधा साधारणसमुचितप्रश्नपदवीम् ॥७४॥

टीका—गोविन्दस्यानादरात् गोपीनां भाग्याभाव तत्र वर्णयति

इति । अये विषादकोपक्रोशयोः । अये कुञ्ज—द्रोणी—कुहरगृहमेधिन् ! कुञ्जद्रोणीकुहरे गृहस्थ ! अधुना परांचं तवालमच्चं पशुपरमणीदुर्नियतयः गोपीनामभाग्यानि किं वर्ण्यन्ते कथयितुमशक्यान्येव अतिविस्तृतत्वादिति भावः । तत्र लिङ्गमाह-यद् यस्माद्गोपीनां प्रवीणा श्रेष्ठतरापि इयं राधा तव चरणपद्मे साधारणसमुचित-प्रश्नपदवीं सामान्यजनविषये उचितो यः प्रश्नः तस्य पदवीं मार्गं यतौ प्राप्तवती, यत्र सर्वगोपीश्रेष्ठाया राधायास्त्वयि तादृशी अवस्था तत्रान्यासां का कथा इति भावः ।"अये कोपविषादार्थे"इत्यमरः ।"अथ कुहरं विवरं बिलमपि च" "भाग्यं स्त्री नियतिर्विधिरिति" च ॥७४॥

अनु०—हे निकुंज-केलिभवन-विहारी ! आपका कुंज कुटीर 'जल-सेचनी' पात्र के समान है जिसमें से निरंतर निगूढ़ निकुंज लीलाओं की रसधारा, निर्गत होती रहती है और वह सखी, मञ्जरी गण को सिञ्चन करती है किन्तु, हे केलि-कुंज-विलासी, आप इस समय उन लीलाओं के विषय में वीतराग होकर क्यों दूर निवास कर रहे हैं ? आपका दर्शन न पाने से अधिक दुर्भाग्य की बात इन गोपियों के लिए और क्या हो सकती है अर्थात् वह अनिर्वचनीय है । जो तुम्हारे श्री चरणों में अपना तन मन समर्पण कर चुकी हैं उन गोपियों में प्रधान, अखण्ड महाभाव स्वरूपिणी, त्रिभुवन में असाधारण प्रेम स्वरूपिणी, श्रीराधा इस समय दुर्भाग्य की चरम सीमा में प्राप्त होकर सामान्य नारियों की दशा में पहोंच चुकी है ! अहो, विधि की क्या विडम्बना है ॥७४॥

प्राग्रूप-दोहा

ललिता पूर्व प्रसंग में, राधा दशा मलीन ।
कहत हंस सों कृष्ण प्रति, गद्गद स्वर अति दीन॥७४॥

मूल की भाषा पद्य—छन्द गीतिका

हे बुद्धिवान लतान गृह के छिद्र द्वार निवास में ।
. का कहैं राधा की दशा दुर्नय विरह के त्रास में ॥

जो सकल गोपिन में चतुर प्रिय ता समान पदार्थना।
सो करत साधारण नियम सम पद सरोजन प्रार्थना ॥७४॥

सारांश—सोरठा

रही रैन दिन साथ जो राधा सब सों चतुर।
त्यागी सो यदुनाथ साधारण बनितार सम ॥७४॥

००००

त्वया गोष्ठं गोष्ठीतिलक किल चेद्विस्मृतमिदं
न तूर्णं धूमोर्णापतिरपि विधत्ते यदि कृपाम्।
अहर्वृन्दं वृन्दावनकुसुमपालीपरिमलै-
र्दुरालोकं शोकास्पदमथ कथं नेष्यति सखी ॥७५॥

टीका—इदानीं राधाया: त्वया मरणनिवारणादिवसाना गमनीया इत्याह त्वयेति। हे गोष्ठीतिलक! गोष्ठश्रेष्ठ! किल निश्चितं चेद्यदि इदं गोष्ठं त्वया विस्मृतं धूमोर्णापति र्यम: तूर्णं शीघ्रं कृपां न विधत्ते न करोति न मारयतीत्यर्थ:, इह विरहदशायां सखी राधा अहर्वृन्दं दिवससमूहं कथं केन प्रकारेण नेष्यति गमयिष्यति, एतेन त्वां विना मरणमेवास्याभीष्टं न त्वन्यत् गृहस्वाम्यादीत्युक्तम्। कीदृशं वृन्दावनेति वृन्दावनस्य या कुसुमपाली पुष्पश्रेणी तस्या: परिमलै: सुरभिगन्धै: हेतुभि: दुरालोकं अवलोकयितुमशक्यं उद्वेगजनकत्वात् यत उक्तं "हसितानि सुगन्धानि सरांसि च वनानि च। सम्भोगाभिमुखं कुर्युरुद्वेगं विरहे भृशमिति"। "तिलको भालचित्रं स्यात् प्रधाने तिलको मत:। तिलको वृक्षभेदे च तिलकं बिन्दुचित्रे च" इत्यनेकार्थध्वनिमञ्जरी। "धूमोर्णा यमभार्य्येति पौराणिका:"। तथा च महाभारते उद्योगपर्व्वणि गालवचरिते "यथा धूमोर्णत्वासम इति दिवोदास" इति। "धूमोर्णापतिरुद्दिष्टो यमो महिषवाहन" इति हारावली। "पाली कर्णलताग्रे-

ऽशुपंक्तावुभोपदेशयोरिति" मेदिनी । उद्वेगजनकत्वं च दशाकथन-मस्मिन् ॥७५॥

अनु०—हे गोपी समाज-भूषण, आपके बिना आजकल गोपीगण का सौन्दर्य माधुर्य मलिन हो चुका है, और जैसे भूषण,अङ्गों की शोभा बढ़ाते हैं, वैसे ही आप भी गोपी समाज का गौरव बढ़ाते हैं। अब यदि आप इस वृन्दावन को भूलगए हैं तभी इन पर यम-राज भी दशवीं दशा अर्थात् मृत्यु रूप में कृपा नहीं कर रहा है। अर्थात्-राधा का प्राण-वियोग भी नहीं होता है तो कहिये कि यह राधा वृन्दावन की कुसुम-सौरभ द्वारा आपकी स्मृति का उद्दीपन होते ही अत्यन्त दुःख जनक उग्र वेदनाप्रद विरह के इन दिनों के किस तरह निकालेगी ? अतः आप यदि शीघ्र वृन्दावन पधारें तभी इस समय राधा को देख पा सक्ते हैं ॥७५॥

भावरूप—दोहा

चाहत हरि कौ आगमन, राधा को लखि दीन।
कहत हंस सों कृष्ण प्रति, ललिता चित्त मलीन॥७५॥

मूल की भाषा पद्य—छप्पय

हे शृङ्गार सभा भूषण ! तुम ब्रज बिसरायौ।
धूमोर्णा पति यम न अनुग्रह निज दरसायौ॥
शीघ्र न आयौ काल किधौं आये न मुरारी।
तौ कैसे सहि सकै व्यथा यह सखी हमारी॥
जो करत सुगंधित सकल थल पुष्प पांति वृन्दा विपिन।
किमि काटि सकै इन दिनन कों दुखित राधिका आप बिन॥७५॥

सारांश—सोरठा

दुखद भये सब फूल कृष्ण आप के विरह में।
प्राण तजन अनुकूल जानत राधा दुखित ह्वै॥७५॥

००००

तरङ्गैः कुर्वाणा शमनभगिनीलाघवमसौ
नदीं काञ्चिद् गोष्ठे नयनजलपूरैरजनयत् ।
इतीवास्या द्वेषादभिमतदशाप्रार्थनमयीं
मुरारे ! विज्ञप्तिं निशमयति मानी न शमनः ॥७६॥

टीका—पुनस्तामेव दशां वर्णयति तरङ्गैरिति । असौ राधा नयनजलपूरैः अश्रुजलप्रवाहैः गोष्ठे काञ्चिदनिर्वचनीयां नदीमजनयत् प्रवर्त्तयामास । कीदृशीं तरङ्गैः कल्लोलैः शमनभगिनी यमुना तस्याः लाघव अतितुच्छत्वं कुर्वाणा यमुनापेक्षयापि अति महतीत्यर्थः । हे मुरारे ! इति हेतोः अस्या राधाया द्वेषात् अभिमतदशाप्रार्थितमयीं अभिमतदशाया प्राप्तदशायां यत् प्रार्थितं तत्प्राचुर्य्येण प्रस्तुतां, यद्वा स्वरूपे मयट् अभिमतदशायां प्रार्थितां तत्रातित्वात् पुरवं, विज्ञापनां मरणप्रार्थनामिति यावत् , शमनो यमः न निशमयति न शृणोतीत्यर्थः । कीदृशः शमनः मानी अभिमानयुक्तः । अयं भावः—इयं अश्रुजलेन नदीं विधाय शमनभगिन्याः लाघवमकरोत् , अतोऽहमस्याश्चिरतरमतिविरहवेदनया दुःखमेव दास्यामि ननु प्राणान् अपहरामि इति प्रार्थनां न शृणोति । "पूरो जलप्रवाहे स्यादिति" कोषः ॥७६॥

अनु०—हे मुरारे ! जिसकी उद्वेलित(उत्थित)तरङ्गमाला यमुना की तरंगों को भी तिरस्कृत करती है, श्रीराधिका के नयन-जल प्रपात द्वारा ऐसी एक वेगवती नदी प्रगट होगई है, इस कारण अपनी भगिनी यमुना की लघुता मानकर द्वेष वश अभिमानी यमराज भी राधिका की मरण प्रार्थना को नहीं स्वीकार करता है ॥७६॥

प्राग्रूपदोहा

याही विरह प्रसंग में, राधा दशा कुचैन ।
कहत हंस सों कृष्ण प्रति ललिता दुख मय बैन ॥७६॥

मूल की भाषा पद्य—कुंडलिया

राधा नैनन नीर सों ब्रज प्रवाह प्रगटान।
ताकी लहरन तें भयौ अति लघु यमुना मान॥
अति लघु यमुना मान वहन यम की सब जानत।
सो अभिमानी महा वैर हिय में यह आनत॥
नाहिँ देत वह मृत्यु अहै जो सुख की साधा।
अहो मुरारी! मरन भलौ गनि यम आराधा॥७६॥

सारांश—सोरठा

चाहत तजन शरीर करत विनय यमराज सों।
राधा निपट अधीर कृष्ण! आपके विरह में॥७६॥

००००

कृताकृष्टिक्रीडं किमपि तव रूपं मम सखी
सकृद्दृष्ट्वा दूरादहितहितबोधोज्झितमतिः।
हता सेयं प्रेमानलमनुविशन्ती सरभसं
पतङ्गीवात्मानं मुरहर मुहु र्दाहितवती॥७७॥

टीका—त्वयि जनिता प्रश्नो ऽयं हठात् हतेति कथयति कृतेत्यादि। हे मुरहर! हता हतप्राया सेयं मम सखी राधा दूरात् किमपि वचनागोचरं तव गोचरं तव रूपं सकृदेकवारं दृष्ट्वा सरभसं सहर्षं यथा स्यात् प्रेमानलं प्रेमाग्निं मुहुरनुप्रविशन्ती सती आत्मानं दाहितवती। हताशेति तालव्यशकारवत् पाठे तु हताशा इयं मम सखी यथेष्टभोगाकरणात् हताशा, तं कीदृशं कृता आकृष्यते हठात् वशीक्रियते अनया आकृष्टिः करणोक्तिः यद्दर्शनमात्रेण सद्यो वशीभवन्तीत्यर्थः। सा चासौ क्रीडा चेति कृता आकृष्टिक्रीडा येन तत्, यद्वा आकृष्टि आकर्षणं दर्शनमात्रेण वशीकरणं सैव क्रीडा कृता आकृष्टिक्रीडा येन तत्, यद्वा कृतानि गृह-

कर्म्माणि आकृष्यन्ते अनया कृताकृष्टिः तथा विधा क्रीडा यस्य तत्, यद्दर्शनमात्रेण समस्तगृहकर्म्माणि विस्मृत्य तदेकता भवतीत्यर्थः। नन्वेवञ्चेत् किमिति प्रेमानलं निविष्टा तत्राह अहितहितबोधोज्झित-मतिरिति अहितहितयो यो बोधः इदमहितमिदं हितमिति ज्ञानं तेन उज्झिता बहिष्कृता मतिर्यस्या सा, विशेषावधारणरहितत्वात् एवं कृत-वतीति भावः। हिताहितेति वक्तव्ये पूर्वो निपातो व्यभिचारात्। यद्वा धर्म्मार्थादौ पठितव्यम्। किं च पतङ्गीव पतङ्गी शलभी हिताहितबोधा-भावात् रूपं दृष्ट्वैव अनलमनुविश्य यथा आत्मानं देहं दाहयति, तदाह-भस्मीकरणार्थतावृत्तेरकर्म्मकतामादाय प्रयोज्यस्य कर्त्तुः कर्म्मत्वम्। यथा काष्ठं दहतीत्यत्र भस्मीभवेत् काष्ठं भस्मकरोतीति करोत्यर्थस्य सर्वत्रान्यगतभरणार्थत्वात्, तथा च श्रीधरस्वामिधृतकारिका—"करोति क्रियमाणेन न कश्चित् कर्म्मणा बिना। भवत्यर्थस्य कर्त्तुर्वा करोतेः कर्म्म जायते। करोत्यर्थस्य यः कर्त्ता भवितुः स प्रयोजकः। भविता तमपेक्षार्थं प्रयोज्यत्वं प्रपद्यते" इति। यद्वा अन्येऽपि धातवः क्वचिदिति चौरादिको णिङ् कर्त्तव्यः। "पतङ्गौ सूर्य्यशलभाविस्यमरः" ॥७७॥

अनु०—हे मुरारे! हत-भागिनी यह मेरी सखी राधा प्रेमानन्द-मय आपके रूप को एक ही बार दूर से दर्शन करके हिताहित शून्य तथा बुद्धि विहीन सी होचुकी है। अब वह आपका रूप, अपूर्व आकर्षण क्रीडा सी कर रहा है अर्थात् उसका प्राणाकर्षण कर दुःखान्त लीला का विस्तार कर रहा है। इसका भावी परिणाम क्या होगा? और वह प्रेमोन्मादिनी होकर पतङ्गी की भाँति तु-म्हारे प्रेमानल में प्रवेशकर अपनी देह को दग्ध कर चुकी है। हाय इसके भाग्य में ऐसा ही लिखा था, इसमें आपका क्या दोष है॥७७॥

मुखोल्लास-दोहा

बीती घटना हंस सों, ललिता पूर्व प्रसंग।
बरनत हरि प्रति कहन हित, राधा प्रीति अभंग ॥७७॥

मूल की भाषा पद्य—छप्पय

हे मुरारि श्रीकृष्ण सखी मेरी यह राधा।
आप संग क्रीड़ा करि दूरहि तें रस साधा॥
एक बेर ही अकथ रूप रावरौ निहार्‍यौ।
हित वा अहित बोध तानें तनिकौं न विचार्‍यौ॥
मुदित पतंगी कीट लौं प्रेम अग्नि में तनु दियौ।
अब भई हताशा सर्वथा बार बार जारत हियौ॥७७॥

सारांश—सोरठा

नहिँ जान्यौ परिणाम धाय पतंगी कीट लौं।
प्रेम अग्नि में श्याम निज तनु दीनौ राधिका॥७७॥

००००

मया वाच्यः किं वा त्वमिह निजदोषात् परमसौ
ययौ मन्दा वृन्दावनकुमुदबन्धो! विधुरताम्।
यदर्थं दुःखाग्निर्विकृषति तमद्यापिहृदया-
न्न यस्माद्दुर्मेधा लवमपि भवन्तं दवयति॥७८॥

टीका—भवतेयं विस्मृत्यैव, इयन्तु त्वां क्षणमपि न विस्मारयतीत्याह मयेति। हे वृन्दावनकुमुदबन्धो! वृन्दावनचन्द्र! इह अस्यां विरहावस्थायां त्वां मया किं वाच्यः न किमपीत्यर्थः। कस्मादित्याह-असौ राधा परं केवलं निजदोषात् आत्मीयदोषात् विधुरतां विकलतां ययौ प्राप्तवती, निजदोषस्तु कुतोऽस्या इत्याह यदर्थं इति। यदर्थं यन्निमित्तं दुःखाग्निः दुःखरूपोऽग्निः विकृषति आकर्षति, आकर्षणे तुदादिः। यत् यस्मादियं दुर्मेधा दुर्बुद्धिः लवं मनाक् कालमपि तं भवन्तं हृदयान्न दवयति न दूरीकरोतीत्यर्थः। णिचि दूरस्य दवादेशः, यत्त्यागे सुखं भवति तत्त्यागकारणादेव दुर्बुद्धित्वम्। इयं कीदृशी मन्दा मूढ़ा अभा-

त्यवतीति बाधः । "मन्दोऽतीक्ष्णे च मूर्खत्वे स्वैरे चाभाग्यरोगिणोः । अल्पे च त्रिषु पुंसि स्यात् हस्तिजात्यन्तरे शनौ" इति मेदिनी । "लवो निमेषस्य तृतीयभागः तथा चोक्तं—"निमिषस्त्रिलवो ज्ञेयः" ॥७८॥

अनु०—हे वृन्दावनचन्द्र ! मैं अधिक क्या कहूँ, हिताहित विचार शून्य हमारी प्यारी सखी राधा अपने दोष के कारण ही विरह-कातर दशा का उपभोग कर रही है एवं तुमको आज क्षण मात्र के लिए भी अपने मन से दूर करने का समर्थ नहीं है ! अतः उसके दुःख का कारण स्वयं वही है । इसे आपकी दुर्बुद्धि के अतिरिक्त और क्या कह सकते हैं ? इस स्थान पर इतना कष्ट होते हुए भी वह 'श्रीकृष्ण को भूलने में असमर्थ है', यह कहने से श्री-राधाजी का एक निष्ठ-निरूपाधिक-प्रेम, अभिव्यक्त होता है ॥७८॥

सुखोल्लास—दोहा

ललिता अति उद्वेग सों, राधा कौ अनुराग ।
अरु अयान पन तासु कौ, कहत सहित हत भाग ॥७८॥

मूल की भाषा पद्य—छन्द रौला

हे वृन्दावनचन्द्र ! आप सों कहूँ कहा मैं ।
आत्म दोष तें विवस भाग हत ग्रसित व्यथा में ॥
विरह अग्नि सों कृष्ण आपहि पल हू न विसारत ।
है यातें दुर्मति राधा जो चेत न धारत ॥ ७८ ॥

सारांश—सोरठा

दुख जा कारज माहिँ, ताही कों यह करत है ।
फलहि विचारत नाहिँ मन्द बुद्धि यह राधिका ॥७८॥

००००

त्रिवक्राहो धन्या तव हृदयतुल्यं निजवपुः
समासाद्य स्वैरं यदिह विलसन्ती निवसति।
ध्रुवं पुण्यभ्रंशादजनि सरलेयं निजसखी
प्रवेशस्तत्राऽभूत् क्षणमपि यदस्या न सुलभः ॥७६॥

टीका - इदानीमस्मान् त्यक्त्वा त्रिवक्रायामासक्तो भवानिति वक्तुं त्रिवक्रां स्तौति त्रिवक्रेति। अहो विस्मये, असौ त्रिवक्रा कुब्जा धन्या, ननु किमिति धन्यात्वं तस्या इत्याह–यत् यस्मात् असौ त्रिवक्रा ते तव हृदयमिव स्वयं वपुः समासाद्य प्राप्य इह तव हृदये विलसन्ती सती स्वैरं स्वच्छन्दं निवसति अस्मात्तद्धृदयानुरूपवपुः प्राप्त्या विस्मयः, एतेन भवान् कठिनहृदयः सा हि कुटिलदेहेति योग्यसङ्ग इत्युक्तम्। इयं मम सखी ध्रुवं निश्चितं पुण्यभ्रंशात् पुण्यक्षयात् सरला अकुटिला अजनि जाता, अथ च सरला उदारा महतीत्यर्थः। ननु किमिति सर जाता निन्द्यत इत्याह–यत् यस्मात् तत्र तव हृदये तस्याः प्रवेशः क्षणमपि सुलभो नाभूत्। अत्र प्रथमार्द्धे अप्रस्तुतप्रशंसा, अपक्रान्तायाः कुब्जायाः स्तुतिकरणात्। तथा च दण्डी–"अप्रस्तुतप्रशंसा सा स्यादा-क्रान्तेष्वितस्तुतिरिति"। शेषार्द्धे व्याजस्तुतिः निन्दामुखेन स्तुतिः सरलतागुणस्य प्रतिपादनात्। यदाह दण्डी–"यदि निन्दन्निव स्तौति व्याजस्तुतिरसौ स्मृता"॥ अन्यत्र व्याजस्तुतिमुखे निन्देति। कृष्णस्य तु एतादृशीमुदारां राधां त्यक्त्वा कुब्जायामावेशात् अनभिज्ञ-तारूपो गूढोपहास इत्यर्थः। 'सरलः पूतिकाष्ठे तु उदारावक्रयोस्त्रिष्विति' मेदिनी। "ध्रुवं स्यात् निश्चिते तर्के निश्चये शङ्कान्ते ऽन्यवदिति" विश्वः ॥७६॥

अनु०—अहो! आज तो त्रिवक्रा (तीन जगह से कुटिला) कुब्जा ही सौभाग्यशालिनी है जो कि तुम्हारे मनोनुकूल शरीर प्राप्त कर स्वच्छन्द विहार करती हुई निवास करती है और ऐसी प्रतीत

होता है कि हमारी सरला सखी 'राधा' ने तो पुण्यक्षीण होने के कारण इस संसार में वृथा ही जन्म लिया है। अन्यथा व्रजवास काल में आप जैसों के लिए क्षणमात्र भी उसके हृदय में प्रवेश कर पाना सुलभ नहीं था। इस पद्य में गूढ़ प्रणयेर्ष्या व्यङ्ग है— अब यह कुब्जा त्रिवक्रा आप त्रिभङ्गाकार के मन को ही नहीं अपितु शरीर को भी वश कर चुकी है। जैसे को तैसे मिल गए हैं और आप बहुवल्लभ होने से मेरी सरला सखी आपके हृदय में स्थान भी नहीं पा सकी है ॥७९॥

सुखोल्लास–दोहा

कहत हंस सों कृष्ण कौ, कुबरी पै अनुराग।
ललिता या दुख सहित जो, कीनी राधा त्याग ॥७९॥

मूल की भाषा पद्य–छन्द दोवै

अचरज धन्य कूबरी ने निज अंग आप उर पायौ।
सहित भोग स्वच्छन्द या समय करत निवास सुभायौ॥
निश्चय पुण्य क्षीण यह जनमी सखि मम सरल अबाधा।
हे हरि पल नहिँ प्राप्त करि सकी हृदय आप कौ राधा ॥७९॥

सारांश–सोरठा

सरल हृदय व्रजचन्द कुटिल कूबरी तहँ बसी।
राधा सरल अमन्द करी दूर अचरज यहै ॥७९॥

००००

किमाविष्टा भूतैः सपदि यदि वा क्रूरफणिना
क्षतापस्मारेण च्युतमतिरकस्मात् किमपतत्।
इति व्यग्रैरस्यां गुरुभिरभितो कीचकरव-
प्रवादस्पन्दायां मुरहर चिकल्पा विदधिरे ॥८०॥

टीका—श्रीकृष्णेऽत्याशक्तिं ज्ञापयितुं मुरारे ध्वनिश्रवणमात्रेण मूर्च्छां-प्राप्तराधायाः कथयति किमित्यादि। हे मुरहर! अस्यां राधायां कीचकरवश्रवणात् विभ्रष्टायां पतितायां सत्यां अभितः सर्वतो व्यग्रैः गुर्व्यादिभिः श्वश्र्वादिभिः इति उक्तप्रकारेण विकल्पना नानापेक्षा विदधिरे इत्यर्थः। इतिशब्दापेक्षान् विकल्पानाह–किमिति सपदि एतत्क्षणमेव भूतैरुपग्रहैः किं आविष्टा आक्रान्ता, ननु वैदिकमन्त्रादिनापसारितेषु तेषु कुतो शङ्का एवञ्चेत् पक्षान्तरमाह यदिति यदि वा पक्षान्तरेऽथवेत्यर्थः। क्रूरफणिना दुष्टसर्पेण क्षता दष्टा? ननु सर्वेषामदर्शनेन पतितः कुतोऽत्र फणीति विकल्पान्तरमाह–अपस्मारेण रोगविशेषेण क्षणमति भ्रष्टचेता सती, किमिति वितर्के अकस्मादपतत् अथवा वक्तृबाहुल्यात् पक्षबाहुल्यम्। "तलकादौ पिशाचादौ बास्तौ क्लीबं त्रिषु चेति"। "प्राप्यवृत्ते समेऽमात्ये देवयोन्यन्तरे तु ना" इति मेदिनी। अपस्मारो यथा साहित्यदर्पणे-"मनः क्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः। भूपात–कम्प–प्रस्वेद–फेण-लालादिकारक इति"। "कीचको दैत्यभिद्वा-साहत सघनवंशयोरिति" मेदिनी ॥८०॥

अनु०—हे मुरारे! हमारी सखी श्रीराधा कीचक ध्वनि (वेणु-कूजन-शब्द) को सुनकर संज्ञाहीन हो धरातल में गिर जाती है, तब उसकी सास, ननद आदि चहुँदिस से उसे घेरकर उसकी मूर्च्छा का कारण जानने के लिए भूतावेश आदि की विविध कल्पना करती हैं, कोई कहती है–इसको असत् ग्रह का आवेश हुआ है, कोई तर्क करती कहती है यह तो हिंस्र-सर्प(पद्य-में अक्रूर-सर्प) द्वारा दष्ट हुई है या इसे अपस्मार (रोग) का आक्रमण है, इसी से यह पृथ्वी पर गिर जाती है ॥८०॥

मुखोल्लास–दोहा

विरह दुःख सों राधिका, भई निपट तन छीन।
ताकी हरि सों दशा यह, कहिये हंस प्रवीन ॥८०॥

मूल की भाषा पद्य—छप्पय

चहुँ ओर तें सुनत बांसुरी शब्द मुरारी!
थकित अङ्ग ह्वै गिरी राधिका सखी हमारी॥
तब अति व्याकुल भये पिता मातादि तासु सब।
करत अनेकन सोच भूत लाग्यौ या कों अब॥
अथवा क्रोधित सर्प नें किधौं अचानक है डसी।
वा अपस्मार के रोग नें बुद्धि भ्रंश करके ग्रसी॥८०॥

सारांश—सोरठा

बंसी धुनि सुनि कान ग्वाल बजावत जो कबहुँ।
राधा तजत अपान होत आप की सहज सुधि॥८०॥

००००

नवीनेयं सम्प्रत्यकुशलपरीपाकलहरी
नरीनर्त्ति स्वैरं मम सहचरीचित्तकुहरे।
जगन्नेत्रश्रेणीमधुर मथुरायां निवसतः
स्थिरादार्त्ता वार्त्तामपि तव यदेषा न लभते॥८१॥

टीका—आसक्तिविशेषमुक्त्वा वार्त्तामप्यनश्रृण्वन्त्या विरह एव उचित एवेत्याह नवीनेति। सम्प्रति इदानीं मम सहचरी-चित्तकुहरे इयं नवीना नूतना अकुशलस्य अमङ्गलस्य यः परिपाकः परिणामस्तस्य लहरी तरङ्गः स्वैरं स्वच्छन्दं यथा स्यात्तथा नरीनर्त्ति अत्यन्तं नृत्यति, कस्मादित्यत आह—हे जगन्नेत्रश्रेणीमधुर जगतां नेत्रपंक्तिप्रिय! जगत्पदोपादानात् न केवलं मनुष्याणामित्युक्तम् तथा चोक्तं "यद्गो-द्विज-द्रुम-मृगाः पुलकान्यबिभ्रन्निति"। "अस्पन्दनं गतिमतां पुलकस्तरूणामिति" च। किञ्च जगन्नेत्रप्रियकरणमुचितमिति चाभिहितम्। मथुरायां चिरान्निवसतस्तव आर्त्तैषा वार्त्तामपि यत् यस्मात् न लभतेऽतः किंकुशलमस्तीत्यर्थः॥८१॥

अनु०—हे त्रिभुवन मनोहर ! इस समय हमारी सखी का मन दुश्चिन्ता तरङ्ग से उद्वेलित हो उठा है और इसके हृदय में य. नवीन ही दुःख व्याप्त हो रहा है। "जैसे कि—वह कहां रहते होंगे ! और कंस जरासन्ध आदि विपत्तियों से निरापद हैं या नहीं ! और आप बहुत दिन से मथुरा निवास कर रहे हो अतः हमारी सखी राधा आपका कोई कुशल-सम्वाद भी तो नहीं पा सकी है। अर्थात् चिरकाल से कुशल सम्वाद न पाने से और भी दुःखिनी हो रही है ॥८१॥

मुखोल्लास—दोहा

राधाजी कौं विरह दुख, बाढ्यौ जो अत्यन्त।
कहौ कृष्ण सों हंस तुम, मथुरा जाय तुरन्त ॥८१॥

मूल की भाषा पद्य—छप्पय

हे जग नेत्र समूह सुखद हरि ! मम सखि राधा।
ताके प्राण छिद्र में अन्त दशा सह बाधा ॥
अतिशय लहर स्वतन्त्र नवीन अमंगल कारी।
नृत्य करत सो बार बार चित शंका धारी ॥
बहु काल भयौ मथुरा गयें, ऐसौ दूर निवास का।
अब लों न सुनी सुधि आप की यातें दुर्नय त्रास का ॥८१॥

सारांश—सोरठा

यह अप कुशल निदान गये आप मथुरा पुरी।
का दुख यातें आन सुधि न मिली प्रभु आप की ॥८१॥

००००

जनान् सिद्धादेशान् नमति भजते मान्त्रिकगणान्
बिधत्ते शुश्रूषामधिकविनयेनौषधविदाम् ।

त्वदीक्षादीक्षायै परिचरति भक्त्या गिरिसुतां
मनीषा हि व्यग्रा किमिव शुभहेतुं न मनुते ॥८२॥

टीका—त्वमासये नानाविधोपायं कथयितुं प्रेषितस्त्वं केति कर्त्तव्यता करोतीत्याह जनानिति । सिद्धः आदेशः आज्ञा येषां ते वाक्सिद्धा इत्यर्थः, तान् जनान् नमति । मान्त्रिकपरिषान् मन्त्रसिद्धसमूहान् भजते सेवते । तथा औषधविदां मोहनाद्यौषधज्ञातान् अधिकविनयेन शुश्रूषा विधत्ते सेवां करोति । तथा च गिरिसुतां पार्वतीं परिचरति सेवते । प्राक् तत्सेवया भगवत् प्राप्त्या विश्रम्भात्, सर्वोपयुक्तं हेतुमाह-त्वदीक्षादीक्षायै इति भगवद्दर्शनमेव दीक्षा पापक्षयकारक्रियाविशेषः तदर्थं, दीक्षा इति गोपीवृत्तिः, सर्वत्र अधिकविनयेन इत्यस्यानुसङ्गः किञ्च भवदनुग्रहं विना किमप्यस्याः सुखहेतुरित्याह-यस्या इत्याह मनीषा इति अतिव्यग्रा व्याकुला मनीषा बुद्धिः किमपि अर्थात् किमपि कर्म सुख-हेतुं न मनुते नाभिमन्यते इत्यर्थः । यद्वा अतिव्यग्रा मनीषा यस्याः सा मनीषातिव्यग्रा राजदन्तादिः व्याकुलबुद्धिरित्यर्थः ॥८२॥

अनु०—आजकल हमारी सखी राधा, आपके दर्शनों की कामना को लेकर सिद्ध महा-पुरुषों को प्रणाम करती रहती है तथा औषधि तत्वज्ञ वैद्यों की विनय पूर्वक सेवा करती है एवं भक्ति-भाव से प्रेरित होकर गिरिजादेवी (कात्यायनी) की आराधना में लगी हुई है अर्थात् कोई भी उपाय उसके सुख साधन में सहायक नहीं होता ॥८२॥

मुखोल्लास—दोहा

कहत हंस सों कृष्ण प्रति, ललिता यह समझाय ।
करत आप के मिलन हित, राधा विविधि उपाय ॥८२॥

मूल की भाषा पद्य—छप्पय

हे हरि वाञ्छा दरस आप की सों यह राधा ।
वाक्य सिद्ध पुरुषन कों नमत रहत हित साधा ॥

मंत्र शास्त्रविद तथा वैद्य औषध के ज्ञाता।
इन सबकी शुश्रूषा करत मानि फल दाता॥
अरु पारवती सेवा करत पै न मिटी गति ताप की।
व्याकुल विचारशीला नहीं जानति इच्छा आप की॥८२॥

सारांश-सोरठा

कीन्हे जतन विचारि सिद्ध सेव अर्चन शिवा।
जानति पै न मुरारि राधा इच्छा रावरी॥८२॥

००००

पशूनां पातारं भुजगरिपुपत्रप्रणयिनं
स्मरोद्धर्द्धक्रीडं निविडघनसारद्युतिभरम्।
सदाभ्यर्णो नन्दीश्वरगिरिभुवो रङ्गरसिकं
भवन्तं कंसारे भजति भवदाप्त्यै मम सखी॥८३॥

टीका—किञ्च पशूनामिति : हे कंसारे! मम सखी राधा त्वदाप्त्यै दास्यै दासी भवितुं दासीत्वं मनसि कृत्वेत्यर्थः। भवदाप्त्यै इति पाठः भवत्प्राप्त्यर्थमित्यर्थः। पशूनां पातारं पशुपतिं शिवं भजते सेवते, कीदृशं भुजगरिपुपत्रप्रणयिनं भुजगरिपुः मयूरः पत्रं वाहनं यस्य स तथा कार्त्तिकेयस्त्वित्यर्थः। स प्रणयी प्रियो यस्य स तं, पुनः कीदृशं स्मरेति स्मरस्य कामस्य उद्धर्द्धः ध्वंस स एव क्रीडा यस्य तं, पुनः कीदृशं निविडघनसार इति निविडा अतिबहुला या घनसारस्य कर्पूरस्य द्युतिः कान्तिस्तां बिभर्त्ति इति तं, यद्वा निविडं पुञ्जीभूतो यो घनसारः कर्पूरः तस्यैव द्युतिभरो यस्य तं, पुनः कीदृशं सदा सर्वदा नन्दीश्वरगिरिभुवो नन्दि-पार्श्वयो रभ्यर्णो निकटे रङ्गरसिकं नृत्यक्रियावशयुक्तं भवन्तं, रङ्गो नृत्यं तत्र रसिकः अथच मम सखी भवदाप्त्यै भवं तं भजति। सिद्धादेशादीनां भजनं त्वयि अकिञ्चित्करमाकलय्य भवन्तमेव वरदेश्वरं सर्वमयं भजतीत्यर्थः। भवन्तं कीदृशं पशूनां व्रजस्य गवादीनां पातारं रक्षितारं, पुनः किम्भूतं भुजगेति भुजगरिपु मयूरः तस्य पत्रं प्रणयिनं

शिखिपिच्छचूडमित्यर्थः, यद्वा भुजगरिपु गरुडः स एव पत्रं वाहनं यस्य तं, यत्क्रीडाश्रवणस्मरणादिपराणां कामध्वंसो भवति । तथा चोक्तं–"न मय्यावेशितधियां कामः कामाय कल्पते" इति । "विक्रीडितं व्रजवधूभिरिदञ्च विष्णोः श्रद्धान्वितोऽनु शृणुयादथ वर्णयेद् यः । भक्तिं परां भगवति प्रतिलभ्य कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीर" इति । पुनः कीदृशं निविडेति निविडोऽतिबहुलो यो घनसारो मेघश्रेष्ठः तस्यैव द्युति विभ्रत्तिं इति वा पूर्ववत् सजलजलधरश्याममित्यर्थः । पुनः कीदृशं नन्देति नन्दीश्वरः शिवस्तेनाध्यासितो गिरिः तस्य भूस्थानं तस्याभ्यर्णे निकटे सदा रङ्गरसिकं कलाधरं गोवर्द्धनगिरिपरिसरे क्रीडापरमित्यर्थः । अथ च पशूनां देवानां "पशुम्र्गादौ विज्ञेयः सम्यगर्थेऽव्ययं भवेत्" । "पत्रन्तु वाहने पर्णे स्यात् पक्षे शरपक्षिणोरिति" ॥८३॥

अनु०—हे कंस-निशूदन ! हमारी सखी राधा, आपकी प्राप्ति के लिए जो मयूर वाहन श्रीकार्त्तिकेय के प्रति अत्यन्त प्रीति रखते हैं तथा कन्दर्प उच्छेद अर्थात्-मदन-दहन ही जिनकी लीला है और घन (कपूर) सदृश जिनकी अङ्ग कान्ति है तथा जो कृष्ण-प्रेम में सदा मतवाले से होकर नन्दी पार्वती के समक्ष नृत्य लीला प्रकाशित करते रहते हैं, उन्हीं सदाशिव श्रीशंकरजी की आराधना करती रहती है। इस जगह कृष्ण-विरह दशा में कन्दर्प भय से पीड़ित श्रीराधा का शंकरजी की शरण ग्रहण करना ध्वनित होता है। पक्षान्तर में–मेरी सखी वदरेश्वर, सर्वमय, व्रज की गौओं के पालक, मयूरपिच्छविभूषित अथवा गरुडवाहन, काम-ध्वंसक लीला करने वाले, सजल जलधर श्याम, गोवर्द्धन गिरि-परिसर में रंगरसिक श्रीकृष्ण आपका ही भजन करती है ॥८३॥

मुखोल्लास–दोहा

कृष्ण मिलन हित राधिका, करत ध्यान तप साज ।
ललिता वरनन हंस सों, हरि हि सुनावन काज ॥८४॥

मूल की भाषा पद्य-छन्द गीतिका

हे कंस नाशक कृष्ण ! मेरी सखी राधा सर्वदा ।
जानि सेवा सिद्ध गिरि तट की यथारथ फलप्रदा ॥

शिव पक्ष में—

पशुन रक्षक अरु उरग रिपु मोर जिन के यान हैं ।
सो निकट सेनानी, स्वयं प्रभु काम शत्रु प्रधान हैं ॥
कर्पूर आभा तनु,रसिक बर नृत्य, तिन आश्रय लहै ।
इमि पूजि नन्दीश्वर शिवहि वह आप कौ मिलनौ चहै ॥८

श्रीकृष्ण पक्ष में—

पशुन के पालक उरग रिपु गरुड़ वाहन लसत हैं ।
कन्दर्प वर्द्धक रावरी क्रीड़ा कला तन बसत हैं ॥
रुचि अंग जलधर श्याम सौं शुचि रसिक नृत्य अलाप के
बसि भूमि नन्दग्राम राधा, जपत शुभ गुण आप के ॥८३

सारांश—सोरठा

कृष्ण रूप कौ ध्यान शिव पूजा मिस राधिका ।
करत रहत स विधान नन्दगाम की भूमि में ॥८३॥

००००

भवन्तं सन्तप्ता विदलिततमालाङ्कुररसै-
र्विलिख्य भ्रूभङ्गीकृतमदनकोदण्डकदनम् ।
निधास्यन्ती कण्ठे तव निजभुजावल्लरिमसौ
धरण्यामुन्मीलज्जडिमनिविडाङ्गी विलुठति ॥८४॥

—भवन्तमिति । सन्तप्ता असौ मम सखी बिदलिततमालाङ्कुररसै
र्दलिततमालमञ्जरीद्रवैः भवन्तं विलिख्य तव कण्ठे निजभुजवल्लरि
यं बाहुलतां निधास्यन्ती अर्पयिष्यन्ती सती धरण्यां विलुठति
। उन्मीलत् प्रकाशवान् यो जडिमा जड़ता तेन निविडानि नि

ड्यानि अङ्गानि करचरणादीनि यस्याः, सात्त्विकोऽयं जडिमा। कीदृशं भ्रूभङ्गीति भ्रुवोर्भङ्ग्या कृतं मदनकोदण्डस्य कामधनुषः कदनं क्लेशो येन, ततोऽतिसुन्दरत्वात् देवपूजादिः प्रियप्रतिकृतिलेखादिः च प्रोषितभर्तृकायाः कृत्यम्, यदाह भरतः—"देवतापूजनं कुर्यात् दद्यात्कलिभुजे बलिम्। लिखेत् कान्तप्रतिकृतिं पाठयेच्छुकशारिकाम्। गणयेच्चावधिदिनं गीतं गायेत्तदङ्कितम्। एवंविधैर्विनोदैस्तु तस्यवर्त्मेन विना स्थितिः" ॥८४॥

अनु०—आपके विरहानल में संतप्ता, हमारी सखी राधा, तमाल वृक्ष के अंकुरों को मर्दन कर उनके रस से, जिनकी माधुर्य-मंडित भ्रूभङ्गी काम-धनुष की शोभा को विलज्जित करती है, ऐसी सुन्दर आपकी मूर्ति को चित्रित करती है एवं उस मूर्ति के कण्ठ देश में ज्योंही अपनी बाहु-लता 'भुजाएं' अर्पित करना चाहती है त्योंही उसका शरीर जड़ता (सात्विक भाव) व्याप्त होकर पृथ्वी में गिर कर मूर्च्छित हो जाता है। अतएव इस दुख के विषय को जानकर आप अब औदास्य भाव से मथुरा न ठहरें और शीघ्र ब्रजभूमि में आगमन करें ॥८४॥

मुलोल्लास–दोहा

राधा की जड़ दशा, ललिता करि विस्तार।
कहत हंस सों कृष्ण प्रति, विरह व्यथा अतिचार ॥८४॥

मूल की भाषा पद्य—छप्पय

तची आप के विरह तमालन पत्र स्वरस सों।
लिखत आप कौ चित्र भृकुटि संचलन रभस सों॥
कीनौ जिन कन्दर्प धनुष कौ प्रकट निरादर।
करि अवलम्ब रावरी भुज निज बाहु लताकर॥
सो भुजा कंठ निज धारि कै लोटति हैं संलग्न भुव।
यह राधा जी की जड़ दशा करत लालसा दरस तुव ॥८४॥

सारांश—सोरठा

लिखत आप कौ चित्र पत्र तमालन स्वरस सों।
लोटति है जग मित्र तापर राधा विरहिणी ॥८४॥

◇◇◇◇

कदाचिन्मूढेयं निविडभवदीयस्मृतिमदा-
दमन्दादात्मानं कलयति भवन्तं मम सखी।
तथास्या राधाया विरहदहनाकल्पितधियो
मुरारे ! दुःसाधा क्षणमपि न बाधा विरमति ॥८५॥

टीका—ध्यानात्तन्मयताऽपि तस्याः अधिकदुःखदायिनीत्याह—इयं मूढा मम सखी कदाचिदमन्दादनल्पात् निबिडभवदीयस्मृतिमदात् निबिडा अविरहुला या भवदीया स्मृतिः स्मरणं तत्र यो मदो हर्षः तस्मादात्मानं भवन्तं कलयति कृष्णोऽयमिति ध्यायति, तथापि हे मुरारे ! तस्याः क्षणमपि बाधा पीडा न विरमति न शाम्यति। राधायाः यो विरहस्तस्य कलना अनुभवस्तया दूना धीर्यस्याः। कल्पितेति पाठे तया कल्पिता मरणबुद्धिर्यस्याः सा तथा, बाधा कीदृशी दुःसाध्या इत्यर्थः। यदनुध्यानेऽपि ता बद्धं ते तत्र भवत्तान्मुक्तेयुक्तम्। विरहवलनेति पाठे राधायाः यो विरहस्तस्य बलनं वृद्धिस्तेनाकल्पिता धीर्यस्या इत्यर्थः ॥८५॥

अनु०—हे मुरारे ! हमारी सखी राधा मधु धारावत् अविच्छिन्न आपके प्रेमानन्द में मग्न होकर, प्रगाढ़ भाव से आपका ही चिन्तन करते करते अतिशय प्रेमानन्द वश अपने को ही श्रीकृष्ण समझने लगी है और उसकी विरह संतप्त बुद्धि क्षण-क्षण नाना विरुद्ध कल्पना करती रहती है। उसके मन की वह पीड़ा, जिसका कोई भी प्रतीकार नहीं है और एक क्षण मात्र के लिए भी वह निवृत्त नहीं हो पाती है ॥८५॥

सुखोल्लास-दोहा

राधा विरह अगाध में, तन्मय गति ह्वै जात ।
हंस ताहि तुम कृष्ण सों, कहौ रसिक अवदात ॥८५॥

मूल की भाषा पद्य—छन्द गीतिका

हे कृष्ण ! काहू काल में मम सखी यह भोरी महा ।
अति हर्ष सों सुधि करत ऐसी ताहि मैं बरनौं कहा ॥
एहो मुरारी ! ह्वै इकाङ्गी कृष्ण मानति आप कौं ।
पुनि रटत राधा राधिका बिसरति न बिरहा ताप कौं ॥८५॥

सारांश—सोरठा

राधा कौ सन्ताप मिटत नहीं है एक पल ।
कृष्ण होत जब आप तब मानति राधा बिरह ॥८५॥

◇◇◇◇

त्वया सन्तापानामुपरि परिमुक्तातिरभसा—
दिदानीमापेदे तदपि तव चेष्टां प्रियसखी ।
यदेषा कंसारे ! भिदुरहृदयं त्वामवयती
सतीनां मूर्द्धन्या भिदुरहृदयाभूदनुदिनम् ॥८६॥

टीका—उद्वेगात्यन्ततां वर्णयति त्वयेति । हे कंसारे ! त्वया रभसात् बेगात् इदानीं सन्तप्तानां दुःखानां उपरि यत्तदोर्नित्यसम्बन्धात् यदपि यद्यपि परिमुक्ता प्रक्षिप्ता प्रियसखी तदपि तथापि तव चेष्टां आपदं प्राप्तवती,कुत इत्याह-यद्यस्मात् त्वां भिदुहृदयं भेदनशीलं हृदयं तप्तहृदयमितियावत् अवयती जानती अनुदिनं दिनं दिनं भिदुरहृदयाभूत्,एतेन प्रतिदिनमस्याः हृदयं विदीर्णं भवतीति ध्वनितम् । ननु मां तथाविधं वीक्ष्य किमिति स्वयं तथाभूदित्याह-सतीनां मूर्द्धन्या पतिव्रतानां श्रेष्ठा, पतिव्रतानार्य्यो हि स्वामिव्रतपरायणाः भवन्तीति, अत्र भिदुरशब्दः छले,

एतेन वणिकप्रमा भवान्निति भक्त्या ध्वनितम् । अवयवीति हन: शठ ।।८६।।

अनु०—हे कंसारे ! यद्यपि आपने हमारी प्रिय-सखी को विरह ज्वालाओं में डाल रक्खा है, तथापि ऐसे महान् सन्तापोत्पादक दु:ख के समय में भी विरहाधिक्य के कारण वह तुम्हारी लीलाओं का ही अनुकरण करती रहती है। कारण यह है कि तुम्हारे हृदय को कुलिश-कठोर जानकर वह भी अपने को वज्र-वत्-कठोर दशा में प्राप्त कर चुकी है। अर्थात् उसे देखकर यह नहीं समझा जाता कि उसके हृदय में प्राणस्पंदन है या नहीं ! तुम्हारे विरह जनित गंभीर शोक में वह मृत-प्राय हो गई है। "यो यद्धर्म स एव स:" इस न्याय के अनुसार जो जिसका अनुकरण करता है वह उसी के स्वभाव का हो जाता है, यह लोक में प्रसिद्ध है। इस पद्य में 'भिदुर हृदयम्' इस पद मे श्रीकृष्ण के हृदय की अत्यन्त कठोरता तथा प्रेम-शून्यता ध्वनित होती है एवं श्रीराधा के अन्तर्गूढ़ विरह शोक से कुलिश काठिन्यता ध्वनित होती है ।।८६।।

मुखोल्लास—दोहा

ललिता राधा प्रेम की, अद्भुत दशा जनाय।
श्री ब्रज पति सों कहन हित, हँसहि रही सुनाय ।।८६।।

मूल की भाषा पद्य—छप्पय

अति सन्तापन माहिँ आप नैँ सखी हमारी।
करी त्याग श्री कृष्ण ! तवै आकृति यह धारी ।।
कृष्ण रूप ह्वै गयी कठिन जिमि हृदय तुम्हारौ।
ताही सरिस कठोर कियौ चित जग तैं न्यारौ ।।
यह सतिन माँह संसार में अधिक शिरोमणि गुण मयी।
बनि एकांगी प्रभु प्रेम में वज्र हृदय राधा मयी ।।८६।।

सारांश—सोरठा

जैसे आप कठोर तैसी ही राधा भयी।
साँचे लोचन कोर मिलत मिलें आकृति प्रकृति ॥८६॥

००००

समक्षं सर्वेषां विहरसि समाधिप्रणयिना-
मिति श्रुत्वा नूनं गुरुतरसमाधिं कलयति।
सदा कंसाराते! भजसि यमिनां नेत्रपदवी-
मिति व्यक्तं सज्जीभवति यममालम्बितुमपि ॥८७॥

टीका—ध्यानमुक्त्वा समाधिमाह समक्षमिति। प्रियसखीसि पूर्व्वश्लोका-दिहान्वेति। हे कंसाराते! सर्व्वेषां समाधिप्रणयिनां "समाधिर्ध्यातृध्येययोरैक्यं" तत् प्रणयिनां समाधियुक्तानामिति यावत्, समक्षं प्रत्यक्षं यथास्यात्तथा विहरसि इति श्रुत्वा नूनं गुरुतरसमाधिं कलयति करोति। तत्र अहमिति भेदाभावेन विलासादिसुखानुभावाभावात् उपायान्तरमनालोच्य मरणमेव इच्छतीति श्लेषेणाह सदेति-यमिनां योगीनां नेत्रपदवीं सदा भजसि इति हेतोः व्यक्तं, स्फुटं यथास्यात्तथा यममप्यालम्बितुं आश्रयितुं सज्जीभवति उद्यता भवति। यमं आसनधारणादिश्च। अथ च यमं शमनं आलम्बितुमित्यर्थः ॥८७॥

अनु०—हे कंसरिपो! समाधिपरायण योगिजनों के निकट आप प्रत्यक्ष भाव से प्रगट होते हैं, यह बात सुनकर राधा आजकल महान् योगाभ्यास करने लगी है एवं बाह्य इन्द्रिय संयमी मानवों को आप प्रत्यक्षरूप से नयन गोचर होते हो, इस कारण वह इन्द्रिय निग्रह करने में भले प्रकार प्रयत्न करती है। इससे प्रगट होता है कि वह और तो क्या यमराज अर्थात् काल को भी आलिंगन करने को उद्यत हो गई है ॥८७॥

मुखोल्लास-दोहा

सिद्ध पुरुष तांत्रिक भिषक, पूजें गिरिजा पाय।
हरि न मिले राधा तबै करत योग चित लाय ॥८७॥

मूल की भाषा पद्य—छप्पय

अहो कंस वध कर्त्ता कृष्ण! सकल योगी जन।
जे समाधि प्रिय तीन के सन्मुख रहत सनातन॥
यह सुनि मेरी सखी राधिका चिर समाधि धरि।
बैठति किन्तु समाधिन के दृग पथ बिहरत हरि॥
यह राधा चारु विचार करि संयमादि योगन करत।
शुभ दरस आप कौ होय प्रभु फल एकै यह चित धरत॥ ८७॥

सारांश—सोरठा

दृग पथ विहरत आप कृष्ण सदा योगीन के।
दरस मिलन जिय थाप राधा धरति समाधि चिर ॥८७॥

◇◇◇◇

मुरारे! कालिन्दीसलिलचलदिन्दीवररुचे!
मुकुन्द! श्रीवृन्दावनमदन! वृन्दारकमणे!।
व्रजानन्दिन्नन्दीश्वरदयित! नन्दात्मज! हरे!
सदेति क्रन्दन्ती परिजनशुचं कन्दलयति ॥८८॥

.का—अथ लज्जात्यागं वर्णयति मुरारे! इति। अत्रापि पूर्वोक्तं मन
खीत्यन्वयेति। इत्यनेन प्रकारेण सदा क्रन्दन्ती इयं परिजनानां सखीन
:चं शोकं कन्दलयति संवर्द्धयतीत्यर्थः। इति किं मुरारे! कालिन्दी-
लिले पतत् यदिन्दीवरं नीलपद्मं तद्वत् रुचिः कान्ति यस्य तत
म्बोधनं, हे वृन्दावनमदन! कन्दर्प हे वृन्दारकमणे! देवश्रेष्ठ! व्रजा-
न्दिन्! व्रजजनानन्दकरणशील! नन्दीश्वरः शिवः तस्य दयित प्रि
प्रियो यस्येति विग्रहो वा। हे नन्दपुत्र हे हरे इति क्रमेण ॥८८॥

अनु—हे मुरारे ! हे यमुना सलिल नीलेन्दीवर रुचे ! हे मुकुन्द ! हे वृन्दावन नव कन्दर्प ! हे इन्द्रनील—कान्ति मणे ! हे ब्रज जन आनन्द दाता ! हे नन्दीश्वर-प्रिय ! हे नन्दनन्दन ! हे सकल दुःख हारिन् ! सर्वदा इस तरह सम्बोधन पूर्वक आपके नामोच्चारण करती हुई, हमारी सखी राधा विलाप कर कर के क्रन्दन करती हुई अस्मदादि सखी वर्ग के शोक को बढ़ाती रहती है ॥८८॥

मुखोल्लास—दोहा

जपत रहत है राधिका, नाम ध्यान के संग।
हंस जाय के कृष्ण सों, कहिये सबै प्रसंग ॥८८॥

मूल की भाषा पद्य—छप्पय

नील कमल दल जमुना जल सँग आभा धारे।
तिन समान शुचि रुचि अंगन की शोभा वारे ॥
अहो मुरारे ! मुक्ति देन हारे ! ब्रज सुख प्रद।
वृन्दावन के मदन ! देव वृन्दारक मणि मद ॥
हे नन्दलाल ! शिव-परम प्रिय ! हे हरि ! कहि रोदन करति।
तथा रुवावति सखिन को इमि राधा दिन प्रति आचरति॥८८॥

सारांश—सोरठा

मलिन वदन बहु बार जपत नाम रोदन करत।
सखियन शोक अपार होत निरखि राधा दशा ॥८८॥

००~०

समन्तादुत्तप्तस्तव विरहदावाग्निशिखया
कृतोद्वेगः पञ्चाशुगमृगयुवेधव्यतिकरैः।
तनूभूतं सद्यस्तनुवनमिदं हास्यति हरे ?
हठादद्य श्वो वा मम सहचरी-प्राणहरिणः ॥८९॥

टीका—तव विरहवशादियं मरिष्यतीत्याह समन्तादित्यादि। हे हरे! अद्य श्वो वा मम सहचरीप्राणहरिणः प्राण एव हरिणोऽतिवेगावहत्वात् वलादिदं तनुवनं सद्यः अतिझटिति हास्यति त्यक्ष्यति। त्यागकारण-माह-तव विरहदावाग्निशिखया तव विरह एव दावाग्निः वनवन्हिस्तस्य शिखया समन्तात् सर्व्वत्र उपतप्तः विरहानलस्य कुत्रापि निर्व्वाणाभा-वात्। पुनः कीदृक् पञ्चाशुगेति-पञ्चाशुगः कामः स एव मृगयुर्व्याधः तस्य ये वेधाः व्यतिकरास्तैः कृतोद्वेगः कृत उद्वेगो यस्य सः, वनं कीदृशं तनुभूतं अतिक्षीणं अन्योऽपि हरिणः सर्व्वत्रातिव्यापकवनाग्निना तप्तः पञ्चा अतिविस्तीर्णा आशुगाधाना यस्य एवम्भूतस्य व्याधस्य वेधनिवहनात्यल्पीभूतं वनं हठात् सद्यो जहातीति ध्वनिः। अत्र श्लोके अद्य श्वो वेति विशेषोक्त्या सद्य इति निरर्थक निर्णयादाह—हठात् सद्यस्तत्क्षणमेव अद्येति अस्मिन्नहनि श्वः परदिने वा इति वाच्यन्या-यम्। "व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि स" इत्यमरः "सद्यः सपदि तत्क्षणे" इति अनाराते इत्वः इति च ॥८६॥

अनु—हे हरे! तुम्हारे विरह दावाग्नि की शिखा से चहुँओर से सन्तप्त हुआ तथा मदन रूप व्याध के वाण समूह के आघात से पीडित हुआ, हमारी सखी राधा का यह प्राण रूप हरिण सहसा, आज नहीं तो कल उसके अतिक्षीण तनरूप वन को परित्याग कर देगा। अतः यदि उसके दर्शन की आपको अभिलाषा है तो शीघ्र ही यहां आगमन करें ॥८६॥

मुखोल्लास—दोहा

अति वियोग सें जो बढ्यौ, राधा के तन खेद।
हंस जाय तुम कृष्ण सों, कहौ यथारथ भेद ॥८६॥

मूल की भाषा पद्य—छन्द रोला

हे हरि! मेरी सखि राधा कौ प्राण हरिण सम।
लघु वन देह लगी दवाग्नि तव विरह दुरागम ॥

तहाँ वधिक सम पंचबाण दुख दैन उमाहत।
हठ करि भय वस आज कालि सों निकसन चाहत ॥८६॥

सारांश-सोरठा

राधाजी के प्रान कृष्ण तुम्हारे विरह में।
चाहत करन पयान आय बेग सुधि लीजिये ॥८६॥

००००

पयोराशिस्फीतत्विषि हिमकरोत्तंसमधुरे
दधाने दृग्भङ्ग्या स्मरविजयिरूपं मम सखी।
हरे दत्तस्वान्ता भवति तदिमां किं प्रभवति
स्मरो हन्तुं किन्तु व्यथयति भवानेव कुतुकी ॥६०॥

टीका—कन्दर्पस्य भयजननाय शिवस्य ध्यानपरेयमिदानीमिति कथयति पय इति। इयं मम सखी हरे शिवे दत्तस्वान्ता निरुद्धचित्ता, कीदृशी स्मरविजयिनः शिवस्य रूपं दधाना, यो भक्तो भवति स तदनुकारिवेशं गृह्णाति च, स्मरतापापनोदनाय चन्दनानुलेपनादिना फणिभूषण-भस्माङ्गरागयुक्तशिवसादृश्यं, कीदृक् भङ्ग्या उपलक्षितं अयमभिप्रायः-भ्रूभङ्ग्या हरेण कामो भस्मीकृतः, अतोऽहमपि तथा करोमीति। हरे कीदृशे पयोराशिस्फीतत्विषि पयोराशिः दुग्धसमूहः क्षीरसमुद्र इति यावत् तद्वत् स्फीता अतिबहुला कान्तिर्यस्य तस्मिन्, पुनः कीदृशे हिमेति हिमकरश्चन्द्रः स एव उत्तंसो शिरोभूषणं तेन मधुरे सुन्दरे, एवम्भूता यतः तस्मात् इमां राधां हन्तुं स्मरः किं प्रभवति नैवेत्यर्थः, स्वजेतृशिवरूपत्वात् किन्तु कुतुकी सन् भवानेव व्यथयति वधं करोति। अथ च हेतवे मम सखी भवति त्वयि दत्तस्वान्ता स्मरविजयिरूपं दधानेति विशेषणेन अतिविरहानलव्याकुला तन्निवारणाय मृणालादिधारण-युक्तम्। यथा जयदेवो—"विहितविशदबिसकिशलयवलयेति"। त्वयि

कीदृशे पश्च इति पयोराशिरिति योग्यतया यमुनाजलसमूहो ज्ञेयः। अतिश्यामत्वात् तद्वत् स्फीतत्विषि पयोराशिः पुञ्जीभूतवनं यस्मात् स मेघ इत्यर्थः ॥६०॥

अनु०—हमारी प्रिय सखी राधा अपने मन को, दुग्ध-राशि समान धवल काय उन चन्द्रचूड श्री-शंकर में, जिन्होंने अपने ललाट के तृतीय नेत्र से मदन को भस्मीभूत किया था, समर्पण कर चुकी है, अर्थात् उनका ध्यान करने लगी है। अतः कामदेव अब हमारी सखी पर शराघात करने को समर्थ नहीं है। किन्तु कौतुकी आप हमारी सखी श्रीराधा के प्राणों को विरहवारिधि में मग्न कर कर के उनके जीवन से खेला करते रहते हैं अर्थात् तुम ही उसको विशेष पीडा दे रहे हो। तात्पर्य यह कि, अप्राकृतिक मदन के अतिरिक्त उसको कोई पीडा नहीं दे सकता है ॥६०॥

मुखोल्लास—दोहा

अब लों राधा देह में, विद्यमान हैं प्राण।
करति सूचना कृष्ण प्रति, ललिता प्रकट प्रमाण ॥६०॥

मूल श्री भाषा पद्य—छप्पय

हे हरि ! हे श्री कृष्ण ! सखी राधा मेरी जग।
जीतन हारी मदन पराक्रम निज कटाक्ष दृग ॥
धारें ऐसौ रूप बहै घन पटल समद्युत।
राजति कान्ति शरीर मोर दाभूपन युत ॥
मन दीन्हे तुम छवि पै रहै ताहि काम वध सकत का।
नहिं कदापि, पै आप ही करत खिलारी यह व्यथा ॥६०॥

सारांश—सोरठा

अपने रूप नवीन जीतत है जो का कों।
ता पर हू लयलीन रहत आप में राधिका ॥६०॥

विजानीषे भावं पशुपरमणीनां यदुमणे !
न जानीमः कस्मात्तदपि बत मायां रचयसि ।
समन्ताद्ध्यात्मं यदिह पवनव्याधिरलपद्
बलादस्यास्तेन व्यसनकुलमेव द्विगुणितम् ॥६१॥

टीका—ननूद्धवद्वारा सा या शिक्षिता तेनाध्यात्मयोगेनैव सर्व्वत्र मां शपन्तीति किमिति विरहोपशमनं न करोति चेत्तत्राह-विजानीषे इति । पशुपरमणीनां गोपीनां भावमभिप्रायक्रीडाकौतुकानुरूपं त्वं विजानीषे, हे यदुमणे ! बत खेदे तदपि तथापि किमर्थं मायां कपटं आध्यात्म्याद्युपदेशरूपं रचयसीति न जानीमः । अनवरतत्यागादिरूपसुखमिच्छतीनां योगोपदेशः मायैवेत्यर्थः, पवनव्याधिरुद्धवः इह व्रजे यदध्यात्मं अलपत् कथितवान् तेन हेतुना अस्या राधायाः समन्तात् सर्वतः व्यसनकुलं सन्तापसमूहः द्विगुणितम् । तदुपदेशप्रकारेण तव भावनपूर्वानुभूति चिना संस्मरणाद्विरहवेदनाया उज्जृम्भमाणत्वात् । "माया दम्भे कृपायाञ्च" ॥६१॥

अनु०—हे यदुपते ! गोप-सुन्दरियों के हृदय का अभिप्राय तुम भली भाँति जानने वाले हो, अर्थात् तुम्हारा व्रज में आगमन ही इन्हें अभीष्ट है, फिर न जाने क्यों तुम कपटावलम्बन कर रहे हो । तुम्हारा भेजा हुआ दूत उद्धव, जिसके द्वारा आपने हमको ज्ञानामृत भेजा था वह विस्तारपूर्वक 'परमात्म तत्त्व' का उपदेश सुनाकर श्रीराधा की विरह व्यथा को शान्त करना तो दूर रहा उलटा वेगवती कर गया है । व्रज-सुन्दरियों ने कुरुक्षेत्र मिलनावसर पर कहा भी है कि—आपने जो चरण-ध्यान करने का उपदेश किया है, वह तो संसार-सिन्धु के उद्धार का साधन है, न कि विरह-सागर में तड़पते जनों के उद्धार का ॥६१॥

मुखोल्लास—दोहा

विरह व्यथा बाधति तनहि, सो हंसहि समझाय।
ललिता राधा की दशा, बरनत अति बिलखाय ॥६१॥

मूल की भाषा पद्य-छन्द शैला

हे यदुमणि श्री कृष्ण! भाव गोपिन के जानत।
तुम जो माया रचत हम न ताकों पहचानत॥
हे परमात्मन् राधा बहु विधि बात न्याव सों।
बातुल पक्षी सरिस पुकारत दुख अगाध सों ॥६१॥

सारांश—सोरठा

राधा करत विलाप बातुल पक्षी की सरिस।
होत विविध सन्ताप कृष्ण आप के विरह में ॥६१॥

००००

गुरोरन्तेवासी स भजति यदूनां सचिवतां
सखीयं कालिन्दी किल भवति कालस्य भगिनी।
भवेदन्यः को वा नरपतिपुरे मत्परिचितो
दशामस्याः शंसन् यदुतिलक! यस्त्वामनुनयेत्॥६२॥

टीका—ननु यद्याध्यात्मशिक्षया विरहवेदना द्वैगुण्यं भवति तर्हि किमिति निजोदन्तं मयि प्रेरितवत्यसीति चेत्तत्राह गुरोरिति। यो गुरोरन्तेवासी बृहस्पतिशिष्य उद्धवः स यदूनां सचिवतां सहायतां भजति, अतोऽस्मदर्थे कथयित्वा कथं निजकुलमङ्गलरूपं भवन्तं अत्र प्रेरयिष्यतीति भावः। यद्वा मङ्गलसचिवत्वात् क्षणमप्यन्यत्र गन्तुमशक्तः कुतोऽस्माभिः सह दर्शनं यत् स्ववार्त्तां ब्रूम इति। ननु अविच्छिन्नप्रवाहा यमुना अस्तीति चेत्तत्राह—इयं कालिन्दी सखी सहनिवासिनीत्वात् किल निश्चितं कालस्य यमस्य भगिनी भवति अतो निर्दया, यमः प्रेताधि-

पतित्वात् सततं जनमरणप्रियस्तद्भगिनीत्वादियमस्मन्मरणान्वेषणी कथमस्मज्जीवनहेतुं त्वयि वार्त्ता कथयत्विति भावः । नरपतिपुरे राज्ञः पुरे अन्यः को वा मत्परिचितो भवेत् नास्तीत्यर्थः । नरपतिपुरत्वादन्येषां दूषणावेशत्वमुक्तम् । हे यदुतिलक ! अस्या राधायाः दशामवस्थां शंसन् कथयन् यस्त्वामनुनयेत् प्रसादयेत् । एतादृक् कोऽन्यो भवेदिति सम्बन्धः ॥६२॥

अनु०—हे यदुकुल भूषण ! बृहस्पति जी का शिष्य वह उद्धव, जोकि अब यादवों का मन्त्री पद प्राप्त कर चुका है और वह सखी यमुना भी तो यमराज की भगिनी है, अतः अब वह भी निर्दय हो गई है ! ये दोनों उद्धव तथा यमुना हमारे परिचित होने पर भी इनमें से कोई हमारे दुःख की कहानी आपको नहीं सुनाता ? अब इनसे अधिक मधुपुरी में कोई हमारा परिचित जन भी तो नहीं है जो हमारी सखी की दिव्योन्मादमयी विरह दशा, विनय पूर्वक निवेदन कर आपसे वृन्दावन आगमन की प्रार्थना करे ? अतएव इस हंस को दूत बनाकर भेजने के सिवाय कोई उपाय दिखाई नहीं पड़ता है ॥६२॥

मुखोल्लास-दोहा

विरह दशा जैसी करी, राधा की अति दीन ।
कौन कहै श्रीकृष्ण सों, तुम बिन हंस प्रवीन ॥६२॥

मूल की भाषा-रोला छन्द

उद्धव सुरगुरु शिष्य सचिव यदुकुल के जानिय ।
यमुना सखी हमारी यम की बहन प्रमानिय ॥
और कौन मथुरा में जाकौं जानत हैं हम ।
हे यदु तिलक सँदेस सुनावहि आपहि करि श्रम ॥६२॥

सारांश–सोरठा

परिचित मथुरा माहिँ उद्धव कालिन्दी बिना।
आन पुरुष कोउ नाहिँ जो वह कहै वियोग दुख ॥६२॥

००००

विशीर्णाङ्गीमन्तर्व्रणविलुठनादुत्कलिकया
परीतां भूयस्या सततमपरागव्यतिकराम्।
परिध्वस्तामोदां विरमितसमस्तालिकुतुकां
विधो! पादस्पर्शादपि सुखय राधा-कुमुदिनीम् ॥६३॥

टीका—त्वां विना चन्द्ररहितायाः कुमुदिन्या दशामियं प्राप्तेति श्लेषेणाह विशीर्णाङ्गीमिति। हे विधो! हे विष्णो! पक्षे चन्द्रपादस्पर्शादपि आस्तां क्रीडाकौतुकमाधुर्य्यदानं चरणस्पर्शादपि राधाकुमुदिनीं तां राधैव कुमुदिनी तां सुखय, पक्षे-पादः किरणः तत्स्पर्शनात् तद्दानात् राधैवकुमुदिनीति समासः तदेकतानत्वादुभयोः साम्यमुभयपक्षानुकूलानि विशेषणान्याह, कीदृशीं अन्तर्व्रणविलुठनात् अन्तरभ्यन्तरे व्रणः वेदना तेन विलुठनं पतनं तस्मात् विशीर्णाङ्गी विशीर्णानि विरहज्वरतया अवशानि करचरणादीनि यस्याः, तथा च भरतः—"अङ्गं विरहसन्तप्तं यत्र कुत्रापि मुञ्चतीति"। पक्षे-विगलितानि विविक्तानि अङ्गानि दलानि यस्याः, पुनः कीदृशीं भूयस्या अति प्रचुरतया उत्कलिकया उत्कण्ठया परीतां व्याप्तां युक्तामिति यावत्। पक्षे—उत्कलिका उद्गता भूयसी या कलिका तया, इन्दुदर्शनं विना कुमुदिनीनां विकाशाभावात्। पुनः कीदृशीं सततं सर्वदा उपरागः कुत्सितो यो रागो रमणादीच्छा तस्य व्यतिकरः व्यतिसङ्गः सङ्गमो यस्याः, यद्वा उपरागेण व्यतिकरोऽधरचरणादीनां लौहित्यं यस्याः, विरहवेदनया मालिन्या, पक्षे—विद्यमानः परागव्यतिकरः रजः संसर्गो यस्याः तां, पुनः कीदृशीं परिध्वस्तः दूरीभूतः आ सर्वतो भावेन मोदो हर्षो यस्याः, पक्षे-आमोदोऽतिनिर्हारी-

गन्धः विशीर्णपुष्पत्वात् , पुनः कीदृशीं विरमितं समस्तानां आलीनां सखीनां कुतुकं कौतुकं यया तां, पक्षे—विरमितसमस्तभ्रमरकौतुकां मकरन्दाभावात् ॥६२॥

अनु०—हे गोकुलचन्द्र ! यह श्रीराधा अन्तर्गूढ़ विरह जनित से सन्ताप के कारण भूमि में लोटती रहने से इसका देह अत्यन्त क्षीण होचला है एवं उत्कण्ठा महान् दीख पड़ती है। प्रगाढ़ विरह निबन्धन द्वारा सकल वस्तुओं से विराग हो चुका है, अंग-कान्ति मलिन सी हो चुकी है, अब उसकी अङ्गशोभा पहले की भांति कनक समान गौर नहीं दिखलाई पड़ती, उसका अब आनन्द विलीन हो गया है। सखियों के साथ के हास्य-कौतुक को भूल चुकी है। ऐसी दशा में निज सुधा-किरण के स्पर्श द्वारा इस राधा-कुमुदिनी को सुखी कीजिये। कुमुदिनी पक्ष में—हे चन्द्र ! जो अन्तर्गत कीटादिक्षत द्वारा अत्यन्त म्लान होचुकी है,जो तरङ्गाघात से बार २ आन्दोलित होती रहती है, जिसका वर्ण, (प्रभा) एवं सौरभ विदूर हो चुका है एवं सूखी सी हो जाने के कारण जिसे भ्रमरगण ने भी त्याग दिया है उस कुमुदिनी को निज किरणों का स्पर्श करके सुखी कीजिये ॥६२॥

सुखोल्लास-दोहा

हंस कहौ तुम कृष्ण सों, विरह व्यथा की पीर।
तुम बिन राधा रैन दिन, व्याकुल महा अधीर ॥६२॥

मूल की भाषा पद्य—छन्द घनाक्षरी

कुमुदिन राधा कों हैं आप कृष्ण ! चन्द्र सम,
दरस पद आप कौ किरण समान है।
जल माहिँ नलिनी की लता पाँति फैली रहैं,
तैसे वन माहिँ राधा विकल अपान है ॥

मुरझाने फूल सबै जैसे वाके दरसत,
राधा की मोद रहित तन मुरझान है।
जात रहे कैरव सों अलिन के दृश्य तैसे,
राधा की सखिन तज्यौ कौतुक विधान है॥९३॥

सारांश—सोरठा

करी विरह के ताप देह दशा दुर्बल महा।
निस दिन करत विलाप लोटति राधा धरनि तल॥९३॥

◇◇◇◇

विपत्तिभ्यः प्राणान् कथमपि भवत्सङ्गमसुख-
स्पृहाधीना शौरे! मम सहचरी रक्षितवती।
अति क्रान्ते सम्प्रत्यवधिदिवसे जीवनविधौ
हताशा निःशङ्कं वितरति दृशौ चूतमुकुले॥९४॥

टीका—भवदागमनप्रत्याशया एतावन्तं कालमनैषीदिदानीं निराशेयं याता इत्याह विपत्तिभ्य इति। हे सौरे! मम सहचरी सखी भवत्सङ्गम-स्पृहा तदधीना विपत्तिभ्यः कथमपि प्राणान् रक्षितवती, सम्प्रति इदानी-मवधिदिवसे आगमनसङ्केते तद्दिवसे अतिक्रान्ते सति जीवनविधौ हताशा सती निःशङ्कं यथास्यात्तथा दृशौ चूतमुकुले वितरति ददाति। अयम्भावः—तावन्तं कालं चूतमुकुलावलोकनाद्वेगातिशयेन प्राणाः कदाचिद् यदि गच्छन्ति तदा भवत्सङ्गमसुखं न संभविष्यतीति शङ्कया चूतमुकुलानि नालोकितवती, इदानीं तत्र निराशत्वात् निःशङ्कं निरीक्ष्यते, एतेन विरहस्यातिधार्ष्ट्यता चोक्ता॥९४॥

अनु०—हे शूर-कुलोद्भव! (इस संबोधन से क्षत्रियोचित कु-टिलता तथा क्रूरता ध्वनित होती है) हमारी सहचरी राधा, तुम्हारे मिलन की आशा से अधीन हो, बड़ी कठिनता से अपने

बहिर्गत प्राणों की रक्षा कर रही है। किन्तु जिस अवधि पर तुम ब्रज में लौट आने की प्रतिज्ञा करके गए थे उसके व्यतीत हो जाने पर हमारी सखी अब जीवन धारण में हताश होकर निर्भयता पूर्वक आम्र मुकुल पर दृष्टि डालती रहती है। प्रथम तुम्हारी मिलन आशा से किसी प्रकार प्राण धारण कर रही थी, अब निराश हो चुकी है अतः शीघ्र प्राण प्रयाण कर जावें इसी कारण बसन्त के आम्र मुकुल का निरीक्षण कर रही है। अब उसे प्राण धारण की साध नहीं रही है अतः निर्भय हो आम्र मुकुल का दर्शन कर रही है। अब अधिक श्रीकृष्ण की स्मृति उद्दीपित हो दुख न दे सके और वह मरण को प्राप्त हो जावे। पहले तो वह उद्दीपक वस्तु देख नयन मूंद लेती थी अब उसे जीवन की साध नहीं है, अतः आप ब्रज में शीघ्र आगमन करें ॥६४॥

मुखोल्लास—दोहा

राधा बाधा हरन कौ, कृष्ण दरस उपचार।
हंस कहौ तुम जाय के, सकल कथन कौ सार ॥६४॥

मूल की भाषा पद्य—छप्पय

शूर तनय श्री कृष्ण ! सखी मेरी राधा यहि।
आप मिलन हित प्राण बचाये घोर विपति सहि ॥
सुख कौ हेतु विचारि सबै विधि दरस तुम्हारौ।
मिलन दिवस की आस किये तकि रही सहारौ ॥
दै रही रसालन बौर में दीठि पीठि जग सों दिये।
अति ही निराश शंका रहित प्राण तजन कौ प्रण किये॥६४॥

सारांश—सोरठा

किये दरस की आस अब लों यह जीवत रही।
सब विधि होय निरास राधा तन तजिनौ चहै ॥६४॥

००००

प्रतीकारारम्भश्लथमतिभिरुद्यत्परिणते-
र्विमुक्ताया व्यक्तस्मरकदनभाजः परिजनैः ।
अमुञ्चन्ती सङ्गं कुवलयदृशः केवलमसौ
बलादद्य प्राणानवति भवदाशा-सहचरी ॥९५॥

टीका—दशमीदशां वर्णयति प्रतिकारेत्यादि । कुवलयदृशो राधाया असौ भवदाशासहचरी भवत् प्राप्तिवासनैव सखी केवलं बलात् अकुलत्वेन प्राणान् अवति रक्षति, अस्या इति पाठः,कीदृश्याः परिजनैः विमुक्तायाः, कीदृशैः प्रतिकारस्य विरहज्वरोपशमनोपायस्य य आरम्भस्तत्र श्लथा व्यापारशून्या मतिर्येषां अचिकित्स्यत्वात् , कीदृश्याः उद्यत् परिणतेः उद्भवन्ती परिणतिरन्तिमभावावस्था यस्याः, व्यक्तं यत् स्मरकदनं कामग्लानिस्तद्भजति, भवदाशासहचरी कीदृशी सङ्गं आसक्तिं अमुञ्चन्ती, एतेन भवदाशैव जीवनहेतुरित्युक्तम् । अनेन चिरजीवितत्वञ्च विरहिण्याः ध्वनितम् । यत उक्तं—"पुनः पुनः प्रवर्त्तन्ते निवर्त्तन्ते पुनः पुनः । अवस्था हृदये यूनो वंतश्च चिरजीवितेति"। अन्यमपि औषधादिभिरसाध्यव्याधि आसन्नमरणं बुद्ध्वा बन्धुभिस्त्यक्तमपि आशा न त्यजतीति ध्वनिः ॥९५॥

अनु०—हे कृष्ण ! आपके आगमन की आशा ही जिसकी सहचरी है, ऐसी यह कमल नयना 'राधा' जैसा कि वह आपके प्रेम में पीड़ित हो रही है, सर्वथा उसके अयोग्य है, भूमि पर शयन कर रही है तथा अब इसकी अन्तिमावस्था (दशवीं दशा) अति निकट है और सहचरी वर्ग उसकी पीड़ा दूर करने के उपायों का भी त्याग कर चुका है तो भी आपकी आगमन आशा रूप सहचरी इसका साथ नहीं छोड़ती और उसके बहिर्गमनोन्मुख प्राणों को बलपूर्वक धारण कर रही है । इसीलिए श्रीराधा कल जीवित रह सकेगी इतने सोच-विचार का समय भी न लगाते हुए आप शीघ्र ही वृन्दावन आगमन करें ॥९५॥

मुखोल्लास–दोहा

हंस कहौ श्री कृष्ण सों, राधा दुख परिणाम।
चाहत प्राण पयान कों, ठहरे अधरन धाम ॥९५॥

मूल की भाषा पद्य–छप्पय

अहो कृष्ण ! राधा जो कमल लोचननि वारी।
तज्यौ न केवल संग सखी यह आस तिहारी ॥
सो अब लौं करि रही प्राण रक्षा है ताकी।
रोग निवारण माहिँ अन्य सखियन मति थाकी ॥
पुनि वहै त्यागि ताकों गईं जानि मृत्यु आई निकट।
बचि गई मरन तें पै सहत अब मनसिज पीड़ा प्रकट ॥९५॥

सारांश–सोरठा

अबै त्यागती देह राधा व्यथित वियोग रुज।
पूरित परम सनेह दीप शिखा लौं दिपत तन ॥९५॥

००००

अये रासक्रीडारसिक ! मम सख्यां नवनवा
पुरा बद्धा येन प्रणयलहरी हन्त गहना।
स चेन्मुक्तापेक्षस्त्वमसि धिगिमां तूलशकलं
यदेतस्याः नासानिहितमिदमद्यापि चलति ॥९६॥

टीका––भवदपेक्षया तस्याः जीवनं निन्दितमेवेत्यत आह अये इति। अये इति सकोपसम्बोधनं विषादे वा, हे रासक्रीडारसिक ! मम सख्यां येन अर्थात्त्वया पुरा पूर्वं नव-नवा प्रतीक्षणं नूतना प्रणयलहरी प्रेम-तरङ्गः बद्धा जनिता स चेन्मुक्तापेक्षस्त्यक्तापेक्षः स त्वमसि भवसि हन्त खेदे तदा इमां राधां धिक् कुरु इत्यत आह यदिति यद्यस्मात् एतस्याः नासा-निहितं जीवति न वा इति ज्ञातुं नासाग्रेऽर्पितं इदं तूलसकलं तूलखण्डं

अद्यापि चलति, अयं भावः त्वयि सा प्रेम्णि सति यदि जीवति तर्हि सकलमेव जीवनं,त्वयि तु निरपेक्षे भवदाशया जीवति तत् एतस्या गर्हितमेवेति, कीदृशी प्रणयलहरी गहना निविडा अन्यापि प्रणयलहरी गहना अगम्या भवति अथ च गहनैव सदा, इदानीमपि तदा शमति क्लेशेन जीवनधारणात् ।"गहनं कालयुगेषु गात्रेषु च नपुंसकम् । गहनं स्यान् दुःखकाननयोरपीति" मेदिनी । "तूलं स्याद्ब्रह्म-दारुणि-आकाशे च पिठे न स्त्रीति" स्थलेऽति प्रसिद्धः ॥९६॥

अनु०–हे रास-रसिक ! पहले पहले आपही ने तो हमारी सखी,राधा के साथ नित्य नवीन अनुराग उत्पन्न कर उसे दुर्गम प्रेम-लहर में बाँधा था, अब भी यदि तुम उसे बचाना चाहते हो, किन्तु आप तो अब भी उसकी पर्वाह नहीं करते । इससे उदासीनता ध्वनित होती है । ऐसी हमारी सखी को धिक्कार है कि अब इस दशा में भी वह आपकी अपेक्षा करती रहती है । किन्तु अब भी उसके देह में प्राण हैं कि नहीं, यह जानने के लिए जब हम लोग इसके नासारन्ध्रों के सन्मुख रुई के टुकड़े (तूल शकल) लगाते हैं तो वह अद्यापि चलते हैं अर्थात् वह अभी तक प्राण धारण किए हुए है ! तात्पर्य यह है कि तुम्हारे उदासीन रहने से अब उसके जीवन धारण के कोई लक्षण नहीं प्रतीत होते हैं । इससे हम तो उसके भाग्य की ही निन्दा करती हैं कि ऐसे समय पर भी उसके तन से प्राण वहिर्गत नहीं होते ? इस स्थान पर श्रीराधिकाजी के भाग्य को धिक्कारने के छल से उसका एक निष्ठ प्रगाढ़-प्रेम ही सूचित होता है ॥९६॥

मुखोल्लास–दोहा

होत दशा प्राणीन की, प्राण तजन की बार ।
सो राधा की कृष्ण सों, कहौ हंस निरधार ॥९६॥

मूल की भाषा पद्य-छन्द गीतिका

हे रास क्रीड़ा में रसिक श्री कृष्ण ! तुम मम सहचरी।
अति प्रेम डोरी माहिँ पहले बाँधि पुनि त्यागन करी ॥
धिक्कार ऐसे नेह पै अब तजत सो निज प्रान है।
धरि नासिका आगे रुई तब होत श्वासा ज्ञान है ॥६६॥

सारांश—सोरठा

राखे राधा प्रान केवल दर्शन लालसा।
जीवन को अनुमान होत तूल नासाग्र धरि ॥६६॥

००००

मुकुन्द ! भ्रान्ताक्षी किमपि हृदि सङ्कल्पितशतं
विधत्ते तद्वक्तुं जगति मनुजः कः प्रभवति।
कदाचित् कल्याणी विलपति यदुत्कण्ठितमति-
स्तदाख्यामि स्वामिन् ! गमय मकरोत्तंसपदवीम् ।६७

टीका—इदानीं राधाया उन्मादद्शां वक्तुं प्रक्रममाणः स्फुटं यत् प्रलपति तत् प्रस्तौति मुकुन्देति। हे मुकुन्द ! इयं भ्रान्ताक्षी चञ्चलाक्षी अथ च प्राणविगमसहितदशोक्ता, यतस्तदानीं तव न लोचनपातो जातो भवति यत् किमपि असङ्कल्पितशतं विरोधेन विरुद्धता च असम्भवात् विरुद्धं सङ्कल्पशतं विधत्ते तद्वक्तुं जगति कः प्रभवति कोऽपि नेत्यर्थः। मनोगतस्य ज्ञातुमशक्यत्वात्, यद्वा निधानार्थोऽशब्दः तद्वक्तुं जगति कोऽपि न प्रभवति, संकल्पानां प्रतिक्षणजायमाने हेत्वानियतत्वात् शतशब्दोऽयं संख्यार्थे पर्यवस्यति, किन्तु इयं कल्याणी उत्कण्ठितमतिः सती कदाचित् यद्विलपति तत् आख्यामि, कथयामि हे स्वामिन् ! मकरोत्तंसपदवीं कर्णपथं गमय प्रापय शृणु इति यावत्। मकरो मकराकृतिकुण्डले उत्तंसे यस्य स, कल्याणीति जीवनसंशयवत्या स्फुटवाङ्निर्गमेन कल्याणयोगात् ॥६७॥

भा०—दशमी दशा के अन्तर्गत सचेतना श्रीराधा के विलाप को वर्णन करते हुए कहते हैं—हे मथुरानाथ मुकुन्द ! दिव्योन्माद में घूमते हुए नयनों वाली हमारी सखी श्रीराधा, मानस-संकल्पों के भी अगोचर जो-जो कुछ करती रहती हैं, संसार का कोई भी मनुष्य उसे वर्णन करने की सामर्थ्य नहीं रखता। जब कि अत्यन्त उद्वेग वश उसकी बुद्धि चञ्चल हो उठती है, तब वह किस तरह विलाप करने लगती है आप उसे भी श्रवण कर लीजिये ॥६७॥

मुखोल्लास-दोहा

ललिता करत मराल कौं, सूचित विविध प्रकार।
कृष्ण दरस की लालसा, राधा कौ आधार ॥६७॥

मूल की भाषा पद्य—छन्द गीतिका

हे मुक्ति दाता ! चलित दृग राधा करत सौ कल्पना।
नहिं बनत बरनत दशा का करि सकत कोऊ जल्पना॥
हे स्वामि ! हे कृत मकर भूषण ! मिलन इच्छा मति किये।
जिहि भाँति कल्याणी विलपति कहत मैं सुन लीजिये ॥६७॥

सारांश—सोरठा

विविधि भाँति सन्ताप दर्शन उत्कण्ठा हिये।
राधा करत विलाप सुनिये कृष्ण कृपा यतन ॥६७॥

०००

अभूत् कोऽपि प्रेमा मयि मुररिपो यः सखि ! पुरा
परां धर्मापेक्षामपि तदवलम्बादलङ्घयम्।
तथेदानीं हा धिक् समजनि तटस्थः स्फुटमसौ
भजे लज्जां येन व्रजमिह पुनर्जीवितुमपि ॥६८॥

टीका—विशेषमनालोच्य श्रीकृष्णे ममानुरागो लज्जाय वाभूदित्याह अभूदिति। हे सखे! मुररिपोः श्रीकृष्णस्य, पुरा पूर्व्वोत्कृष्टामपि धर्म्मापेक्षां अलङ्घ्यं तदवलम्बाद्दूर-कूल धर्म्मादिकं परित्याज्य तदेकतानत्वात्। हा हेति खेदे, धिगिति कुत्सायां, इदानीं तथा तेन रूपेण तटस्थ उपहासः समजनि जातः येन उपहासेन स्फुटं व्यक्तं अहं अस्मिन्नवसरे पुनरनवधारणे क्षणं जीवतुमपि लज्जां भेजे प्राप्नोमि। तस्मादीदृगुपहासास्पदं, तथा चोक्तं—"सहसा विदधीत न क्रियामविवेकः परमापदांपदमित्यादि"। यद्वा तटस्थो शब्दो लाक्षणिकः अर्थ-मर्य्यादया जनवृन्दे वर्त्तते, तथातिवृद्धो नद्याः जलौघः तटस्थः सन् तत्रस्थवृक्षादिकं दूरीकृत्य सर्व्वत्र प्रकटीभूय स्वयं झटित्येवापगमात् मम मत्त अयमत्र वातितिष्ठेदिति, प्रेम्णा विशेषणं तटस्थ इति, किञ्च लोके हि तटस्थशब्देन हठात् कृतकार्य्यः पश्चात् चमत्कारमापन्नो जन उच्यते अत्र लक्षणया तद्धर्म्म उच्यते। "धर्म्मोऽस्त्री पुण्य-आचारे स्वभावोपमयोः क्रतौ। अहिंसोपनिषत् न्याये धनुर्यमसोमपयोरिति" मेदिनी। अलघयमिति नाम निङन्तात् लघुशब्दात् लुङ् उत्तमपुरुषः ॥१८॥

अनु०—हे सखि, ब्रज-वास के समय मेरे प्रति श्रीकृष्णचन्द्र का एक अनिर्वचनीय प्रेम उत्पन्न हुआ था, उसके लालच में आकर मैंने अपने लोक-मर्यादा रूप धर्म की भी पर्वाह नहीं की थी। उस समय ऐसा प्रगाढ प्रेम था, किन्तु इस समय स्पष्ट रूप से उसके विपरीत उदासीनता प्रतीत होती है, इसी कारण इस वृन्दावन मे क्षणमात्र भी जीवन धारण करते रह कर अब मुझे लज्जा प्रतीत होती है। अर्थात्-आसन्न मृत्यु दशा के कुछ क्षण पूर्व उसका सांसारिक ज्ञान तिरोहित हो गया था, इसी कारण वाह्य दशा में आत्मधिक्कार ही दीख पड़ती है। जो कि, एक दिन वृन्दावन में श्रीकृष्णचन्द्र की परमादरणीया के रूप में वरण की जा चुकी थी, अब उसी स्थान पर वहीं भिखारिणी होकर दुर्भाग्य की चरम

ा को प्राप्त हो चुकी है। इसी कारण अब और भी श्रीकृष्ण
ा उपेक्षित हो कर जीवन धारण करने की इच्छा नही है ॥६८

मुखोल्लास–दोहा

राधा नें बरनन कियौ, कछुक पूर्ब संवाद।
ताहि सुनावत हंस कों, ललिता सहित विषाद ॥६८॥

मूल की भाषा पद्य–छप्पय

हे सखि ललिता ! कियौ प्रेम मो माहिँ मुरारी।
ता आश्रय सों मैं मर्याद धर्म की टारी॥
प्रकट निकट कौ नेह वहै अब सब बिनसायौ।
कृष्ण बिरह नेँ हाय बड़ौ यह दुःख दिखायौ॥
या वृन्दावन में एक क्षण इहि बिधि सों संकट सहूँ।
धिक्कार मोहि लज्जा महा जो कहुँ अब जीवत रहूँ ॥६८॥

सारांश–सोरठा

त्याग्यौ हरि नेँ नेह और तजी ब्रज भूमि यह।
मै न तजौं अब देह तौ है मम जीवन अधम ॥६८॥

००००

अमी कुञ्जाः पूर्वं न मम दधिरे कामपि मुदं
द्रुमालीयं चेतः सखि ! न कतिशो नन्दितवती।
इदानीं पश्यैते युगपदुपतापं विदधते
प्रभो मुक्तापेक्षे भजति न हि को वा विमुखताम् ॥६६॥

--श्रीकृष्णं बिना सर्वं एकदैव सकारणं जातमित्याह। अमीति
! अमी कुञ्जाः द्रुमाः युगपदेव तापं, लतागृहाः पूर्वं मम
न दधिरे कृतवन्तः, अप्रीति तु प्रश्ने अपि तु सर्वा, इयं द्रुमाल

वृक्षश्रेणी कतिशः कतिवारान् मम चेतो न नन्दितवती, कलय पश्य इदानीं एते कुञ्जादयः युगपदेव तापं विदधिरे कुर्वन्ति, तत्रार्थान्तरं कथयति स्वमुखेन हेतुमाह-प्रभौ इति प्रभौ मुक्तापेक्षे त्यक्तापेक्षे त्यक्तादरे सति को वा विमुखतां न भजति अपि तु सर्व्व एव हि निश्चये, कविण इति शेषः ॥६१॥

अनु०–हे सखि ! ये वृन्दावन के कुंज समूह, श्रीकृष्णचन्द्र के व्रज-वास काल में कितने आनन्द-प्रद प्रतीत नहीं हुआ करते थे अपितु सब प्रकार से आनन्द प्रदान करते थे । और यह तरू राजी कितनी वार अपना आमोद प्रदान नहीं कर चुकी है अपितु बहुत वार आ-मोद प्रदान कर चुकी है । किन्तु देखो इस समय वेही कुंज, वेही वृक्ष समूह एक ही साथ मेरे हृदय में श्रीकृष्ण की स्मृति उद्दीपन करके मुझे विरह संताप दायक हो रही हैं । हा ! जब प्रभु श्रीकृष्ण ही उदासीन होगए हैं तो उसी ईश्वर के अधीन यह जगत् भी मेरे लिए क्यों न विपरीत भाव धारण करेगा । अर्थात् उसके निरपेक्ष होजाने पर संसार की सकल वस्तु मात्र ही विपरीत भाव धारण कर लेगी ॥६१॥

मुखोल्लास–दोहा

ललिता सों जो कछु कह्यौ, राधा निज तन ताप ।
कहत हंस सों सो सवै, पूर्व प्रसंग कलाप ॥६१॥

मूल की भाषा पद्य–छप्पय

हे सखि ललिते ! पहले लता कुंज या बन की ।
भई कहा नहिं सदा मोद दायक सो मन की ॥
कहा न कीनों हर्षित चित बहु बिधि पादपगन ।
अब तू देखि दुखद बनि ये जारत हैं मम तन ॥
अलि ! जब मोकों श्रीकृष्ण प्रभु त्यागन की इच्छा करत ।
तब को ? न भला या जगत् में बिमुख भयौ जान्यौ परत॥६१॥

सारांश—सोरठा

करै स्वामि निज त्याग विमुख होहिं सुख प्रद सकल।
वापी सरित तड़ाग वन उपवन फीके लगैं ॥९९॥

००००

गरीयान् मे प्रेमा त्वयि परमिति स्नेहलघुता
न जीविष्यामीति प्रणयगरिमाख्यापनविधिः।
कथं नायासीति स्ववशपरिपाटीप्रकटनं
हरौ सन्देशाय प्रियसखि ! न मे वागवसरः ॥१००॥

टीका—ननु त्वं स्वयमेव श्रीकृष्णं प्रति वाचकं किं न प्रेरयसीति चेत्तत्राह गरीयानिति। त्वयि मम प्रेमा गरीयान् अतिगुरुतर इति अर्थाद्वचनं परं केवलं स्नेहलघुता, परस्परतुल्यता प्रेम्णोऽभावात्, यदि मय्यर्पितस्य तथाविध प्रेमास्ति तदा तत्प्रकाशनमेवायुक्तम्, तस्मान्मयि स्नेहलाघवं तस्य, अथ न जीविष्यामि इति नु प्रणयगरीमाख्यापनविधिः प्रेम्णो यो गरिमा गुरुत्वं तद् प्रकाशविधानं तस्मादेतदयुक्तमित्यर्थः। अपि च त्वं कथं नायासि नागच्छसि स्ववशपरिपाटीप्रकटनं अयम्। यद्वशवर्त्ती इति या परिपाटी तस्याः प्रकाशः एतदपि कुलजाया अयुक्तम्। तस्मात् हे प्रियसखे हरौ श्रीकृष्णे सन्देशाय वाचिकदानाय मे मम वागवसरो वचनावकाशो नास्ति, कया रीत्या सन्देशं प्रेरयामीति भावः ॥१००॥

अनु०—यदि मैं श्रीकृष्ण-चन्द्र के निकट यह कहकर सम्वाद भेजती हूँ कि, तुम्हारी अपेक्षा मेरा प्रेम-महान है, तो गंभीर प्रेम की लघुता प्रगट होती है। और यदि हम कहती हूँ कि, 'तुम्हारे बिना मैं जीवन धारण करने में भी असमर्थ हूँ' तो बाह्य भाव से प्रेम की गुरुता प्रगट होगी और यदि यह कहकर सन्देश भेजूं कि, 'तुम यहां क्यों नहीं आते हो' ? तो यही ज्ञात होगा कि, मैं उनको

स्मरण कर रही हूँ' अतएव हे सखि, श्रीकृष्ण-चन्द्र के भेजना मेरे वाक्य का विषय नहीं रहा है अर्थात् वह बात प्रकाशन योग्य नहीं है ॥१००॥

मुखोल्लास-दोहा

चित धरि सुनिये सकल ये, राधा कौ ततकाल।
हरिहि सुनावत हित कियौ, मोसौं कथन मराल ॥१०

मूल की भाषा पद्य—छप्पय

हे प्यारी सखि ललिते! मेरौ हित हरि माहिँ।
है असीम पै मैं न जिऔंगी यह दृढ़ ताही ॥
नेह अधिकता की यह बानी कथन प्रनाली।
क्यौं नहिँ आवत कृष्ण, कहन मेरी यह आली ॥
सो प्रगट स्ववशता कों करै कहैं सबै हरि वश भये।
या कारन बोलन समय नहिँ रही मौन मन में ठये ॥

सारांश—सोरठा

हैं ललिता के बैन कह न सकति कछु राधिका।
जानौ करुणा ऐन कही हंस इमि कृष्ण सों ॥१००॥

००००

ययौ कालः कल्पाण्यधिकलितकेलीपरिमलां
विलासार्थी यस्मिन्नचलकुहरे लीनवपुषम्।
स मां धृत्वा धूर्तः कृतकपटरोषां सखि! हठा-
दकार्षीदाकर्षन्नुरसि शशिलेखाशतवृताम् ॥१०१

टीका—पूर्ववृत्तान्तमनुस्मरणेनानुतापं करोति ययौ इति। हे कल्
हे कल्याणयुक्ते! उत्तरत्र यत्पदोपपादनात् स इति लभ्यते,
नियतसम्बन्धात्। तेन स कालो ययौ गतवान् इत्यर्थः। स क इ

यस्मिन् काले स धूर्त्तः श्रीकृष्णः अचलकुहरे गिरिदर्य्यां लीनवपुषं तिरोहिताङ्गीं मां धृत्वा हठात् बलात् आकर्षयन् उरसि वक्षसि शशि-लेखापदं शतधृतं चित्रशतवृतां, नख-वक्ष-तुङ्ग-शतयुक्तामिति यावत् अकार्षीत् कृतवान् । शब्दबाहुल्यमात्रपरं । धूर्त्तपदोपादानात् कृष्णो-ऽपि कपटवेशधरो निलीय धृतवानिति गम्यते । शशिलेखापदं वक्रतया आर्द्रनखक्षतं बोधयति गौण्यावृत्त्या, मां कीदृशीं कलितकेलिपरिमलां कलितो धृतः केल्याः परिमलो विमर्दोत्थगन्धो यया, एतेन क्रीडाभ्यन्तर एव प्रणयकोपो ज्ञायते । यद्वा कलितो ज्ञात अर्थात् कृष्णेन केलिपरि-मलो यस्यां, तदन्वेषणपरः श्रीकृष्णः तदङ्गस्य क्रीडापरिमलमाघ्राय छलेन धृतवानित्यर्थः । स कीदृक् विलासार्थी क्रीडाकांक्षी, मां काकृशीं कृतः कपटरोषो मिथ्याकोपो यया । "परिमलो विमर्दोत्थातिमनोहरग-न्धयोश्चापि, सुरताभिमर्दक-सञ्चविरागादिसौरभे" इति मेदिनी । "धूर्त्तस्तु खण्डनवने धूस्तुरयोरपीति" विश्वः । "विलासो हावभेदे स्यात् लीलायामपि पुंस्ययमिति" मेदिनी । "शशिलेखा कलाभागे गुडूची-वृत्तभेदयोरिति" विश्वः । "धूस्तुरे ना विटपो त्रिषु" इति मेदिनी । विटः षिड्गः ॥१०१॥

अनु०—हे कल्याणी सखि ! अब वह समय नहीं रहा, जब वह विलासाभिलाषी धूर्त्त श्रीकृष्ण, मेरे गिरिराज की कन्दरा में छिपे रहने पर भी फैलती हुई मेरे अंग की सुगन्धि को पहचान कर लीला-विलास के हेतु मुझको ढूंढ़ लेते थे एवं इन्दुलेखा आदि सखियों से घिरी रहने पर भी मुझ प्रणय कोपवती को अकस्मात् आकर अपने वक्षस्थल की ओर आकर्षित कर लेते थे अथवा मेरे वक्षः स्थल को शत-शत नखक्षतादि चिह्नों से भूषित कराते थे॥१०

मुखोल्लास—दोहा

ललिता सों राधा कही, कृष्णचन्द्र रस रीति ।
सो ललिता अब हंस सों, वरनत पिछली प्रीति ॥१०१॥

मूल की भाषा पद्य-कवित्त

एहो कल्याणी सखी ललिते ! वह काल बीत्यौ,
पकरि खैंची मैं ढीठ बनमाली बल सौं।
मेरे उर माहिँ चन्द्र लेखा नख रेखा सौ सौ,
करी ता सों कीनौ मैं कपट रोस छल सौं ॥
केलि हित मैंने लीनी जदपि सुगंध भीनी,
ता पै दुराई देत कन्दरा अचल सौं।
हिय हरसाने प्रेम पुंज दरसाने दृग,
काम रस साने कृष्ण बानक चपल सौं ॥११०

सारांश-सोरठा

कछु दिन प्रीति पुनीत रही एक रस कृष्ण की ।
भई वही विपरीत कठिन काल की चाल सौं ॥१०१॥

०००

कदा प्रेमोन्मीलत्पुलकविपुलाङ्गी मृगदृशां
बलादाकर्षन्तं मधुरमुरलीकाकलिकया ।
मुहुर्भ्राम्यच्चिल्लीचुलुकित-कुलस्त्रीव्रतमहं
विलोकिष्ये लीलाभरमिलदपाङ्गं मुरभिदम् ॥१०२॥

टीका—इदानीमति-लालसया यदास्ते तत् कथयति । अहं कदा व्रजपतिं श्रीकृष्णं विलोकयिष्ये द्रक्ष्यामि, कीदृशं मधुरमुरलीकाकलिकया मृगदृशां समूहं मुहु बलादाकर्षन्तं स्ववशीकुर्वन्तं स्वसमीपं नयन्तं, गृहकर्माँदि परिहृत्य गमनाद्बलादित्युक्तम् । कीदृश्यः प्रेमोन्मीलदिति प्रेम्णा उन्मीलन्तो उद्गच्छन्तो ये पुलकरोमाञ्चास्तैर्व्याप्यमानानि उपचितान्यङ्गानि यासां ताः, तं कीदृशं भ्राम्यन्ती या चिल्ली भ्रूलता तया चुलुकितं चुलुकवदाचरितं खण्डितमिति यावत् कुलस्त्रीणां व्रतं, यथा

कश्चिदल्पं पानीयादि चुलुकेन पिबति तथा, अस्माकं कुलव्रतं भ्रूभङ्ग्या येन स्वीकृतमित्यर्थः। चुलुकितमिति नामाङ्कान्तात् कर्म्मणि क्तः, चिल्ली-शब्दो भ्रूलतावाची, तथा च क्रमदीपिकायाम्—"लीलालकस्फुरितभा-लतलालप्रदीप्ते गोरोचनातिलकमुच्चलच्चिल्लीलास्यमिति"। व्याख्यातञ्च तट्टीकाकृद्भिः—उन्नतभ्रूलतिकमिति। अहं कीदृशी लीलाभरेण मिलन्तः संजाताभवन्तो अपाङ्गं यस्याः सा उन्मीलदिति। "पुलकः कृमिभेदे प्रान्तरभेदे मालाभेदे च। रोमाञ्च—हरिताल-गजान्नपिण्डे च गन्धर्वे इति" मेदिनी। "काकलिः तु कले सूक्ष्मध्वानौ त्वित्यमरः"। "चुलुकः प्रसृतौ भाण्डभेदे चुलुकवत् पुमानिति" मेदिनी ॥१०२॥

अनु०—अपने मधुर मुरली निनाद के द्वारा प्रेम मदिरा से मतवाली, खंजननयनी ब्रज-सुन्दरीगण को अपनी ओर बल पूर्वक आक-र्षण करते हुए, जिनका चञ्चल भ्रुकुटि-नर्तन निरखते ही कुलवती सती ललनाओं का पातिव्रत धर्म लुप्त होने लगता है, उन श्रीकृष्ण-चन्द्रजी का अपने लीला विलासयुक्त, आनन्दवर्षी नयनाञ्चलों द्वारा कब दर्शन कर पाऊंगी ? ॥१०२॥

मुखोल्लास—दोहा

राधा ललिता सों प्रकट, करत मिलन की आस।
सो ललिता कहि हंस सों, भेजत हरि के पास ॥१०२॥

मूल की भाषा—छप्पय

मैं राधा कब देखौंगी सखि ! कृष्ण मुरारी।
हास्य वेग सों दृग कटाक्ष सम मिले सुखारी ॥
हरि दृग चंचल बार बार जल संयुत सरसत।
बूड्यौ व्रत कुल नारिन कौ या सात्विक दरसत ॥
ध्वनि मन्द मधुर मुरली सुनत प्रकट मदन मदिरा भरीं।
दृग छके हरिण नयनीन के बल सों आकर्षण करीं ॥१०२॥

सारांश-सोरठा

नयननि सात्विक भाव अरु मुरली की मधुर ध्वनि।
उपजावति रति चाव अंगनान के अंग में ॥
ऐसे श्री ब्रज चन्द सुख निधान संकट हरन।
तिन कौ दरस अमन्द कब मिलि है मो कों सखी ॥१०२॥

◇◇◇◇

रणद्भृङ्गश्रेणीसुहृदि शरदारम्भमधुरे
वनान्ते चान्द्रीभिः किरणलहरीभि धवलिते।
कदा प्रेमोद्दण्डस्मरकलहवैतण्डिकमहं
करिष्ये गोविन्दं निविडभुजबन्धप्रणयिनम् ॥१०३॥

टीका—किञ्च रणदिति। अहं गोविन्दं वनान्ते वृन्दावने निविडभुज-बन्धप्रणयिनं करिष्ये निविडोऽतिगाढ़ो यो भुजबन्धाश्लेषस्तेन प्रणयिनं अर्थाद्युक्तं, कीदृशं प्रेमेति प्रेम्णा य उद्दण्ड उद्भटः स्मरकलहः काम-कलहः तेन तत्र वा वैतण्डिकं वितण्डया व्यवहारपरं वितण्डार्हं वा, वितण्डा विवादः अन्यमपि यथेष्टं कलह युतं विवादपरं वन्दनप्रणयिनं करोतीति ध्वनिः। वनान्ते कीदृशे रणदिति रणतां शब्दं कुर्वतां श्रेणी पंक्तीः तस्याः सुहृदि अतिस्वच्छन्दविहारावस्थानदानात् मित्राहें यद्वा सैव सुहृद् यस्य, निरन्तरमावृत्य शोभाजननात्। पुनः कीदृशि शरदा-रम्भमधुरे शरत्कालस्य प्रवृत्त्यातिसुन्दरे, पुनः कीदृशि चान्द्रीभिः चन्द्र-सम्बन्धिनीभिः किरणलहरीभि धवलिते शुक्लीकृते, किरणस्य शरदि अतिस्वच्छतया लहरीत्युक्तम्। वनान्ते इत्यत्र अन्तः शब्दः स्वरूप-वाची। "अन्तः प्रान्तेऽन्तिके नाशे स्वरूपेऽतिमनोहरे" इति विश्वः। "वितण्डा वादभेदे स्यात् कचीशाके शिलाह्वये। वितण्डा करवीरी च" इति विश्वः ॥१०३॥

अनु०—शरद ऋतु का आगमन होने पर, मधुरझंकार का अलिपुंज के गान आरंभ करने पर, प्यारी चन्द्र-किरणों द्वारा विमल, धवल श्री वृन्दावन प्रान्त में, प्रणय-कलह के प्रकाण्ड पण्डित अर्थात् काम-कलह-कोविद श्रीगोविन्द को, अपने युगल बाहु पाश में बन्धनकर अर्थात् भुज लताओं से सुख पूर्वक आलिङ्गन कर अत्यन्त अनुराग प्रदर्शित करती हुई किस दिन सुखी कर सकूंगी ॥१०३॥

मुखोल्लास—दोहा

राधा-ललिता सों कहत, कृष्ण मिलन की चाह।
ताकों वह अब हंस सों, वरनत करि उत्साह ॥१०३॥

मूल की भाषा—छप्पय

हे ललिते! मैं राधा या वृन्दावन माहीं।
अति सनेह सों निज भुज बंधन की गल बाहीं॥
कब करिहौं श्रीकृष्णचन्द्र को आलिंगन बस।
अहैं वितंडावादी हरि संग्राम काम रस॥
अति मधुर शरद आरम्भ में गुंजारैं जहँ मधुपगन।
सित कान्ति मयूखन चन्द सों सोहै वृन्दावन सघन ॥१०३॥

सारांश—सोरठा

वृन्दावन सुख पुंज यहाँ आय हरि मिलहिं जो।
लगैं मनोहर कुंज चंचरीक चय चाँदनी ॥१०३॥

००००

मनो मे हा कष्टं ज्वलति किमहं हन्त करवै
न पारं नावारं किमपि कलयाम्यस्य जलधेः।
इयं वन्दे मूर्ध्ना सपदि तमुपायं कथय मां
परामृष्ये यस्माद्धृतिकणिकयाऽपेक्षणिकया ॥१०४॥

टीका—उल्लंघनविरहवेदनामसहमाना धैर्यप्राप्त्युपायमिच्छन्ती यदाह तत् कथयति मन इति । हा कष्टं कृच्छ्रेन तत् मे मनः ज्वलति दुनोति, हन्त खेदे किं करवै किं करोमि ! अस्य दुःखजलधेः दुःखसमुद्रस्य पारं उत्तरतीरं न कलयामि अवारं सन्निकृष्टतीरं न कलयामि न पश्यामि । यथा जलधिमध्यपतिता पराक्वांची तीरे अपश्यन् महादुःखदुनो भवति तथेति-भावः । मूर्ध्ना इदं वन्दे इदं प्रणामं करोमि किमर्थमित्याह-समुपायं मे मह्यं कथय येनोपायेन धृतिकणिकया धैर्यनाशनरूपात् परामृष्येयं युक्ता स्यां तरामि, कीदृश्या अपेक्षयतेऽसौऽपेक्षणी कर्मणि अनिट् स्वार्थे कः प्रत्ययकेऽन इति ह्रस्वः स्त्रियामात् तया अपेक्षया इति यावत् । धृति यथा—"ज्ञानाभीष्टागमाद्यैस्तु सम्पूर्ण-स्पृहता धृतिः । साहित्य-वदनोल्लासहास-प्रतिभादिकृदिति" ॥१०४॥

अनु०—हे सुमुखि ! हाय, मेरा मन विरह अनल संताप से जला जारहा है ! अब मैं क्या करूं ? इस सन्तापमय महा विरहसागर में मैं निमग्न होचुकी हूँ अब तुम्हारे चरणों में नत मस्तक हो प्रणाम करती हूँ । इस समय शीघ्र ही कोई उपाय बताओ, जिससे मुझे क्षण भर धीरज और शान्ति प्राप्त हो सके ॥१०४॥

मुखोल्लास-दोहा

राधा पूर्व प्रसंग में, ललिता सों आलाप ।
करत कृष्ण प्रति कहन हित, विरह जनित सन्ताप ॥१०४॥

मूल की भाषा पद्य-गीतिका

हे सुमुखि ! मेरौ जरत मन दुख हाय यह निरधार है ।
या विरह बारिधि कौ न सूझत मोहि बारापार है ॥
शिर नाय बन्दन करत मैं तू बेगि जतन सुनाउरी ।
छन मात्र धीरज धारि करौं मैं कछु विचार बनाउरी ॥१०४॥

सारांश-सोरठा

मोहि एक पल होय धीरज या सन्ताप सों।
सखि बिचारि हित लोय जतन सबै कछु करौं मैं ॥१०४॥

०००००

प्रयातो मां हित्वा यदि कठिनचूडामणिरसौ
प्रयातु स्वच्छन्दं मम समयधर्मः किल गतिः।
इदं सोढुं का वा प्रभवति यतः स्वप्नकपटा-
दिहायातो वृन्दावनभुवि बलान्मां रमयति ॥१०५॥

टीका—अथ स्वप्नं वर्णयति प्रयात इति। यदि असौ कठिनचूडामणिः कठिनश्रेष्ठः कृष्णो मां हित्वा प्रयातो गतः तदा स्वच्छन्दं प्रयातु, किल निश्चये, मम समयधर्म्मः कुलाचारधर्म्मः यद्वा कालकृतधर्म्मः मृत्युरित्यर्थः। गतिः मरणं, ननु यद्यसौ हित्वा गतस्तदा त्वमपि धैर्य्यमालम्ब्य किमपि न लिखसीति चेत्तत्राह इदमिति। इदं सोढुं का वा प्रभवति समर्था भवति ? न कापीत्यर्थः। यतः स्वप्नकपटात् स्वप्नच्छलात् इह वृन्दावनभुवि आयातः सन् बलात् मां रमयति, यदि दूरस्थोऽपि कपटात् वञ्चयति तर्हि कथं सह्यमित्यर्थः। स्वप्नो यथा— "स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः। कोपावेग-भय-ग्लानि-सुख-दुःखादिकारक" इति। "समयः सपथाचार-सिद्धान्तेषु तथाधिक्रियाकारे च निर्द्देशे सङ्केते कालभाषयोरिति" मेदिनी। १०५॥

अनु०—सखि! वह निष्ठुर शिरोमणि श्रीकृष्ण यदि मुझको परित्याग कर मथुरा चले गए हैं, तो वे स्वाधीनता पूर्वक चले जावें, मेरे लिए तो मृत्यु ही एक मात्र निष्कृति का उपाय है। उनके मथुरा चले जाने पर मुझको मान करना न्यायसङ्गत है। इसमें मेरा क्या दोष है। किन्तु इस तरह स्वप्न के से छल से वृन्दावन में आकर बल पूर्वक जो रमण करते हैं, इसको कहीं भी कोई रमणी क्या

सहन करने को समर्थ है ? मुझ मानवती को प्रसन्न न करके बल पूर्वक मुझको त्याग कर नागरियों के साथ रमण करने को मथुरा चले गए हैं तो मुझे मान होना ही चाहिए इसमें मेरा क्या दोष है? मानिनी जन बलात्कार को सहने को कदापि समर्थ नहीं है यह भाव है ॥१०५॥

मुखोल्लास–दोहा

स्वप्न चित्र ध्यान रु प्रकट, दर्शन चार प्रकार।
मोहि होत इक स्वप्न मग, सो निद्रा अनुसार ॥१०५॥

मूल की भाषा पद्य–छप्पय

हे सखि ललिते ! यही देव चूड़ामणि गिरिधर।
मोहि त्यागी मधु पुरी गये जाऔ स्वतंत्र नर॥
गयौ धर्म मेरौ को समरथ दूजी नारी।
जो सहि सकै वियोग व्यथा कौ संकट भारी॥
करि कपट स्वप्न में बल सहित वृन्दावन भुवि आनि हरि।
निस समय संग मेरे करत रति विलास मन मोद भरि॥१०५॥

सारांश–सोरठा

राधा सरल स्वभाव स्वप्नावस्था की कथा।
मिलन सरस प्रस्ताव ललिता सों बरनन करत ॥१०५॥

००००

अनौचित्यं तस्य व्यथयति मनो हन्त मथुरां
त्वमासाद्य स्वैरं चपलहृदयं वारय हरिम्।
सखि ! स्वप्नारम्भे पुनरपि यथा विभ्रममदा-
दिहायातो धूर्तः क्षपयति न मे किङ्किणिगुणम्॥१०६॥

टीका—अनौचित्यमिति-तस्य श्रीकृष्णस्य अनौचित्यं मनो व्यथयति। हे सखि! त्वं मथुरामासाद्य गत्वा चपलहृदयं चञ्चलमनसं हरिं

निवारय । एकत्रापि प्रतिनियतप्रेमाभावात् चपलचित्तता,किं तदनौचित्य-मित्याह-यथा स्वप्नारम्भे निद्राप्रथमक्षणे एव इह आयातः सन् विभ्रममदात् विभ्रमो विलासस्तत्र यो मदो गर्वः हर्षो वा तस्मात् मे मम किङ्किणीगुणं काञ्चीदाम न क्षपयति न दूरीकरोति । स कीदृशः धूर्त्तः कितवः स्वप्ने तिरोभूय काञ्चीदाममोचनात् धूर्त्तत्वं,स्वप्ने तस्य दर्शनादेव सात्त्विकतया श्लथीभूतकाञ्चीगुणत्वात् तेनैव नेक्ष्यते इत्युक्तम् । सुरतसुखदानाभावेन केवलं काञ्चीगुणमोक्षणमिवेति भावः । किङ्किणीगुणमित्यत्र ईदुतो पूर्वोत्तरपादपाक्षिकह्रस्वः । स्वप्नदृष्टस्य निवारणकथनात् उन्मादृदशेयम् । ''मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोरिति'' मेदिनी ॥१०६॥

अनु०—हे सखि ! हाय, श्रीकृष्ण का इस तरह का अनुचित व्यवहार मेरे मन को अत्यधिक व्यथा दे रहा है अर्थात् वह लम्पट-चूडामणि, मथुरा में विहार करें तो भले करें, किन्तु इस जगह से हमारे निकट क्यों आगमन करते हैं ? इसके लिए तुम मथुरा-जाकर उन स्वेच्छाचारी अत्यन्त चञ्चल स्वभाव श्रीकृष्ण से ऐसा करने का निषेध करदो ताकि,वह धूर्त्त स्वप्नारम्भ में विलासोन्मत्त हो इस वृन्दावन में आकर हमारे किङ्किणिगुण (किंकिणि-बन्धन) को न छेड़ा करें ॥१०६॥

मुखोल्लास—दोहा

राधा ललिता सों कहत, निज मन को सन्ताप ।
सो ताकों अब हंस सों, हरि प्रति करत अलाप ॥१०६॥

मूल की भाषा पद्य—छप्पय

हे सखि ! अनुचित भाव कृष्ण को मेरे मन कों ।
देत दुःख तू जा मथुरा स्वच्छन्द जतन कों ॥
चपल हृदय श्रीकृष्णचन्द्र तिन सों नाहीं करि ।
आय स्वप्न में रति विलास की आस धूर्त्त हरि ॥

नहिँ बेर बेर मोचन करें कटि किंकिनि गुन फन्द कों।
या अजुगत गति व्यवहार कौ करि निषेध नँद नन्द कों॥१०६

सारांश—सोरठा

ललिता मथुरा जाय करि निषेध तू कृष्ण सों।
स्वप्न बीच वे आय किंकिनि गुन मोचें नहीं ॥१०६॥

००००

अयि स्वप्नो दूरे विरमतु समक्षं शृणु हठा-
दविश्वस्ता मा भूरिह सखि मनोविभ्रमधिया।
वयस्यस्ते गोवर्द्धनविपिनमासाद्य कुतुका-
दकाण्डे यद्भूयः स्मरकलहपाण्डित्यमतनोत्॥१०७॥

टीका—इदानीमुन्मादहशां वर्णयति अयीति। अयि कोमलानुमन्त्रणे, हे सखि स्वप्नो दूरे तिष्ठतु आस्तां स्वप्नवार्त्ता, समक्षं प्रत्यक्षं यत् तच्छृणु इत्यध्याहारः। मनो विभ्रमधिया मनोभ्रान्तिरियमिति बुद्ध्या हठात् अव-श्वस्ता अविश्वासिनी मा भूः, किं तदित्याह ते तव युष्मत् सखा श्रीकृष्णः गोवर्द्धनविपिनं गोवर्द्धनाश्रितवनमासाद्य कुतुकात् अकारणं बिना यत् स्मरकलहपाण्डित्यं अतनोत् विस्तारितवान्। तथाविध क्रीडासु मनो दधती प्रत्यक्षं कलहं कुर्वन्तमेव मत्वा प्रलापं करोतीति भावः। "काण्डं नाले तरुस्कन्धे वाणे च सरणीवयोः। कुत्सिते रहसि स्तम्भे काण्डं वर्गे-ऽप्युदाहृतमिति" विश्वः॥१०७॥

अनु०—अयि सखि! स्वप्न की बात दूर रही, अब जाग्रत अव-स्था की बात सुनो और मेरा मनोभ्रम जानकर मेरे वाक्य में अविश्वास मत करो अर्थात् तुम मन में समझो कि मैं वृन्दावन में हूँ एवं श्रीकृष्ण मथुरा में है अतः मिलन कैसे सम्भव है! सो यह केवल मेरे मन का भ्रम मात्र है। किन्तु ऐसा नहीं है क्योंकि

म्हारे सखा श्रीकृष्ण, गोवर्द्धन पर्वत के वन प्रदेश में आकर
ौतुक वश बारम्बार असमय में ही काम-कलह की निपुणता का
ास्तार करते हैं। तात्पर्य यह है कि—यह प्रादुर्भावोत्थ संभोग
वशेष है कि निज प्रीतम के सुदूर निवास करने पर भी उनका
ाविर्भाव होकर मिलनानन्द प्राप्त होता है। यद्यपि ऐसा सम्भोग
ो दूर की बात है तौ भी सुदूर प्रवास के अन्तर्गत कहने से सम्-
ख्यान् होना युक्ति युक्त है ॥१०७॥

मुखोल्लास-दोहा

हे सखि ललिते ! व्यथा तू, औरहु सुनि करि चेत।
आय ध्यान पथ प्रकट हरि, मोहि दुसह दुख देत ॥१०७॥

मूल की भाषा पद्य—छप्पय

हे सखि ललिते ! दूरि रही यह स्वप्न ढिठाई।
सुनि प्रतच्छ तजि अविश्वास मन बुधि चतुराई ॥
तेरी वयस समान कृष्ण गोवर्द्धन बन में।
अब अवसर तहँ आय कुतूहल लें छन छन में ॥
सो काम युद्ध की चतुरता अति हठ सों करते भये।
ये चरित चपल चित चाय सों ध्यान माहिँ मो सँग ठये॥१०

सारांश—सोरठा

जबै करत हौं ध्यान मूर्ति माधुरी कृष्ण कौ।
रति रस समर सुजान लूटत ज्ञान अपान निधि ॥१०७॥

००००

अमर्षाद्धावन्तीं गहनकुहरे सूचितपथां
तुलाकोटिक्वाणैश्चकितपदपातद्विगुणितैः।
दिधीर्षन्मां हर्षोत्तरलनयनान्तः स कुतुकी
न वंशीमज्ञासीद्भुवि करसरोजाद्विगलिताम् ॥१०८॥

टीका—प्रणयकोपात् धावन्तीं राधामनुधावतः श्रीकृष्णस्य सम्भ्रमेण कराद्विगलितां वंशीं दृष्ट्वैव कथयति । अमर्षादिति । अमर्षात् प्रणयकोपात् धावन्तीं मां दिधीर्षन् धत्तुमिच्छन् श्रीकृष्णः करसरोजात् भुवि गलितां वंशीमज्ञासीत् न ज्ञातवान् अर्थात् पश्येति वाक्यशेषोऽध्याहरणीयः । स कीदृक् कुतुकी कौतुकाविष्टः, पुनः कीदृक् हर्षेण उत्तरलो लोचनाञ्चलो यस्य सः, मां कीदृशीं तुलाकोटिध्वानैः नूपुरध्वनिभिः दुर्गमकन्दरे यद्वा गहनं वनं तदेव दुष्प्रवेशत्वात् कुहरं तस्मिन् निविडविपिने इत्यर्थः । सूचितपथां ज्ञापित पन्था यस्याः,अतिनिविडवने द्रष्टुमशक्यापि नूपुरध्वनिश्रवणात् अनेन पथा यातीति ज्ञातमित्यर्थः । कीदृशै चकितपदपातद्विगुणितैः चकितश्चञ्चलो यः पादपातः तेन द्विगुणीकृतैः । "गेह-संकलने त्रिषु नपुंसकं गह्वरे स्यात् । दुःखकाननयोरपीति" मेदिनी । "पादाङ्गद-तुलाकोटि-मञ्जीर-नूपुरोऽस्त्रीयामित्यमरः" ॥१०८॥

अनु०—आनन्दोद्रेक से वह विनोद शील, श्यामसुन्दर, क्रोधावेश वश जल्दी २ चलकर गंभीर वन में प्रवेश करने वाली और द्रुततर गतिके कारण बढ़ जाने वाले नूपुर शब्दों से मेरा मार्ग प्रगट हो जाने पर मुझको ग्रहण करने की कामना से मेरा पीछा करने लगे थे, उस समय सहसा उनके हाथ की मुरली गिर गई और वे न जान सके,उस समय प्रेमोन्माद में उनके नयन चंचल हो गए थे । जो श्रीकृष्ण मुझे प्रसन्न कर, सुखी होने के लिए वन-प्रान्त में मेरे पीछे फिरते थे, आज वही वीतराग होकर मथुरा में निवास कर रहे हैं । अहो, यह बड़े कष्ट की बात है ॥१०८॥

मुखोल्लास–दोहा

राधा ललिता सों कहत, कृष्ण कथा रस रंग ।
वृन्दावन में जो करीं, पूर्व काल वसि संग ॥१०८॥

मुखोल्लास—दोहा

राधा ललिता सों कहत, कृष्ण कथा रस रंग।
वृन्दावन में जो करी, पूर्व काल बसि संग ॥१०८॥

मूल की भाषा पद्य—छप्पय

प्रेम कोप तें वृन्दावन की लता कुंज मग।
मोहि दौरती पकरन कों कौतुकी कृष्ण ठग॥
भये हर्ष तें दृग कटाक्ष जिन के अति चंचल।
निज कर कमलन तें बंसी जो गिरि धरातल॥
हरि लैं सो जानी नहीं तहँ अचक अचक मम पद परे।
नूपुरन जतायौ पथ, भई दुनी धुनि धरनी धरे॥१०८॥

सारांश—सोरठा

जानी नहिँ ब्रजराज करतें जो मुरली गिरि।
भाजत पकरन काज वृन्दावन वेलीन मग ॥१०८॥

००००

अशक्तां गन्तव्ये कलितनवचेलाञ्चलतया
लतालीभिः पुष्पस्मितशबलिताभिर्विरुदतीम्।
परीहासारम्भी प्रियसखि! स मां लम्बितमुखीं
प्रपेदे चुम्बाय स्फुरदधरबिम्बस्तव सखा ॥१०९॥

टीका—अशक्तामित्यादिः; हे प्रियसखि! तव सखा परिहासारम्भे ल
म्बितमुखीं मामवेक्षणायाधोमुखीं स्फुरदधरबिम्बः सन् चुम्बनाय चुम्ब
नार्थं प्रपेदे प्रपन्नः, कीदृशीं लतालीभिः लताश्रेणीभिः कलितनवचेला
ञ्चलतया धृतनववस्त्रप्रान्ततया गन्तव्ये अपरदेशगमनेऽशक्तां, कीदृशीभि
ष्पस्मितशबलिताभिः पुष्पाणां स्मितप्रकाशः तद्युताभिः, मां कीदृशीं
रुदतीं मा स्पृश इति शब्दायमानां अस्यामपि तथा विधानता जाि

विशेषा एव आर्य्यः सख्यः ताभिः पुष्पवत्स्मितयुक्ताभिः धृतपटाञ्चला गन्तुमशक्ता भवति तव वयस्यः तव सखेति सोल्लुण्ठनं नायं कोऽपीत्यर्थः ॥१०६॥

अनु०—हे प्रिय सखि ! जब कि मेरा नवीन वस्त्राञ्चल कुसुम-विकासच्छल से हास्यमयी विचित्र वन लताओं में उलझ जाने से मैं अपने गन्तव्य स्थान पर नहीं पहोंच सकी और असमर्थ हो रोदन करने लगी थी उस समय परिहास-पटु वह तुम्हारे सखा, जिनके अरुण बिम्बफल सदृश अधर, चुम्बनार्थ विकसित हो उठे थे, मेरे समीप जा पहोंचे थे ॥१०६॥

मुखोल्लास-दोहा

प्रथम मिलन श्री कृष्ण संग, भये जु भोग विलास।
राधा बीते दिनन के, वरनत ललिता पास ॥१०६॥

मूल की भाषा पद्य—छप्पय

प्यारी सखि ललिते ! नंद नन्दन सखा तुम्हारे।
मैं क्रीड़ा आरम्भहि सों ऊंचौ मुख धारे॥
ताकौ चुम्बन करन हेत आये मो पाहीं।
फरकत तिन के अधर,लता इव अली तहाँ ही॥
सो अंचल मम पट नवल गहि रही मिलावन मन किये।
मैं रुदन करत, वे खिली रहीं मुसकाती प्रमुदित हिये।१०६॥

सारांश-सोरठा

भय लज्जा उर आनि करत रही संकोच मैं।
सखिन ढिठाई ठानि हरि सों मम संगम चह्यौ ॥१०६॥

००००

ततोऽहं धम्मिल्ले स्थगितमुरलीका सखि ! शनै-
रलीकामर्षेण भ्रमदविचलभ्रूरुदचलम्।

कचाकृष्टिक्रीडाक्रमपरिचिते चौर्य्यचरिते
हरिर्लब्धोपाधिः प्रसभमनयन्मां गिरिदरीम् ॥११०॥

टीका—ततस्तदनन्तरं अहं धम्मिल्ले स्थगितमुरलीका केशपाशकृतमुरलीका सती शनैरदचलं गतवती, धम्मिल्ले स्थगिता संवृता मुरली यया बहुव्रीहौ कः केचित् ह्रस्वनिषेधः । अलिकासर्षेण मिथ्याक्रोधेण भ्रमन्त्यौ आविरले भ्रुवौ यस्या सा, चौर्य्यचरिते कचाकृष्टिक्रीडाकलहानां केशानां आकर्षणेन या क्रीडा तस्या क्रमः परिपाटी तेन परिचिते ज्ञाते सति हरिर्लब्धोपाधिः प्राप्तछलः सन् 'इयं चौर्य्यकर्मशिक्षा लिप्रहयास' इति कर्म्मखा प्राप्तोपाधिः प्रसभं बलात् , बद्ध्वा भूविवरादौ निःचेष्टं नयतीतिध्वनिः । "केशपाशं समाकृष्य परिरम्य च निर्भरम् । यच्चुम्बनं प्रियास्यस्य कचाकृष्टिरियं मता"। अतएव जयदेवः—"सकचग्रहचुम्बनदानमिति"। "उपाधिर्धर्म्म-चिन्तायां कुटुम्बव्यापृतेषु छलविशेषयो पुंस्युपाधिः पुंसि स्याधिरथाङ्गरोरिति" मेदिनी ॥११०॥

अनु०—हे सखि ! उसके पश्चात् मैंने उनकी मुरली को अपने केश पाश में छिपा लिया और मिथ्या क्रोधावेश से अपनी कुटिल भृकुटी चञ्चल कर, ऐसे भाव से मैं चली जारही थी, उस समय केशाकर्षण रूप परिपाटी द्वारा, जो चौर-चूडामणि नाम से संसार में विख्यात हैं, वे जान ही गए अर्थात् उनके द्वारा मेरे केशाकर्षण करने पर मेरी चोरी प्रगट होगई और मैं समझ गई कि वही नागेन्द्र हैं, इस प्रकार वह हठ पूर्वक मुझको-गोवर्धन गिरिकन्दरा में लिवा ले गए। उनके चौर्य चरित की बातें मैं क्या सुनाऊं बाल्यकाल में स्तन पान करते करते उन्होंने पूतना के प्राण अपहरण कर लिए थे, पौगण्ड में गोपीगण के घरों में नवनीत-चोरी, कैशोर में कात्यायनी व्रत परायण व्रज-कुमारी गण का वस्त्रापहरण किया उसके बाद मर्यादा प्राप्त हो व्रज-कुल-ललनागण का

पातिव्रत धर्म अपहरण कर लिया, अब वह हमारे इस चि न्ताप को अपहरण करलें तो उनके "चौर" नाम का यथार्थ समझूं। यही श्रीराधाजी का अभिप्राय है ॥११०॥

मुखोल्लास-दोहा

लीला हास विलास में, चोरी चरित अनूप।
राधा ललिता सों कह्यौ, सो वरनत तद्रूप ॥११०॥

मूल की भाषा पद्य—छप्पय

मैंने बंसी चोरि धरी निज चोटी माहीं।
पुनि धीरे उठि चली कपट रिस करत तहाँहीं ॥
सघन भौंह अति चपल चोर करनी लखि मेरी।
शिखा पकरि खेंची जब बंशी केशनि हेरी ॥
यह चोरी को मिस पाय कै मोहि लै गये गिरि दरी।
सखि उचित जानि ता काल जनु चोर दंड दीनौ हरी॥

सारांश—सोरठा

चोरन दंड प्रदान उचित राखिवौ गिरि गुहा।
दीनौ मोहि सुजान राधा ललिता सों कह्यौ ॥११०॥

००००

कदाचिद्वासन्तीकुहरभुवि धृष्टः सरभसं
हसन् पृष्ठालम्बी स्थगयति कराभ्यां मम दृशौ।
दिधीर्षौ जातेर्ष्ये मयि सखि ! तदीयाङ्गुलिशिखा
न जाने कुत्रायं व्रजति कितवानां किल गुरुः ॥१

टीका—अन्यामपि क्रीडामनुस्मृत्येवाह कदाचिदिति। स धृष्टः वास कुहरभुवि माधवीमण्डलोद्भुवि हसन् सरभसं यथा स्यात् पृष्ठाल पृष्ठदेशमाश्रित्य कराभ्यां मम दृशौ स्थगयति आवृणोति, वर्त्तमान

भूते लट्। हे सखि ! जातेर्ष्यं जातक्रोधं यथास्यात् तदीयाङ्गुलिशिखां तस्याङ्गुल्याग्रं मयि दीधीर्षौ-सत्यां धर्त्तुमिच्छन्त्यां सत्यां अयं कितवानां कुलगुरुः कुलश्रेष्ठः कुत्र व्रजति इति न जाने, अनुभवयासस्य ग्रहणासम्भवात् पूर्ववत् लट्। कृतापराधस्यापि निःशङ्कत्वात् धृष्ट इत्युक्तम्। "कृतागो अपि निःशङ्कस्तर्जितोऽपि न लज्जितः। दृष्टदोषोऽपि मिथ्यावाक् कथितो धृष्टनायकः" ॥११॥

अनु०—हे सखि, किसी समय, माधवी लता की निकुंज की ओट से, वह धूर्त्त शिरोमणि लम्पट हरि, हँसते हँसते आकर अपने दोनों हाथों द्वारा मेरे नयनों को अचानक मूंद लेते हैं, और जब मैं उनकी अंगुलियों को पकड़ना चाहती हूँ तो न जाने कहाँ जाकर छिप जाते हैं। इस प्रकार श्री राधिकाजी के हृदय में श्रीकृष्ण की व्रजवास काल की अतीत लीलाओं की वह मधुर स्मृति उन्हें वे वर्त्तमान की सी बातें प्रतीत होने लगती हैं ॥११॥

मुखोल्लास-दोहा

हरि हि पूर्व संभोग की, सुधि आवन तत्काल।
सुरत स्थानन के चरित, राधा कहत रसाल ॥११॥

मूल की भाषा पद्य-गीतिका

काहू समय वे ढीठ हर्षित लता वासन्तीन सों।
नियराय मो बैठी भयी के नयन कर अँगुलीन सों ॥
मम पीठ पीछे सों ढके चाहे गहन मैं रिस भरी।
कत भजि गये छलियान के गुरु सखी ! नहिँ जानी परी॥११॥

सारांश-सोरठा

भये गुप्त तत्काल चाह गहन की करत ही।
जानि परयौ नहिँ ख्याल अज हौं कपटी कृष्ण कौ ॥११॥

००००

अतीतेयं वार्त्ता विरमतु पुरः पश्य सरले !
वयस्यस्ते सोऽयं स्मितमधुरिमोन्मृष्टवदनः ।
भुजस्तम्भोल्लासादभिमतपरीरम्भरभसः
स्मरक्रीडासिन्धुः क्षिपति मयि बन्धूककुसुमम्॥११२॥

टीका – अतिभावनावशात् पश्यन्तीराह व्यतीतेति । हे सरले हे उदारे इयं कथ्यमाना अतीता पूर्वभूता वार्त्ता विरमतु तिष्ठतु, पुरोऽग्रे पश्य सोऽयं य एव कथितः सोऽयं स्मितमधुरिमोन्मृष्टवदनः सन् स्मितस्य मधुरिम्णा माधुर्य्येण तन्मृष्टं वदनं यस्य, मयि बन्धूककुसुमं क्षिपति । बन्धूककुसुमसदृशोऽधरोऽत्र वाच्यः । कीदृशः भुजस्तम्भोल्लासात् भुजावेवस्तम्भौ तयोरुल्लसत् हर्षात् अभिमतोऽभीष्टः अनुमितोऽभीष्टः अनुमितो वा अर्थान्मया मनोऽनुकूलो यः परिरम्भः आलिङ्गनं तत्र रभसो यस्य सः । कीदृक् स्मरेति कामक्रीडासमुद्रः अपरिमितक्रीडाशालित्वात् । "ईषद्विकाशि वदनं स्मितं स्यात् स्पन्दिताधरः" । "सर्वावस्थाविशेषे तु माधुर्य्यं रमणीयता इति" ।११२॥

अनु०—हे सरले ! तुम इन श्रीकृष्ण की कपटपूर्ण बातें नहीं जानती हो, अस्तु जो बीत चुकी उन्हें रहने दो, अब वर्त्तमान काल में ही देखलो, वह काम-केलि सागर प्रसिद्ध तुम्हारे सखा, जिनका मुख मन्दहास्य की माधुरी से मण्डित है, वे अभिमत आलिङ्गन की अभिलाषा से आनन्दित हो, जिनके स्तम्भ सदृश बाहु युगल हर्ष से उल्लसित हैं, अपनी अभिलाषा मुझ पर प्रगट करने के बहाने से बन्धूक पुष्पों को मेरी ओर फैंक रहे हैं अर्थात् मेरे मन को बन्धन में डाल रहे हैं । पूर्वराग दशा में रति उद्बोधन कारण-रूप स्वाभियोग-भङ्गी इस पद्य से प्रगट होता है ॥११२॥

मुखोल्लास–दोहा

मिलन आप कौ ध्यान पथ, मानि चित्त सुविकास ।
राखति राधा प्राण निज, किये दरस की आस ॥११२॥

मूल की भाषा पद्य–छप्पय

हे ललिते ! वीती बातें हरि की ह्वै पूरी ।
आगे लखि तव वयस समान मधुरता रूरी ॥
ऐसी मन्द हसनि सों सोहत मुख अति अद्भुत ।
भुजस्तम्भ रस रास रसिक दृढ़ आलिंगन युत ॥
कन्दर्प केलि सागर अगम तरन कुशल उत्साह धरि ।
बन्धूक कुसुम मम ओर कों फेंकत रति की चाह करि॥११३॥

सारांश–सोरठा

ध्यानहिँ माहिँ सुजान करि समक्ष हरि आप कों ।
राखै राधा प्रान प्रकट दरस की चाह सों ॥११२॥

००००

तदुत्तिष्ठ व्रीडावति निविड़मुक्तालतिकया
बधानेमं धूर्तं सखि ! मधुपुरीं याति न यथा ।
इति प्रेमोन्मीलद्भवदनुभवारूढजड़िमा
सखीनामाक्रन्दं न किल कतिशः कन्दलयति ॥११३॥

का–"इमं बध्वात्र स्थापये" त्युपदिशति–हे व्रीडावति लज्जायुक्ते
(यमेव मां मुहुर्मुहुः वञ्चयति तत्तस्मात् इमं धूर्तं निविडमुक्तालति-
या दृढतरमुक्तालतया तथा बधान "हे सखि ! उत्तिष्ठ यथा मधुपुरीं
याति" "अन्योऽपि यच्छलनपरः पुनर्न भवति" तद्वा स्थापय-
ति ध्वनिः । इति अनेन क्रमेण प्रेमोन्मीलदनुभवारूढजडिमेयं किल
त्तीयां सखीनामाक्रन्दं शब्दक्रन्दनं कतिशः कतिवारान् न कन्दलयति

न वर्द्धयति। प्रेम्णा उन्मीलनेन यो भवतोऽनुभवः तेन आ-सम्यक रूढो जडिमा यस्याः, जडता यथा—"अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः। अनिमिषनयननिरीक्षणतुष्णीम्भावादयस्तत्र"। "आक्रन्दं क्रन्दनेऽऽह्वाने मित्रदारुणयुद्धयोः। आतदर्थमपीति" मेदिनी ॥११३॥

अनु०—हे लज्जावति ललिते! "उठो और सघन गुंथे हुए मौक्तिक लता के हार द्वारा उस धूर्त का बन्धन करो, जिससे वह पुनः मथुरा न जा सके"। इस प्रकार उन्मादावस्था में प्रगाढ़ प्रेम से उत्पन्न तुम्हारे आचरणों द्वारा वह जाड्य दशा को प्राप्त हो जाती है अर्थात् प्रेम की जड़ता में प्राप्त होकर कितनी ही बार हम सखि वर्ग के रोदन को बढ़ाती रहती है। अर्थात् उसकी यह दारुण दुःख दशा देखकर हम निरन्तर क्रन्दन करती रहती है ॥११३॥

मुखोल्लास—दोहा

करत आय प्रत्यक्ष हरि, मेरे संग बिहार।
ललिता तिन कों उचित है, करन दंड उपचार ॥११३॥

मूल की भाषा पद्य—कुंडलिया

ऐसे कपटी कृष्ण कों अरी लजीली बाल।
सखी! पकरि उठि बांध तू अविरल मुक्ता माल ॥
अविरल मुक्ता माल माहिँ या कों बाँधन किन।
जान न मथुरा फेर तजै हम कों कबहू जिन ॥
प्रेम विवस जानति अजान निरधार मिले से।
का न रुवावति पुनि पुनि सखियन राधा ऐसे ॥११३॥

सारांश—सोरठा

प्रकट मिलन परतीति होत प्रेम के वेग सों।
राधा की हित रीति या अजानपन सों लखौ ॥११३॥

००००

अहो कष्टं बाल्यादहमिह सखीं दुष्टहृदया
मुहुर्मानग्रन्थिं सहजसरलां ग्राहितवती ।
तदारम्भाद्गोपीगण-रति-गुरो ! निर्भरमसौ
न लेभे लुब्धाऽपि त्वदमलभुज-स्तम्भरभसम् ॥११४॥

टीका—तस्याः प्रलापं निर्व्वर्ण्य स्वयं निर्व्विण्याह-अहो इति । अहो विस्मये किमिदमकार्य्यं मयानुष्ठितमिति विस्मयः । कष्टं दुष्टहृदया अहं सखीं इह ब्रजे आबाल्याद्बाल्यमारभ्य सहजसरलां स्वभावेन कुटिलां अर्थादिमां मानग्रन्थिं मुहुर्ग्राहितवती, मान एव ग्रन्थिं ग्रहेर्यात्यर्थादन्यत्वात् प्रयोजस्य कर्म्मसंज्ञा न भवतीति गौणगत्यार्थता स्वीकरणीया । तथाहि ग्रहे त्यज्यो भवतीति बोपदेवः । हे गोपीगणरतिगुरो ! तदारम्भात् मानग्रन्थिग्रहणारम्भात् प्रभृति असौ लुब्धापि आलिङ्गनलाभाभिलाषापि निभरं गाढं त्वदमलभुजस्तम्भरभसं तव अमलभुजस्तम्भरभसं तव अमलयोः भुजस्तम्भयोरभसं बेगं ताभ्यां रभसं वेगं हर्षं वा न लेभे न प्राप्तवती, सततं मम रक्षणपरत्वात् स्वच्छन्दपरीरम्भसुखप्राप्तेः ॥११४॥

अनु०—हे गोपी गण के प्रेम शिक्षक ! तुमने ही स्वयं उसको प्रेम परिपाटी की शिक्षा देकर उसका आस्वादन किया है, अब उसको दुःख सागर में क्यों कर मग्न कर दिया है। तुमने भली, प्रेमशिक्षा दी है ! अहो, बड़े कष्ट की बात है ! और मेरा हृदय भी बड़ा दुष्ट है, जो बाल्य काल से ही लेकर स्वभाव सरला, अपनी इस सखी को मैंने ही 'मान' करने की शिक्षा दी थी अर्थात्-मैंने ही उसको मान करने के बन्धन में डाला है हाय, उसी समय से तुम्हारे इन्द्रनील स्तम्भतुल्य उज्ज्वल भुजाओं के-आलिङ्गन सुख के प्रति लालायित होने पर भी वह उसे लाभ करने का सौभाग्य नहीं प्राप्त कर सकी है। तुमने ही उसको चिर काल-से दुख दिया है ॥११४॥

मुखोल्लास-दोहा

ललिता बरनत हंस सों, निज कृत दोष निदान।
करत रही जो कृष्ण सों, सहज राधिका मान ॥११४॥

मूल की भाषा पद्य-छप्पय

बाल काल तें बार बार मैं दुष्ट हृदय अति।
सहज सरल सखि राधा ताकी मैं फेरी मति॥
मान रूप जो गाँठ जतन करि ग्रहन कराई।
ओरहि तें रहि ताहि मिलन चित चाह समाई॥
पै भुजस्तम्भ भरि भेटि कै नहिँ पायौ सुख आपकौ।
हे गोपिन रति गुरु मैं भई कारण या सन्ताप कौ ॥११४॥

सारांश-सोरठा

चाहत रही मिलाप हे हरि राधा आप सों।
यहै बिरह सन्ताप मेरी करनी सों भयौ ॥११४॥

००००

अलिन्दे कालिन्दीकमलसुरभौ कुंजवसते-
र्वसन्ती वासन्तीनवपरिमलोद्गारिचिकुराम्।
त्वदुत्सङ्गे निद्रासुखमुकुलिताक्षीं पुनरिमां
कदाहं सेविष्ये किशलयकलापव्यजनिनी ॥११५॥

टीका—स्वयमाशंसमानाह अलिन्द इति। अहं कुञ्जगृहस्य अलि
वहिर्द्वारे प्रकोष्ठे वसन्ती सती इमं पुनः कदा सेविष्ये, अहं कीदृ
किशलयकलापव्यजनिनी किशलयः नवपल्लवस्तस्य कलापः समूहः
व्यजनं तद्युक्ता, प्रशंसार्थे मत्वर्थप्रत्ययः बहुव्रीहिरर्थप्रतिपत्तिकरत्व
भावात् कर्म्मधारयपदोऽपि मत्वर्थीयः। यद्वा किशलयकलापस्य व्यज
मिति षष्ठीसमासः। प्रकृतिविकृतिसम्बन्धविवक्षायां षष्ठी। की

कालिन्दीकमलसुरभौ यमुनायाः कमलानां सुरभिर्यत्र तैस्वां । "सुरभिः सुगन्धिः शैत्यमित्युक्तम्" । कीदृशीं बासन्तीति वासन्ती माधवीलता तस्याः यो नवपरिमलः तदुद्गारिणश्चिकुराः केशाः यस्याः तां, पुनः कीदृशीं त्वदुत्सङ्गे तव क्रोडे निद्रासुखेन मुकुलिते अक्षिणी यस्याः. निद्रामदमुकुलिताक्षीति पाठे निद्रा च मदश्च ताभ्यां मुकुलिते अक्षिणी यस्याः । निद्रेयं कामजं उक्तम् । "चेतः संमीलनं निद्रा श्रम-क्लम-मदादिजा । जृम्भाक्षिमिलनेच्छ्वा सा गात्रभङ्गादि कारणम्" ।। मदो यथा–"संमोहनानन्द-सम्मोहे मदो मधोपजे गज" इति । "सुरभिः सुगन्धिकान्तयोस्त्रिष्विति" मेदिनी ॥११४॥

अनु०—अब शीघ्र ही श्री वृन्दावन में आकर हमें जीवन दान दीजिए, ऐसा भाव व्यक्त करती हुई-श्री ललिता मथुरा में श्रीकृष्ण के प्रति अपनी अभिलाषा प्रगट करके हंस से कहती हैं:–'हे कृष्ण यमुना के कमलों से सुरभित निकुंज भवन में-श्रीराधा विराजती होगी और उनका केश कलाप माधवी लता की कुसुम सौरभ से आमोदित होगा एवं वह आपके अंक में सुख निद्रा में अर्ध निमि-लित नयन हो सोरही होगी, ऐसी दशा में मैं नव किसलय-वीजन द्वारा कब उनकी सेवा का सुख प्राप्त कर सकूंगी । श्रीललिता की प्रगाढ़ सेवा लालसा मयी यह विज्ञप्ति है ।।११४।।

सुखोल्लास-दोहा

कारण राधा विरह की, निज करनी जिय जानि ।
ललिता पुनि संयोग हित, करति विनय मृदुवानी ।।११४।।

मूल की भाषा पद्य–छप्पय

हे हरि ! द्वार निकुंज गेह कालिन्दी कमलन ।
रहत सुगंधित, तहँ राधा तुम गोद तासु तन ।।
वासन्ती के नव सुमननि कच सौरभ भीने ।
अध उघरे सुख नींद भरे दृग आलस लीने ।।

वहु पातन कौं कर बीजना लिये रतिश्रम हरन कौं ।
मैं ललिता कब पाऊं समय ऐसौ, सेवा करन कौं ॥११५॥

सारांश–सोरठा

सुरभित कुंचित केश नयन उनींदे अधखुले ।
आप सहित मथुरेश कब या राधा कौं लखौं ॥११५॥

०००००

धृतानन्दां वृन्दावनपरिसरे शारदनिशा-
विलासोल्लासेन ग्लपितकवरीफुल्लकुसुमाम् ।
तव स्कन्धोपान्ते विनिहितभुजावल्लरिमहं
कदा कुञ्जे लीना रहसि विहसिष्यामि सुमुखीम्॥११६॥

टीका–पुनरप्याशास्ते धृतानन्दामिति । अहं कदा रहसि एकान्ते कुञ्जे लीना सती सुमुखीं राधां विहसिष्यामि ? किम्भूतां वृन्दावनपरिसरे धृतानन्दां, पुनः कीदृशीं शारदनिशायां यो विलासः हर्षक्रीडाकौतुकं वा तेन ग्लपितानि मर्दितानि कवर्य्यां कुन्दादिकुसुमानि यस्यास्तां, अतिरमणीयत्वात् पूर्वानुभूतत्वाच्च शारदेत्युक्तम् । पुनः कीदृशीं तवेति–तव स्कन्धस्य उपान्ते विनिहिता अर्पिता भुजवल्लरी भुजलता यया, अनेन स्वाधीनभर्तृकात्वमुक्तम् । यदुक्तं–"कान्तरतिगुणाकृष्टा न जहाति वदन्तिकम् । विचित्रविभ्रमाशक्ता सा स्यात् स्वाधीनभर्तृकेति" । विलासो यथा–"धीराकृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः" इति ॥११६॥

अनु०—श्रीवृन्दावन के प्रान्त देश में, शरद् शर्वरी के समय रास-लीला के उल्लास के कारण जो आनन्द मग्न हो गई हैं और जिनके कवरी–देश से कुसुम झड़ रहे हैं और जो रसालस वश तुम्हारे कन्धे पर अपनी भुजाएं रक्खे हैं ! उस गोप-रमणी-मणि

राधा को एकान्त निकुंज स्थली में छिपी हुई मैं दर्शन कर कब परिहास कर सकूंगी ? इस पद्य में रासलीला के अन्त में निकुंज विहार का वर्णन, निविड रति विलासालस्यवश चलने में असमर्थ श्रीकृष्ण स्कंध प्रदेश में निज दोनों भुजा रक्खे कुंजभवन में छिपी राधाजी को देख परिहास करने का ललिता का अभिप्राय है ॥११६॥

मुखोल्लास–दोहा

राधा के चित में बसी, दरस आज ब्रजराज।
बरनत ललिता हंस सों, हरिहि सुनावन काज ॥११६॥

मूल की भाषा पद्य–गीतिका

धारण कियौ तुम संग सुख निशि शरद रास विलास में।
श्रम भयें बेनिन तें गिरे, प्रफुलित प्रसून हुलास में॥
तब आप के कंधनि धरीं राधा सुमुखि भुज बल्लरी।
दुरि कुंज में एकान्त ताकी हँसी कब करिहौं हरी ! ॥११६

सारांश–सोरठा

कब ह्वै हैं ब्रज माँह वे राका वे जामिनी।
हरि राधा गल बाँह कबै देखि हौं नयन भरि ॥११६॥

००००

विदूरादाहर्तुं कुसुममुपयामि त्वमधुना
पुरस्तीरे तीरे कलय तुलसीपल्लवमिदम्।
इतिव्याजादेनां विदितभवदीयस्थितिरहं
कदा कुंजे गोपीरमण गमयिष्यामि समये ॥११७॥

टीका—पुनराशास्ते विदूरादिति। हे गोपीरमण ! इति व्याजात् छला एनां राधां समये सङ्केतसमये कदा कुञ्जं गमयिष्यामि प्रापयिष्यामि अहं कीदृशी विदितभवदीयस्थितिः विज्ञातभवद्वस्थाना यत्र नीरू

रहसि शालतदुद्देशा, कोऽसौ व्याज इति आह-त्वमधुना इदं तुलसीपल्लवं कलय संचिनु, अहं विदूरात् कुसुममाहर्त्तुं आनेतुं यामि। लवलीपल्लवमिति पाठे लवलीपल्लवं "आमलकीति प्रसिद्धं" आनेतुं यामि ॥११७॥

अनु०—हे गोपीरमण! आपको निकुंज-भवन में निवास करते जान, मैं कुसुम-चयन करने कब गमन करूंगी और "अब तुम आगे से यहां यमुना किनारे तुलसी चयन करो" श्रीराधा से यह निवेदन कर उनको इसी छल से संकेतानुरूप तुम्हारे समीप प्रेरित करूंगी। इससे सखीगण की निजाभिलाषा से शून्य, निस्वार्थ विशुद्ध प्रेमसेवा प्रगट होती है ॥११७॥

मुखोल्लास–दोहा

बीती सुरति विलास की, हरि हि हौन सुधि हेत।
बरनत ललिता हंस सों, निज संदेस सचेत ॥११७॥

मूल की भाषा छन्द–गीतिका

बहु दूर अब मैं फूल बीनन जात, राधे! तू तहां।
लै राखियो नव पत्र तुलसी तीर यमुना सों यहां॥
करि कपट हे गोपी रमण! या राधिका कों कुंज में।
कब भेजि हौं मैं जानि बैठे लता पादप पुंज में ॥११७॥

सारांश–सोरठा

अन्तर हित चित राखि किये राधिका सों कपट।
फूल लैन मिस भाखि जाऊँ मिलै जु समय वह ॥११७॥

००००

इति श्रीकंसारेः पदकमलयोर्गोकुलकथां
निवेद्य प्रत्येकं भज परिजनेषु प्रणयिताम्।

निजाङ्के कादम्बीसहचर वहन् मण्डनतया
स यानुच्चैः प्रेमप्रवणमनुजग्राह भगवान् ॥११८॥

टीका—उपसंहरतीति इति श्री कंसारेः पादकमलयोरिति पूर्व्वोक्तं सकलां गोकुलकथां निवेद्य कथयित्वा परिजनेषु प्रत्येकं प्रणयितां प्रेमयुक्तां याचकतां वा भज कुरु, परिजनानपि कुशलप्रश्नादिना प्रीणयेति यावत्। यद्वा तेष्वपि गोकुलजनानुग्रहाय श्रीकृष्णं प्रवर्त्तयितुं याचकतां व्रज। ननु परिजनाः बहवः सन्ति तेषु मया कति भजनीया। इति चेत्तत्राह-स कृष्णः मण्डनतया निजाङ्ककरचरणादौ यान् वहन् धारयन्, प्रेमप्रवणं यथा स्यात्तथा अनुजग्राह अनुग्रहीतवान्। स्वयमतिकमनीयतायु अङ्गेषु तेषां ग्रहणं अनु-ग्रह एव। तथा चोक्तम्-"भूषणभूषणाङ्गमिति" 'प्रणयः प्रवणे प्रेम्णि' "याच्ञा विश्रम्भ-भावयोरपि निर्व्वाणेऽपीति" मेदिनी ॥११८॥

अनु०—हे मरालीसहचर! अपने हृदय में इस गोकुल की गाथा को अलङ्काररूप से धारण करते हुए इसे श्रीकृष्णचन्द्र के चरणों में निवेदन करके वहां पर उनके निकटवर्त्ती उनके प्रिय परिजनों के प्रति हमारा प्रेमभाव प्रदर्शित करना क्योंकि आजकल उनके सौभाग्य की सीमा नहीं है। इस जगत् में सर्वोच्च सौभाग्यशाली वे ही माने जा सकते हैं जिनके प्रति श्रीकृष्णचन्द्र अधिकाधिक प्रेम प्रदर्शित करते हैं। इससे श्रीकृष्णचन्द्र के लाभ से मथुरावासियों का सौभाग्याधिक्य और अपना दैन्य-दुर्भाग्य सूचित होता है ॥११८॥

मुखोल्लास-दोहा

निज सँदेस कहि हंस सों, ललिता-मिलन विधान।
हरि अंगनि गह नेह की, महिमा कहत सुजान ॥११८॥

मूल की भाषा पद्य—छप्पय

हे हंसी सँग रहन हार! तुम करौ निवेदन।
यह गोकुल की कथा यथारथ, हरि पद कमलन ॥

भक्ति प्रेम युत कृष्णचन्द्र के जो सेवक जन।
अरु भूषण भगवान अंग में राजत निस दिन॥
करि निपट अनुग्रह सो किये धारण अपनी देह में।
कछु भेद न जड़ चैतन्य कौ राखौ करन सनेह में॥११८॥

सारांश—सोरठा

धारत भूषण देह भक्तन जनु तन्मय करत।
याही विधि करि नेह राधा जी सों मिलिय हरि॥११८॥

००००

मिलद्भृङ्गीं हंसी-रमण! वनमालां प्रथमतो
मुदा क्षेमं पृच्छन्निदमुपहरेथा मम वचः।
चिरं कंसारातेरुरसि सहवासप्रणयिनीं
किमेनामेणाक्षीं गुणवति! विसस्मार भवती॥११९॥

टीका—वनमालां प्रति यद्वाच्यं तदाह-मिलदिति। हे हंसीरमण प्रथमतो मुदा हर्षेण वनमालां क्षेमं पृच्छन् इदं मम वच उपहरेथाः उपढौकय। वनमालामिति हेतु कर्म्म। कीदृशीं मिलद्भृङ्गीं मिलन्त्यः संगच्छमाना भृङ्ग्यो यत्र तां, इदं किं, हे गुणवति! असौ माधुर्य-सौगन्ध्यादिगुणः, अत्र गुणो ग्रन्थनसूत्रं तद्युक्तेन, एनां लक्ष्मीं राधां भवती त्वं विसस्मार विस्मृत्यवत्यसि? कीदृशीं कंसारातेः श्रीकृष्णस्य उरसि वक्षसि इह वासप्रणयिनीं, विस्मरणमयुक्तमेवेति भावः। यथा सहचरीममाक्षीरित्यादिकथनमध्याहृत्य अनुकथने इदं एलादेशः॥११९॥

अनु०—हे हंसीरमण, आप सर्व प्रथम श्रीकृष्णचन्द्र के हृदय पर विराजने वाली उस वनमाला से जिसके अपूर्व सौरभ से आकृष्ट हो भ्रमरावलि स्वयं उसके समीप चली आती है, सानन्द कुशल प्रश्न पूछकर हमारा सब सन्देश कथन करना। कहना कि "हे

गुणवति, तुम्हारे साथ ही श्रीकृष्णचन्द्र के वक्षस्थल पर चिरकाल निवासाभिलाषिणी, अनुरागवती उस मृग नयनी राधा को क्या तुम भूल गई हो ? विस्मृति के कारण वनमाला के प्रति प्रणयाभियोग ही इसका मुख्य उद्देश नहीं है, अपितु भङ्गी-क्रम से श्रीकृष्ण से प्रश्न करना ही उद्देश है। ११६॥

सुखोल्लास-दोहा

अंग आभरन कृष्ण में, गनिय प्रथम वनमाल।
तासों यह विनती करौ, मथुरा जाय मराल॥११६॥

मूल की भाषा पद्य-छप्पय

मधुप गुंजरत जामें सो वन माल हिये हरि।
मुदित प्रथम करि कुशल प्रश्न तासों, धीरज धरि॥
कहियों ये मन वचन अहो वन माल गुणवती।
वक्षस्थल श्रीकृष्ण माहिँ चिर काल रतिमती॥
यह मृग नयनी राधा रही प्रीति किये सहवास उर।
सो विसराई नैं कत अबै कहौ हंस सब विधि चतुर॥११६॥

सारांश-सोरठा

रही संग चिरकाल जो राधा सह वासिनी।
अरी हरी वन माल करी न ताकी सुधि कबहुँ॥११६॥

०००

इदं किं वा हन्त स्मरसि रसिके! खण्डनरुषा
परीताङ्गी गोवर्द्धनगिरिनितम्बे मम सखी।
भिया सम्भ्रातास्यं यदिह विचकर्ष त्वयि बला-
द्गृहीत्वा विभ्रश्यन्नवशिखिशिखं गोकुलपतिम्॥१२०॥

टीका—पुनरपि वनमालायां व्यक्तमाह इदमिति। हे रसिके! रसम्वेदिचतुरे! हन्त खेदे, इदं किम्वा स्मरसि इदमतीत-चिह्नात् त्वदेकत्वात्

विस्मरणयोग्यं न, तदपि स्मरसि. इदमतीव चित्ताह्लादकत्वात् विस्मरणयोग्यं न तदपि स्मरसि न वेति वाशब्दस्य चाभिप्रायः, इदं किं गोवर्द्धनगिरिनितम्बे गोवर्द्धनैकदेशे मम सखी त्वयि बलाद् गृहीत्वा गोकुलपतिं इह विचकर्ष आकृष्टवती, भिया "सापराधोऽस्मीति" संभ्रान्ताढ्यं चञ्चललोचनं, पुनः कीदृशं विभ्रश्यदिति विभ्रश्यन्ती अधःपतन्ती नवा मनोहरा शिखिशिखा पिञ्छं यस्मात् यस्य वा तं, बलादाकर्षणेन शिखण्डस्य पतनम् । इयं कीदृशी खण्डनं वाताञ्चलं तेन आकृष्टतया परिताङ्गी पूर्णाङ्गो । इयमधीराखण्डिता यत उक्तं—"तर्जयेताडयेत् अन्येति" अन्या अधीरेत्यर्थः ॥१२०॥

अनु०—हे रसिके वनमाले ! यथार्थ रूप से संभोग रस की तो तुम ही ज्ञाता हो, क्योंकि तुम एक क्षण भी श्रीकृष्णचन्द्र के वक्षस्थल का परित्याग नहीं करती । श्रीकृष्णचन्द्र के व्रजवास काल में हमारी सखी राधा किसी दिन उनके श्रीअङ्ग में अन्य नायका सम्भोग जन्य चिन्हादि देखकर प्रणय-कोपवश अत्यन्त अधीरा हो उठी थी क्योंकि उन्होंने उसी गोवर्द्धन गिरि के मध्य उसका हस्त ग्रहण किया था, इसी कारण श्रीकृष्ण उससे इतना भय मानते थे । एक दिन जिस समय उनका नूतन, मोर पिच्छ का मुकुट स्खलित हो गया था तब तुमको देखकर श्रीराधा का क्रोध शत गुण अधिक बढ़ गया था । कारण कि, तुममें कुंकुम, मृगमद लगा रहने से श्रीकृष्ण का विशेष लाम्पट्य प्रगट होता था, इसी से श्रीराधा ने तुम्हें अपने हाथों से खींचा था, यह भी तुम्हें याद है कि नहीं ? इस पद्य में श्रीराधिका जी का खण्डितानायिकोचित क्रोध प्रगट होता है ॥१२०॥

मुखोल्लास-दोहा

पुनि बन माला प्रति कहत, ललिता वचन रसाल ।
पूछन जोग प्रसंग ये, जानहु उचित मराल ॥१२०॥

मूल की भाषा पद्य—छप्पय

हे वनमाले ! खेद, कबहुँ तोकों सुधि आई।
राधा तेरे तोरन हित इच्छा प्रगटाई॥
गिरि गोवर्द्धन मध्य भाग चंचल चख कीन्हे।
लेय न प्यारी तोरि यहै संभ्रम चित दीन्हे॥
नव मोर चंद्रिका मुकुट शिर भ्रमण करत व्रजपति लह्यो।
गति दई गही वृषभानुजा सबल तोहि तोरन चह्यो॥१२०॥

सारांश—सोरठा

हे रसिके बन माल ! राधा तव तोरन चह्यो।
लै फिरत नँदलाल राखी तोहि बचाय उर॥१२०॥

००००

ततः सम्भाषेथाः श्रुति-मकरमुद्रामिति मुदा
भवत्यां कर्तव्यः किमिति कुशल-प्रश्नजडिमा।
रुचिस्मेरा या त्वं रचयसि सदा चुम्बनकला-
मपाङ्गेन स्पृष्टा सखि ! मुरारिपोर्गण्डमुकुरे॥१२१॥

टीका—अथ कुण्डले व्यक्तमुपदिशति तत इति। ततस्तदनन्तरं श्रुति मुद्रा श्रुतिमकरमुद्रां मकराकृतिकुण्डलमित्यर्थः। जात्या एकत्वं इति संभाषेथाः संकथय इति, किमित्याह—भवत्यां त्वयि कुशलप्रश्नजडिमा कुशल एव प्रश्नजडिमा जाड्यं कर्त्तव्यः तत्र कुशलमकुशलञ्चेति किं प्रष्टव्यं न वेत्यर्थः। निरन्तरनिरतिशयकुशलशालिन्यां कुशलप्रश्नो जडिमेति भावः। कुशलशालिता यथा—त्वं अपाङ्गेन पृष्टा सती नेत्रान्त-स्यातिदीर्घत्वात्, मुरारिपोः गण्डमुकुरे अतिस्वच्छत्वात् गण्ड एव मुकुरः तस्मिन् चुम्बनकलां सदा रचयसि करोषि, कीदृशी रुचिस्मेरा रुच्या कान्त्या स्मेरा देदीप्यमाना इत्यर्थः। यद्वा रुचिः कान्तिः स्मेरं

ईषद्धसनं यस्याः, अनवरतानन्दसमुद्रे विलसन्त्यास्तव सदैव कुशल-मिति भावः उक्तः । अन्यापि नायकस्यापाङ्गेन स्पृष्टा सति गण्डे चुम्बति । रुचिः परिष्वङ्गः तस् सुखेन श्रृंगारभावस्मेरयुक्ता च भवति । यदुक्तं वात्स्यायनेन—"हासो भवति श्रृङ्गारादिति" । कृष्णो नायकः, मकरमुद्रा नायिका, रुचिः स्त्री । "रुचिः शोभायामभिष्वङ्गाभिलाषयो-रिति" मेदिनी ॥१२१॥

अनु०—हे हंस ! वनमाला से ऐसा प्रश्न करने के पश्चात् हर्ष पूर्वक श्रीकृष्णचन्द्र के कर्ण में विराजमान मकराकार-कुण्डल से सम्भाषण करना । उससे कुशल प्रश्न करना तो मूर्खता है, कारण कि श्रीकृष्णचन्द्र के गण्ड-युगल का चुम्बन करने वाले से कोई कुशल प्रश्न भी क्या करे ? क्योंकि वह तो कान्तिमय, हास्यपूर्ण श्रीकृष्णचन्द्र के भाव विलासी, नयनाञ्चल का स्पर्श पाते रहकर उसके बीच २ में उनका कपोल चुम्बन सहसा करते रहते हैं । इस प्रकार अयोग्य वस्तु का सौभाग्य निरीक्षण कर ईर्ष्या से यदि ब्रजसुन्दरी गण के मनों में यदि ईर्ष्या-भाव उदय होता है, इसी से उनको महाभावमयी समझना उचित है ॥१२१॥

मुखोल्लास—दोहा

वनमाला सों मिलि सखे, चपल कुंडलन कान ।
मिलिये तिन सों प्रेम करि, हैं वे भव्य प्रधान ॥१२१॥

मूल की भाषा पद्य—छप्पय

अहो हंस ! जो मकराकृति मुद्रा हरि कानन ।
तिन सों कीजै संभाषन सानन्द मुदित मन ॥
सादर कहियों हे सखि मुद्रे ! मकर कान्ति वर ।
दृग कटाक्ष सों मुकुर कपोलन कृष्णचन्द्र कर ॥
बर बस सपरस करति हौ चुम्बन क्रीड़ा धनि अहा ।
कुशल प्रश्न तुम सों करन प्रगट करत जड़ता महा ॥१२१॥

सारांश—सोरठा

तुम सौ को बड़भाग कृष्ण कपोतल मुद्रिके!
किये कोटि जप याग पावन पद यह सुलभ नाहँ ॥१२१॥

○○○○

निवासस्ते देवि ! श्रवणलतिकायामिति धिया
प्रयत्नात्त्वामेव प्रणयहृदया यामि शरणम् ।
परोक्षं वृष्णीनां निभृतनिभृतं कर्णकुहरे
हरेः काकून्मिश्रां कथय सखि ! राधाविधुरताम् ॥१२२॥

टीका——कर्णमूलनिवासत्वात् त्वयैव हरेः कोमलं रहसि कथयितव्य-मित्याह निवास इति । हे देवि ! मकरमुद्रे ते तव श्रवणलतिकायां निवासो वसतिः इति धिया बुद्ध्या प्रणयहृदया नम्रचित्ता सती त्वामेव शरणं यामि । ननु मया किं कर्त्तव्यमित्याह-वृष्णीनां परोक्षं यथा स्यात् निभृतं रहसि, तत्रापि प्रकाश्यकथने कुत्रापि तिरोभूय कश्चित् शृणोति अतः कर्णकुहर एव ननु कर्णमूले, अपीति एतत्त्वयैव शक्यमि-तिभावः ।"विधुरं स्यात् परिशेषणद्वयो विकले-त्रिष्विति"मेदिनी॥१२२॥

अनु०——हे देवि ! हे सखि ! यह मकरमुद्रा के प्रति सम्बोधन है । श्रीकृष्णचन्द्र का गण्डस्थल ही तुम्हारी लीला विलास भूमि है । उनकी श्रवणलतिका में तुम्हारा निवास है, ऐसा विचार कर प्रणय वश मैंने तुम्हारी शरण ली है, सो तुम यादवगण के परोक्ष में अत्यन्त गुप्त भाव से श्रीकृष्णचन्द्र के कानों में शोक सन्तप्ता राधा की काकूतिमयी, कातरता को निवेदन करना अर्थात् विनयपूर्वक श्रीराधा की विरह-वेदना को श्रीकृष्ण को एकान्त के समय सुना देना ॥१२२॥

मुखोल्लास-दोहा

मकर मुद्रिका सों कहत, हंसहि रही सुनाय।
ललिता साधन काज हित, करत विनय अधिकाय ॥१२१॥

मूल की भाषा पद्य-छन्द गीतिका

देवी मकर मुद्रे ! तुम्हारौ वास हरि कानन अहै।
जा बुद्धि सों ये दीन ललिता आप कौ आश्रय लहै॥
सखि ! यादवन सों अप्रकट ह्वै भेदवाद बखान में।
दुर्बल दशा या राधिका की कहौ हरि के कान में॥

सारांश-सोरठा

राधा की गति दीन अहो मकर मुद्रे सुनौ।
हरि सों कहौ प्रवीन पै परोक्ष यादवन के ॥१२२॥

◇◇◇◇

परीरम्भं प्रेम्णा मम सविनयं कौस्तुभमणौ
ब्रुवाणः कुर्वीथाः पतगवर विज्ञापनमिदम्।
अगाधा राधायामपि तव सखे ! विस्मृतिरभूत्
कथं वा कल्याणं वहति तरले हि प्रणयिता ! ॥१२३॥

टीका—कौस्तुभमणि प्रति वक्तव्यमुपदिशति परिरम्भमिति । हे पतगवर ! कौस्तुभमणौ सविनयं प्रेम्णा मम परिरम्भमालिङ्गनं ब्रुवाणः इदं विज्ञापनं कुर्व्वीथाः करिष्यसि । तत् किमित्याह—हे सखे ! राधायामपि आस्तां अन्यासां कथां अतिप्रियस्यां राधायामपीति अपिशब्दस्यार्थः तव अगाधा अपारा विस्मृतिरभूदिति । अर्थान्तरन्यासेन निन्दन्तीवाह—हि निश्चितं तरले ! प्रणयिता प्रेमवत्ता कथं कल्याणं वहति नैवेत्यर्थः । अथच तरले षिङ्गे कामिजने प्रणयिता कल्याणं वहति वहत्विति कामिनीनां नित्यं नव-नव प्रियतया अस्थिरत्वात् तथा चोक्तं—"जारा उप-

पतय: मुक्तवती स्त्रियामिति"। एवन्तु श्रीकृष्णं प्रत्याक्षेपवचनमानमिति, अथ च तरले सुरसत्यागात् तरलो मधपस्तस्मिन् उक्त मधपं सौहृद्यं नास्ति ॥१२३॥

अनु०—हे पक्षिवर ! तुम श्रीकृष्णजी के वक्षस्थल पर विराजमान कौस्तुभमणि से हमारा सप्रेम आलिंगन कह कर अति विनीत भाव से निवेदन करना कि हे सखे ! असीम प्रेम की आधार, जो श्रीराधा हैं उनको तुमने नितान्त ही भुला दिया । यह निश्चय तुम्हारी अगाध भूल है, क्योंकि तुम चञ्चल हो और श्रीकृष्ण क वक्षस्थल पर सर्वदा झूलते रहते हो, इसी कारण ऐसे चञ्चल के साथ प्रीति लगाना कभी मङ्गल-जनक नहीं होता, दूसरे सामान्यतया चञ्चल-स्वभाव वाले जन की प्रीति कभी कल्याणकार नहीं होती ॥१२३॥

मुखोल्लास—दोहा

कौस्तुभ मणि प्रति कहत अब, ललिता सविनय बैन ।
कहौ हंस जाते सुनै, ब्रज पति करुणा ऐन ॥१२३॥

मूल की भाषा पद्य—छन्द गीतिका

हे पक्षि गन में श्रेष्ठ मेरी विनय कीजै प्रेम सों ।
हरि हृदय कौस्तुभि मणि करौ ता सँग अलिंगन नेम सो ॥
समझाइये पुनि भूल ताकी बिपति जो राधा सही ।
इन चंचलन सों प्रीति करि कल्याणता कौनें लही ॥१२३॥

सारांश—सोरठा

थिर न रहति है प्रीति कबहुँ चंचलन के हृदय ।
नाहिन होति प्रतीति चपल चितन की लखि दशा ॥१२३॥

००००

मुहुः कूजत्काञ्चीमणिवलयमञ्जीरमुरली-
रवाऽऽलम्बो भ्राम्यद्युवतिकलगीतैः सुरमणे ? ।

स किं साक्षाद्भावी पुनरपि हरेस्ताण्डवरसै-
रमन्दः कालिन्दीपुलिनभुवि तौर्य्यत्रिकभरः ॥१२४॥

टीका—तं पृच्छति मुहुरिति । हरैस्ताण्डवरसैः सहसा तौर्य्यत्रिकभरः समूहः कालिन्दीपुलिनभुवि पुनः किं साक्षाद्भविष्यति" स कीदृक् मुहुरिति मुहुः कूजन्तीनां अव्यक्तं ध्वनिं कुर्व्वतीनां काञ्च्यादीनां यो रवः ध्वनिः तमालम्बयितुं शीलं यस्य, काञ्ची किङ्किणी, मणिमयवलयाः कङ्कणानि, मञ्जीराणि नूपुराणि, मणिमयानीत्यनेनापि सम्बन्धः। मुरली वेणुः, मृदङ्गयादिवाद्यभाण्डं काञ्च्यादिगीतं वलयनूपुरयोः सवाद्यं रिति । पुनः कीदृशः भ्राम्यन्तीनां वलयीभूयनृत्यन्तीनां कलगीतं यत्र, "भ्राम्यादिति पाठे"–काञ्च्यादीनां रवालम्बी रवानुसारि भ्राम्यद्-गोपीनां गीतं यत्र, यथा काञ्च्यादयो ध्वनिं कुर्व्वन्ति तथा अनुरागवत्यो गोप्योऽपि गायन्तीत्यर्थः । अत्र तौर्य्यत्रिकमित्युक्तं । नृत्य-गीत वाद्य प्राप्तौ विशेष प्रतिपत्त्यार्थं काञ्च्यादीनामुपादानं, तेनायमर्थः—काञ्च्या-दयो वाद्यभाण्डं गोप्योऽनुगानकारिण्यः श्रीकृष्णो नर्त्तकः इत्यपूर्व्वैव सामग्री, सततं हरेः हृदयनिहितत्वं हार्दं सर्व्वं जानासीति त्वां पृच्छा-मीति भावः ॥१२४॥

अनु०—हे देवमणे कौस्तुभ ! तुम श्रीकृष्णचन्द्र के हृदय पर सदा विराजमान रहकर उनका मनोगत भाव जानती रहती हो अतः तुम ही से इस विषय की जिज्ञासा करती हूँ कि, रासमण्डल में नृत्य करने वाली युवतियों के कलगीत एवं उद्दण्ड नृत्य विलास में बार २ शब्दायमान काञ्ची, मणि, वलय, नूपुर एवं मुरली रव का आश्रय लेने वाले श्रीकृष्णचन्द्र जी का, यमुना तट पर वह रासोत्सव देखने का कभी मुझको फिर भी सौभाग्य प्राप्त हो सकेगा ? ॥१२४।

सुखोल्लास—दोहा

सुधि करायवे हेतु अब, पूर्व भूत रति रास।
ललिता सखि सों कहत पुनि, कृष्ण मिलन करि आस।१२४।।

मूल की भाषा छन्द—गीतिका

हे कृष्ण कंठाभरण चिन्तामणि कलिन्दी पुलिन में।
कब होयगो वह नृत्य ताण्डव तौर्य्यत्रिक मृदु ध्वनिन में।।
तहँ करधनी कंगनन नूपुर बाँसुरी कलरव भरी।
करि गान ताल विधान संयुत लेँहि फेरी सुन्दरी।।१२४।।

सारांश—सोरठा

ऐसौ रास विलास पूर्व समय में जो भयौ।
कब ह्वै है आभास ताकौ फिर चिन्तामणे!।।१२४।।

००००

नवीनस्त्वं कम्बो पशुपरमणीभिः परिचयं
न धत्से राधाया गुणगरिमगन्धेऽपि न कृती।
तथापि त्वां याचे हृदयनिहितं दोहदमहं
वहन्ते हि क्लान्ते प्रणयमवदातप्रकृतयः ।।१२५।।

टीका—इदानीं पाञ्चजन्यं प्रति वक्तुमुपदिशति नवीन इति। हे कम्बो शंख! त्वं पशुपरमणीभिः सह परिचयं न धत्से न दधासि तथा राधाया गुणगरिमगन्धेऽपि गुणबाहुल्यस्याऽल्पेऽपि न कृती न विद्वान्, त्र हेतुः यतः स त्वं नवीनः नूतनः, तदानीमविद्यमानासौ अज्ञाते हेतुः। अहं तथापि एवमपि हृदयनिहितं दोहदं अभिलाषं त्वां याचे, द्विकर्म्मको चिः, ननु यदि परिचयं नास्ति तर्हि याञ्चा व्यर्थैवेति चेत्तत्राह—वहन्त ति-हि यतोऽपरिचितोऽपि अस्मासु प्रणयं करिष्यत्येवेति भावः। "गन्धो गन्धक आमोदने गन्ध सम्बन्धि गर्व्वयोरिति" विश्वः।

"प्रकृतिः गुणसाम्ये स्यात् अमात्यात्मस्वभावयोः योनौ लिङ्गे पौरमार्गे" इति मेदिनी ॥१२५॥

अनु०—हे शङ्ख ! तुम नवीन हो, क्योंकि, श्रीव्रजेन्द्रनन्दन व्रज में निवास करते समय तो अपने कर कमल में मुरली धारण किया करते थे और मथुरा में अब तुमको धारण करते हैं इस कारण नवीन होने से तुम गोपी-गण से अपरिचित ही हो, अतएव श्री-कृष्ण के सुख के हेतुभूत श्रीराधा के गुणों का तुम बिन्दु मात्र भी ज्ञान नहीं रखते, तथापि अपने मनोगत अभीष्ट के विषय में तुमसे प्रार्थना करती हूँ। कारण कि, इस संसार में जो विशुद्ध-चित्त एवं सहृदय होते हैं वे विरह-व्यथित जनों के प्रति प्रेम एवं करुणा प्रदर्शित करते ही रहते हैं, इसी कारण से मैं तुमसे निवे-दन करने को उद्यत हुई हूँ ॥१२५॥

मुखोल्लास—दोहा

अब बरनत है शंख सों, ललिता राधा प्रीति।
वहीं हंस के चित्त दृढ़, करत सँदेसे रीति ॥१२५॥

मूल की भाषा पद्य—गीतिका

हे शंख ! तुम हौ नये, गोपिन रीति पहचानत नहीं।
गुरुता गुणनि वृषभानुजा की तनिक तुम जानत नहीं ॥
प्रगटत मनोरथ मैं तदपि सुनिये निवेदन मम यहै।
बिनु हेतु शुक्ल स्वभाव की शुचि कृपा दीनन पर रहै ॥१२५॥

सारांश—सोरठा

गोपीगन की प्रीति शंख नवल ! जानौ कहा।
पै शुक्लन की रीति दीनन पर राखत दया ॥
शंख चक्र अरु पद्म गदा सहित व्रजराज नें।
मथुरा में सुख सद्म धारे, तातें कहे नव ॥१२५॥

००००

गृहीत्वा गोविन्दं जलधिहृदयानन्दन सखे
सुखेन श्रीवृन्दावनपरिसरं नन्दतु भवान् ।
कथं वा ते गोष्ठं भवतु दयितं हंत बलवान्
यदेतस्मिन् वेणोर्जयति चिरसौभाग्यमहिमा ॥१२६॥

टीका—पुनस्तमेव प्रार्थयते गृहीत्वेति । हे सखे ! हे जलधिहृदयानन्दन ! समुद्रतनय ! अनेनेति गाम्भीर्यवतोऽपि जलनिधेः हृदयानन्दनत्वेन नातीवानन्दजनकत्वमुक्तम् । गोविन्दं गृहीत्वा श्रीवृन्दावनपरिसरे नन्दतु आनन्दयुक्तो भवतु । पुनरसम्भवमालोक्य सङ्कटे कथं वेति हन्त खेदे ते तव गोष्ठं कथं वा दयितं प्रियं भवतु, तत्र हेतुमाह-यदिति । यत् यस्मात् एतस्मिन् गोष्ठे बलवान् अतिमहान् चिरसौभाग्यमहिमा चिरकालं व्याप्य वेणोः सौभाग्यस्य महत्वं जयति उत्कर्षेण वर्त्तते । अन्यस्य हर्ष-प्रधाने स्थानेऽन्यस्य कथं प्रीति र्भवत्वित्यर्थः । शङ्खस्य शब्दजनकता वेणोरपि, अतः परस्परं स्पर्द्धा ॥१२६॥

अनु०—हे जलधि-हृदय-नन्दन ! आपकी उत्पत्ति समुद्र से है । आप गोविन्द को लेकर वृन्दावन में सुख पूर्वक आनन्दानुभव कीजिए । यदि आपके मन में यह शङ्का हो कि, मुझे वृन्दावन क्यों प्रिय कर एवं सुखप्रद हो सकेगा जो मैं वहाँ पर आऊँ ? इसके उत्तर में यही कहती हूँ कि, इस वृन्दावन में तो चिरकाल से वेणु-नाद रूप महा-सौभाग्य-महिमा विद्यमान है, इस कारण यह वृन्दावन, आपको अवश्य ही प्रिय हो सकेगा । श्री मथुरापुरी धामरूप से श्रेष्ठ होते हुए भी वह स्थल-मधुर-वेणु-नाद से मुखरित नहीं है, बस श्री वृन्दावन में यही विशेषता है ॥१२६॥

मुखोल्लास—दोहा

ललिता पूर्व प्रसंग में, कृष्ण संग व्रजवास ।
करन हेतु पुनि शंख प्रति विरचति वाग विलास ॥१२६॥

मूल की भाषा पद्य—छन्द गीतिका

हे जलधि मन आनन्द दायक ! शंख ! हरि के संग में ।
तुम भूमि वृन्दावन बसहु व्रज आय परम उमंग में ॥
हा खेद तुम प्रिय होहु गोकुल के जु कोऊ विधि पगै ।
चिर काल सों महिमा यहाँ ध्वनि बांसुरी ही की जगै ॥१२६॥

सारांश—सोरठा

या वृन्दावन माहिँ अब लौं वंसी ध्वनि रही ।
शब्द तुम्हारो नाहिँ शंख ! बसहु हरि सँग यहाँ ॥१२६॥

०००

इति प्रेमोद्गारप्रवणमनुनीय क्रमवशात्
परीवारान् आर्तनिशमयति चाणूरमथने ।
पुनः कोपोद्भिन्नप्रणयचटुलं तस्य निकटे
कथामाचक्षीथाः दशभिरवतारैर्विलसिताम् ॥१२७॥

टीका—उपसंहरति इति प्रेमोद्गार इति । हे आर्तहंस ! चाणूरदमने श्रीकृष्णे निशमयति श्रृण्वति सति इति अनेन प्रकारेण प्रेमोद्गारप्रवणं यथा स्यात् प्रेमोद्गारेण प्रेमप्रकाशेन उद्गारं मनोहरं यथा स्यात् क्रमवशात् क्रमेण परिवारान् अनुनीय, तस्य चाणूरदमनस्य निकटे दशभिरवतारैर्विलसितां कृतां कथां पुनराचक्षीथाः । तस्य मीनादिदशावतारस्य कथां कथयिष्यसि इत्यर्थः । कोपेति—कोपेन उद्भिन्नो मिश्रितो यः प्रणयः प्रेमा तेन चटुलां रम्यां, दशावतारकथाप्रयोजनं निन्दागर्भितैर्वाक्यैर्वाक्यविलासमात्रं ज्ञेयम् । "उद्भिन्नो दारिते मिश्रे" इत्यमरः । "चटुलं चञ्चले रम्ये" इति कोषान्तरम् ॥१२७॥

अनु०—हे बन्धु ! इस तरह प्रेम प्रगट करते हुए कि, श्रीकृष्णचन्द्र ध्यान से सुन सकें, इस तरह उनके समस्त परिवार की विनय करते

एक बार फिर उनके निकट प्रणय-कोप से उत्तेजित होकर क्रम से श्री माधव के मत्स्य, कूर्मादि दसों अवतारों की मनोरम दर) कथाओं का वर्णन करना ॥१२७॥

मुखोल्लास—दोहा

भूषण वनमालादि की, महिमा वरनि अपार।
ललिता ललित प्रसंग अब, वरनत दश अवतार ॥१२७॥

मूल की भाषा पद्य—कुंडलिया

विनती क्रम करि प्रेम सों वनमालादिक साज।
तिनकी महिमा कों कहत जाहु निकट ब्रजराज ॥
जाहु निकट ब्रजराज प्रीति उर अन्तर धारौ।
रम्यस्तुति मय पुनर्वार मृदु गिरा उचारौ ॥
अवतारन की कथा मुख्य जिनकी दश गिनती।
जाय कृष्ण सों कहो, भ्रात ! मेरी यह विनती ॥१२७॥

सारांश—सोरठा

दश अवतार चरित्र भव भंजन गंजन विपति।
मधुर गिरा सों मित्र प्रेम सहित वर्णन करौ ॥१२७॥

००००

ग्रहीतुं त्वां प्रेमामिषपरिवृतं चित्तबडिशं
महामीन ! क्षिप्रं न्यधित रसपूरे मम सखी।
विवेकाख्यं छित्वा गुणमथ तदग्रासि भवता
हताशेयं किंवा शिव शिव विधातुं प्रभवति ॥१२८

।—तत्र प्रथमं मीनावतारविलसितमाह-ग्रहीतुमिति। हे महामीन हामत्स्य ! मम सखी राधा त्वां ग्रहीतुं स्ववशीकर्त्तुं प्रेमामि॰ वृतं प्रेमणोपलक्ष्यद्रव्यपरिवृतं चित्तबडिशं मनो बडिशं रसपूरे रसं ग: स एव पुरो जलौघ: तस्मिन् न्यधित अर्पितवती प्रेमशरणं म॰

अनुरागविषयं कृतवती इत्यर्थः। अथानन्तरं भवता विवेकाख्यं विवेक-सञ्ज्ञं गुणविवेकं यत्र बध्वा बडिशं क्षिप्यते, तं गुणं रज्जुं छित्वा तद्बडिशमग्रासि गिलितम्। शिव इति खेदे सम्बोधनं, इयं हताशा किं वा विधातुं कर्त्तुं प्रभवति शक्नोति। अथ च अस्याः विवेकः कर्त्तव्याकर्त्तव्यविचाराख्यगुणः आत्मनिष्ठधर्म्मविशेषोऽग्रासि अपनीतमित्यर्थः। तदिति कर्त्तव्यतामूढया अनया किं कर्त्तुं शक्यमिति प्रस्तुतार्थः। अन्योऽपि आमिषावृतं बडिशं महतो मीनस्य धारणाय जलपूरे निक्षिपति, महामीनत्वात् विवेकगुणं दृढवज्रगुणं छित्वा यदि बडिशं ग्रसते तदा प्रतिपत्तिशून्यो मत्स्यग्रहणे हताशश्च जनो भवतीति ध्वनिः। "आमिषः पलने लोभ्यं संभोग्योत्कचयोरपि। आमिषः सुन्दराकाररूपादिविषयेऽपि चेति" विश्वः। 'विवेकः स्याज्जलद्रोण्यां पृथग्भावविचारयोरिति' मेदिनी। "रज्जुस्त्रिषु वटी-गुण" इत्यमरः। अथ च हे महामीन! महाहिंसक! मिङ् हिंसायामिनादित्वाश्च॥१२८॥

अनु०—हमारी सखी, महामत्स्य स्वरूप आपको प्राप्त करने की अभिलाषा करके, अपने मन रूप-बड़िश (काँटे) को प्रेम रूप (आमिष) ललचाने की वस्तु से वेष्टित कर अनुरागरूप जलप्रवाह में डाल चुकी थी, उसके पश्चात् आपने विवेक रूप रस्सी को तोड़ कर उसी कंटक को निगल लिया है अर्थात् आप उसके मन को अपहरण कर चुके हैं। हाय! ऐसी दशा में मेरी सखी राधा क्या कर सकती है, तात्पर्य यह कि, आपकी महा मोहिनी शक्ति द्वारा राधा का विवेक तथा धर्माधर्म विचार विनष्ट हो गया है। जिस विवेक रस्सी के जगत् की साध्वी स्त्रियाँ, कुल—शील, लज्जा और पातिव्रत धर्म को बाँधे रहती हैं उस रस्सी के छिन्न भिन्न होने से मेरी सखी का हिताहित ज्ञान अन्तर्धान हो गया है, वह तुम्हारे अनुराग सागर के प्रवाह में बह गया है। हाय! अब हतभागिनी राधा क्या कर सकती है, आप ही कहिए॥१२८॥

मुखोल्लास–दोहा

प्रथम मानि श्रीकृष्ण कों, प्रबल मत्स्य आकार।
ललिता बरनत तासु की, महिमा परम उदार ॥१२८॥

मूल की भाषा पद्य–छप्पय

रस शृङ्गार प्रवाह माहिँ लखि कृष्ण मीन सम।
प्रेम मांस सों अपनो चित बंसी ढम्पित क्रम ॥
डारी सपदि राधिका निज विवेक करि डोरी।
सो कीन्ही हरि ग्रास आप यह रसरी तोरी ॥
अब शिव शिव यह राधा भक्ता कहौ जतन का करि सकत।
सब भाँति हताशा होय के शरण आप ही की तकत ॥१२८॥

सारांश–सोरठा

कृष्ण रूप शुचि मीन गहन चह्यौ राधा तिनहिँ।
दीनी तोरि प्रवीन गुन मति बंसी चित्त की ॥१२८॥

००००

वराकीयं दृष्ट्वा सुभगवपुषो विभ्रमसरं
तवाभ्यर्णं भेजे परमकुतुकोल्लासितमतिः।
तिरोधाय स्वाङ्गं प्रकटयसि यत्त्वं कठिनतां
तदेतत् किं न स्यात्तव कमठमूर्तेः समुचितम्॥१२६॥

टीक—कठिनतां ख्यापयितुं कुर्म्मावतारविलसितमाह वराकीति। इयं वराकी शोच्या हे सुभगसुन्दर! सुभगवपुष! इत्येकं वा सुन्दरशब्दस्येत्यर्थः। तव विभ्रमभरं मीनावतारबाहुल्यं दृष्ट्वा परमकुतुकोल्लासितमतिः सती परमकुतुकेन उल्लासिता सानन्दा मति र्यस्याः तथा सती अभ्यर्णं तव निकटं भेजे। स्वाङ्गं निजमूर्त्तिं तिरोधाय दूरे निधाय त्वं यत् कठिनतां निर्दयत्वं प्रकटयसि तदेतत् कमठमूर्त्तेः कूर्म्मरूपस्य तः

किं समुचितं न स्यात् अपि तु स्यादेव । व्रजं विहाय मथुरागमनात् तिरोहितस्वाङ्गता, पुनः दर्शनादानात् कठिनता च, कूर्म्मो हि जले समीपस्थे सति निजदेहं पृष्ठस्थितिशाधाय कठिनतरो भवतीति तुल्यता ॥१२६॥

अनु०—हे सुभग ! यह हमारी सखी बड़ी मूर्खा है अतः इस शोचनीय दशा को प्राप्त हुई है, वह आपके श्रीअङ्ग की अतिशय शोभा को देखकर परम लौल्य से उल्लसित हो आपके समीप पहोंच चुकी थी, किन्तु आपने अपनी स्वाभाविक नराकृति को गोपन करते हुए बड़ी कठिनता प्रकाशित की है और वह युक्ति युक्त ही है कारण कि आप ही तो कूर्म (कमठ) रूप में अवतीर्ण हुए थे । अंश और अंशी में अभेद होना स्वाभाविक है ॥१२६॥

मुखोल्लास-दोहा

ललिता कच्छप मूर्ति कौ, धरत ध्यान चित लाय ।
सोई वरनत हंस सों, कहन कृष्ण प्रति जाय ॥१२६॥

मूल की भाषा पद्य—छन्द गीतिका

हे हरि ! विलोकि विलास देहाभास मूरति रावरी ।
यह अल्पमति राधा परम अभिलाष क्रीड़ा सों भरी ॥
आई तुम्हारे निकट तुम निज अंग अन्तर्हित किये ।
प्रकटत कठिनता, उचित का नहिँ कमठ की उपमा दिये ॥१२६॥

सारांश-सोरठा

कच्छप पीठ दिखाय सकल अंग ढम्पित करत ।
त्यौं हरि मथुरा जाय हम सों दीनी पीठ तुम ॥१२६॥

००००

सदा कंसाराते ! स्फुरति चिरमद्यापि भवतः
स्फुटं क्रोडाकारे वपुषि निविडप्रेमलहरी ।

यतः सा सैरिन्ध्री मलयरुहपङ्कप्रणयिनी
त्वया क्रोडी-चक्रे परमरभसादात्मदयिता ॥१३०॥

टीका—सैरिन्ध्रया मलयपंकलम्पटया वराहमूर्त्युचितां चरित्रमाह सदेति। हे कंसाराते ! स्फुटं व्यक्तं अद्यापि क्रोडाकारे शूकराकारे भवतश्चिरं निविडप्रेमलहरी सदा स्फुरति दीप्यते। शूकरदेहे स्नेहाधिक्यमद्यापि तवेत्यर्थः। तत्र हेतुमाह—यतः सा प्रसिद्धा सैरिन्ध्री मलयरुहपङ्कप्रणयिनी चन्दनपंकदानेन प्रणयिनी प्रेमयुक्ता आत्मनस्तव दयिता पत्नी सती, तया सह परमरभसात् परमहर्षात् क्रोडीचक्रे, अत्र तया क्रीडांचक्रे इति क्रीडास्थानं चक्रे इत्यर्थः। अभूततद्भावे च्वि अनन्तादि च, "पुमान् क्रोडा उद्यानमित्यमरः"। इतर—सामान्यव्यावृत्तये आह आत्मदयितेति, आत्मनो मनसि अतिप्रिया यद्वा प्रणयिनी-शब्देन सहार्थे तृतीयातत्पुरुषः। अयंभावः—वराहपत्तनिवहेष्विति लम्पटः त्वमपि चन्दनदानमात्रेण कुब्जामपि स्त्रियमकरोः अतो वराहमूर्त्तेरितिवत् प्रेमविलसितमिति उपहासगर्भविचक्षणता सूचिता च, तत् सहजवैदग्ध्य—सौन्दर्ययुक्तानस्मान् त्यक्त्वा त्रिवक्रायां चन्दनमात्रस्य दानेनासक्तहृदयत्वात्। "क्रोडी भूदारमित्यमरः" ॥१३०॥

अनु०—हे कंस निकन्दन ! आज भी आपके (पूर्व काल में) वराह वपुधारी शरीर में बहुत काल व्यापी वह प्रेम-तरङ्ग दिखाई पड़ती है क्योंकि, तभी तो आपने अब अत्यन्त आनन्द पूर्वक चन्दन-कर्पूरादि लेप-कारिणी प्रेमवती उस कुब्जादासी को निज प्रियतमा जानकर उसे अपने अङ्क में धारण कर लिया है। इस पद्य में प्रणयाभियोग व्यञ्जित है। जैसे वराह (क्रोड) वपुधारी आपके दन्ताग्र में चन्द्र में कलङ्क वत् धरित्री विराजमान है वैसे ही यहाँ क्रोड (अंक) में कुब्जा विराजमान है ॥१३०॥

मुखोल्लास-दोहा

प्रकट रूप वाराह ह्वै, लियौ विष्णु अवतार।
सो ललिता श्री कृष्ण सों, वर्णन करत उदार ॥१३०॥

मूल की भाषा पद्य—छन्द गीतिका

हे कृष्ण! काल अनादि तें वह रमा लहरी नेह में।
है आज लौं चिरकाल तें सन्दीप्त शूकर देह में॥
अब मलय चन्दन लिये कुब्जा आप निज अंकहि धरी।
जिमि चंचला चंदन वती वाराह प्रभु स्वीकृत करी ॥१३०॥

सारांश—सोरठा

लियौ क्रोड अवतार संग उदित लक्ष्मी रही।
अब श्री कृष्ण उदार आप क्रोड कुब्जा करी॥१३०॥

○○○○

चिरादन्तर्भूता नरहरिमयी मूर्त्तिरभित-
स्तदीयो व्यापारस्तव तु न ययौ विस्मृतिपथम्।
विनीतप्रह्लादस्त्वमिह परमक्रूरचरिते
प्रसक्तो यद्भूयः परहृदयभेदं जनयसि ॥१३१॥

टीका—विरहवेदनाज्वलनेन परहृदयभेदकत्वात् नृसिंहमूर्त्तिविलसित-माह—चिरादिति। तव नरहरिमयिमूर्त्तिशरात् चिरकालं व्याप्य अन्तर्भूतापि अभितः सर्वतः त्वदीयो नृसिंहमूर्त्तिसम्बन्धिव्यापारः चेष्टा विस्मृतिपथं न ययौ। यत् यस्मात् भूयः प्रचुरं यथा स्यात् परहृदयभेदं परहृदयस्य विदारं जनयसि, त्वं कीदृक् विनीतेति—इह व्रजे विनीतः खण्डितः प्रह्लादचित्तामोदः, पुनः कीदृक् परमेति परमक्रूराणां अति-निर्दयानां चरिते शीले प्रसक्तः आसक्तः इति क्रूर इत्यर्थः। यद्वा परं केवलं अक्रूरस्य चरिते आसक्तः। अक्रूरो हि भवन्तमितो नीत्वा अस्माकं

परमद्रोहपर: त्वमपि परमदुःखद:,नरहरेरपि विनीतो नम्र: प्रल्हादो दैत्य-पुत्रो यस्मिन्,यद्वा विनीतो राज्यकरणोपदेशेन शिक्षित: प्रल्हादो येन स:, सोऽपि परमनिर्दयचेष्टित: अतिकोपेन शीलत्वात् हृदयं विदार्य तद्रक्त-पानाच्च परमशत्रो: हिरण्यकशिपो: हृदयस्य भेदं विदारं अजनयत्। शस्त्रास्त्रेण मरणाभावबरदानात् नखेनैव विददारेति पौराणिकी वार्त्ता ॥१३१॥

अनु०—चिरकाल पूर्व धारण की हुई नृसिंहमूर्ति आज भी आपके मन में विद्यमान है, क्योंकि, उस अवतार के समय जो कार्य आपने किए थे उस कार्य को आज भी आप नहीं भूल सके हो। वह विनीत प्रल्हाद, जिसे आपने अपने चरण कमलों में आश्रय दिया था, पक्ष में-विदूर किया प्रल्हाद (हमारा आनन्द) जो कि, विरह के प्रचुर-दुःख के कारण दूर हो चुका है। क्योंकि, भक्तों के उद्धार विषय में एवं हम लोगों को विरह का दुःख देने में आप परम अक्रूर-चरित हो (परम-अत्यन्त, अक्रूर-क्रूरता रहित अर्थात् सदय है हृदय जिनका, ऐसे अर्थात् भक्त-वत्सल-चरित हो) पक्ष में-परम क्रूर कहिए निष्ठुर-चरित युक्त हो क्योंकि हम लोगों को विरह दुःख देने से अकरूण हो। बार बार पर हृदय भेदन करते हो। पर-शत्रु का हृदय, हिरण्यकशिपु आदि का पक्ष में-हम लोगों के साथ परों, अन्यों के समान व्यवहार करते हो ॥१३१॥

मुखोल्लास—दोहा

अब नृसिंह के चरित की, ललिता समता देत।
कृष्णचन्द्र सों कहन हित, हंसहि करत सचेत ॥१३१॥

मूल की भाषा पद्य—छन्द गीतिका

प्रथम नृसिंह पक्ष में—

सब ओर तें वह मूर्त्ति नर हरि बहु दिनन तें आप की।
ह्वै गयी अन्तर्धान पै नहिं गयी सुधि परताप की॥

कीनी हिरनकश्यप तनय प्रह्लाद ऊपर नम्रता ।
निज नखनि उदर विदारि मारयौ क्रोध करि ताकौ पिता ॥१३

द्वितीय श्रीकृष्ण पक्ष में—

बहु दूर कीनौ हर्ष तुन नें हरे सुख अबलान के।
केवल वचन अक्रूर के सों भये दाता म्लान के॥
मथुरा पधारे त्यागि गोकुल यों विदीरण उर ठयौ।
श्रीकृष्ण रूप नृसिंह पुनि पुनि चरित दुख दायक भयौ॥१३

सारांश—सोरठा

नर हरि जन अनुराग उदर विदारयौ असुर कौ।
करि हरि व्रज कौ त्याग उर विदीर्ण कीने अमित॥१३१॥

००८०

यदात्मानं दर्पादगणितगुरुर्वामन ! मुदा
मनोराज्येनाढ्यं त्वयि वलितया कल्पितवती।
प्रपेदे तस्येदं फलमुचितमेव प्रियसखी
त्रिदूरे यत् क्षिप्ता प्रणयमयपाशे निगडिता ॥१३२॥

टीका—वामनावतारविलसितमाह । हे वामन ! त्रिविक्रम ! यत् यस्मात् प्रियसखी वलितया वलिवाभावेन त्वयि त्वद्विषयेन मुदा हर्षेण दर्पात् मदात् अगणितगुरुः सती आत्मनः कल्पितवती समर्पितवती इत्यर्थः । न गणिता न प्रमाणीकृताः गुरवः श्वश्र्वाद्यो यया सा, तेषां वचनमतिक्रम्यापि त्वयि समर्पितात्मत्वात् । वलिरपि दर्पात् "अहमपि तथावादी मद्वचनं कथमन्यथा स्यादिति" दर्पादगणितः गुरुः शुक्रो येन तद्वचनेन निवर्त्तनादगणयन् एवंभूतः सन् तृतीयपदार्पणायात्मानं समर्पितवान्, कीदृशमात्मानं मनोराज्येनाढ्यं मनसो राज्येनाढ्यं मनसो राज्यं प्रभुत्वं स्वातन्त्र्यमिति यावत् तेनाढ्यं युक्तं निजमनसैव उद्गम्यमानात् स्वातन्त्र्यम् । वलिपक्षे मनोः स्वायम्भुवो मनो राज्येन राज्यत्वेन

आढ्यम् । यथा स्वयम्भुवेनाखण्डवसुन्धरादिसुराज्यत्वमकरोत् तथैवे-त्यनेन सार्वभौमत्वं सूचितम् । यांश्यनेव फलं प्रपेदे आप्तवती, किं तदित्याह यत् यस्मात् प्रणयमयपाशे प्रेममयपाशे निगडिता बद्धा विदूरे अतिदूरे क्षिप्ता त्वया इत्यर्थः । बलिरपि ममस्तद्दानेन सहितं वामनाया-द्वात् पश्चात् तेन वामनेन निगडेण बन्ध्वा पाताले निक्षिप्तः । अतः तावद्वामनावतारकृतचरित्रमेव, राधा बलितुल्या अथच राधा बलितया मुदा प्रवर्द्धमानेन हर्षेणेत्यर्थः । "अन्दुको निगडोऽस्त्री स्यादित्यमरः" । निगडितेति नाम निजन्तत्वात् कर्मणि क्तः ॥१२२॥

अनु०—हे वामन ! हमारी सखी राधा अपने को प्रेम-बलवती समझ कर (पक्ष में–बलितया-विरोचन पुत्र, राजा बलि के सदृश) दर्प वश कि, यह कृष्ण मेरे ही हैं, इस प्रकार प्रेमोत्थ ममता के अभिमान वश नहीं माने हैं गुरु जन, सास-ननद तथा बलि पक्ष में—गुरु शुक्राचार्य आदि जिसने ऐसी, अपने संकल्प के अनुरूप कार्य करने वाले मन रूप राज्य में तुम्हारे साथ प्रेमरूपी नाट्य करके अर्थात् अनुगामिनी होकर तुम्हारे सब मनोभिलाषों को पूरी करती रही थी । उस नाट्य का उसने उचित ही प्रतिफल पाया है जो विपत्ति रूप पाशों से जकड़ी जाकर आजकल आप से दूर पड़ी हुई दुःख पा रही है । इस श्लोक में शब्दार्थ में श्लेष स्पष्ट है । जैसे विरोचन तनय राजा बलि ने दर्पवश अपने गुरु शुक्राचार्य का उपदेश न मानकर, कपट रूप वामन के लिए तीन पैंड भूमि दे दी थी और पाताल में जाकर दुःख पाया था उसी तरह मेरी सखी राधा अपने गुरु जनों के उपदेश की अवहेलना कर आपके प्रेम प्रवाह में अपने को तृणवत् मान जो महा विरह-व्यथा उठा रही है वह उचित ही है । क्योंकि आप अपने वामनावतार में प्रदर्शित किए महा दैन्य, भय एवं कपट को आज तक नहीं भूल सके हो ॥१२२॥

मुखोल्लास–दोहा

वामन जी कौ चरित शुभ, घटत आप पर आय।
हंस सपदि या भांति तुम, कहौ कृष्ण सों जाय ॥१३२॥

मूल की भाषा पद्य–छप्पय

हे वामन अवतार कृष्ण ! जा दर्प भुलाने।
राधा नें निज गुरु पितादि के बचन न माने॥
असुर भाव सों दृढ़, प्रसन्न मन राज्य लुभायौ।
देत भई निज देह प्रिय सखी, फल यह पायौ॥
यह व्यसन रूप बंधन परी वहु दूर करी या काल में।
तुम बाँध्यौ बलि छल नेम सों पुनि पठयौ पाताल में ॥१३२॥

सारांश–सोरठा

बलि पठयौ पाताल माने नहिँ निज गुरु वचन।
तिमि राधा व्रजपाल करी आप नें दूर बहु ॥१३२॥

○○○○

इयं नाथ ! क्रूरा भृगुपतनमाकाङ्क्षति ततो
यदस्यां काठिन्यं तव समुचितं तद्भृगुपते !।
असौ ते दुर्वोधा कृतिरिह भवद्विस्मृतिपथं
यतो जातः साक्षाद्गुरुरपि स नन्दीश्वरपतिः ॥१३३॥

टीका—परशुरामस्य चेष्टितं वर्णयति—हे नाथ ! स्वामिन् ! इयं कोपना भृगुपतनं परशुरामनिवासस्थानं भृगुपतनाख्यं नगरं तं राजधानीं कर्त्तुम् इच्छति, अत्र वीरचेष्टया क्रूरत्वं, अतः तस्मात् भृगुपते: तव अस्यां यत्काठिन्यं क्रूरत्वं तत् समुचितं न्याय्यमेव। क्रोधदृष्ट्या हि आक्रमणकारिणं निवार्यते। इयं तव कृतिः चेष्टा दुर्वोधा. जनैरगम्या इत्यर्थः। सा का तदाह—साक्षाद्गुरुरपि स नन्दीश्वरपतिः नन्दी च ईश्वरी पार्वती च तयोर्पतिः शिव इत्यर्थः यतो यस्मात् भवद्विस्मृतिपथं जातः, परशुरामरूपधारिणः तव विस्मरणपथं प्राप्तः।

गुरूरूपिणः शिवस्य तस्य अतिप्रियकरधनुः रक्षणे असमर्थत्वात् भवान् तदा निरादरो जातः । रामचन्द्रेण शिवधनुः खण्डितमिति प्रसिद्धिः । अथच—हे स्वामिन् ! इयं राधा क्रूरा तव विरहे हिताहितविवेकरहिता सती भृगुपतनं गोवर्द्धनपर्व्वतादुपतनं आत्मविनाशार्थमित्यर्थः आकाङ्क्षति अभिलषति । ततस्तस्मात् हे भृगुपते ! गोवर्द्धननाथ ! अस्यां अनिष्टकारिण्यां निजदेहनाशाभिलाषिण्यामित्यर्थः राधायां तव काठिन्यं निर्द्दयत्वं समुचितं किं नैवेत्यर्थः । अतः भृगुपतनात् पूर्व्वं अत्रे आगत्य अभयदानेन विरहपीडाविनाशेन वा तां प्रीणय । तव इयं कृति चेष्टा अगम्या निन्दनीया इति यावत्, का सा तदाह साक्षात् गुरुरपि पितापि स नन्दीश्वरपतिः नन्दीश्वरपर्व्वतस्य नगरस्य वा पालकः व्रजराज इत्यर्थः भवता कर्त्तृकेण विस्मृतिपथं विस्मरणपथं प्राप्तः । भवान् मथुराराज्यं प्राप्तः सं पितरं व्रजराजं विस्मृतवान्" ॥१२३॥

अनु०—हे यदुनाथ ! यह हमारी सखी राधा, अपने देह के प्रति निष्ठुर-हृदया होकर भृगु अर्थात् पर्वत के उच्च भाग से पतन का निश्चय कर स्वदेह को नष्ट किया चाहती है और आपने इसे अपने मथुरा प्रवास के कारण, विरह-वेदना रूप जो कठोर दण्ड दे रक्खा है वह भी आपके परशुराम अवतार के अनुरूप ही है और आप की यह आकृति भी दुर्बोध ही है क्योंकि बाहर से सुकुमार त्रिभुवन मोहन तनु एवं अन्तर में परम क्रोधी भृगुपति का गुण धर्म अद्यापि विद्यमान है। यही तो कारण है कि आप अपने परम-वात्सल्य मूर्त्ति, अनादि-सिद्ध पिता उन बूढ़े नन्दराज जी को (जो आज आपके वियोग से क्रन्दन करते २ नेत्र विहीन से हो गए हैं) उन्हें बिसार बैठे हैं। फिर हमारी सखी राधा की तो बात ही क्या है ? यह तुम्हारी वाह्य आकृति देखकर तो तुम्हारे हृदय की कठोरता नहीं जानी जा सकती। ऐसी आश्चर्य-जनक बात तो हमने स्वप्न में भी नहीं सुनी है। पद्य में भृगुपति

शब्द कहने से श्लेष में पर्वत सदृश कठोरता ध्वनित है। जैसे भृगुपति ने धरित्री को क्षत्रिय विहीन कर दिया था वैसे तुम चरण कमलावलम्बी, विरह-दुःखार्णव में डूबे हुए इस गोकुल आप प्राणि शून्य करने पर उद्यत हुए है ॥१३३॥

मुखोल्लास—दोहा

अब वरनत श्रीकृष्ण कों, परशुराम अवतार।
ललिता ताकों हंस के, करत हृदय निरधार ॥१३३॥

मूल की भाषा पद्य—छप्पय

प्रथम परशुरामावतार पक्ष में—

अहो कृष्ण! यह क्रूरा, दुसह वियोग दुखारी।
भृगु गिरि तें गिरि वे की जानें इच्छा धारी॥
तातें हे भृगु पते रावरी यह कठिनाई।
मेरी सखि राधा पै सब ही भाँति दृढ़ाई॥
ये भृगु रामाक्रांन्ति आप की दुर्बोधा दारुण गती।
गुरु धनुर्वेद उपदेष्टा शिव सों भइ विस्मरण मती ॥१३३

द्वितीय कृष्ण पक्ष में—

हे हरि यह राधा वियोग दुख दुसह सहारत।
ऊंचे गिरि तें गिरिबे की इच्छा उर धारत॥
हे गोवर्द्धन पते करत या पै कठिनाई।
नहिँ जानत परिणाम काज अपकार भलाई॥
शुभ नन्दीश्वर पति पथ विमल विसरायौ भ्रम सों यदा।
गिरि गोवर्द्धन के निकट जो ताकी सुधि कीजै कदा ॥१३

सारांश—सोरठा

भृगुपति कीन्हे त्याग निज गुरु शिव के वचन जिमि।
नन्दीपति अनुराग तिमि विसरायौ आप हरि ॥१३

○○○○

निरानन्दा गावश्चिरमुपसृता दूषणाकुलैः
खरायन्ते सद्यो रघुतिलक ! गोवर्द्धनतटाः ।
विराधत्वं घोषो व्रजति भवदीयप्रवसना-
दिदानीं मारीच स्फुटमिह नरीनर्त्ति परितः ॥१३४॥

टीका—रामविलसितमाह निरानन्दा इति । हे रघुकुलतिलक ! सार ! दूषणाकुलैः दोषसमूहैः चिरमुपसृता व्याप्ता निरानन्दाजाता: सतत-व्याधिव्याप्तत्वात् अथच दूषणो राक्षसभेदः श्रीरामेण व्यापादित: तत्स्वामिकैः कुलैः राक्षसगणैः तद्गोत्रैर्वा गोवर्द्धनस्था: तटा: खरायन्ते, इदानीं नवनवतृणपल्लवादीनां अजायमानत्वात् रूक्षाः भवन्ति ; अथच खरो रावणभ्राता तद्वदाचरन्ति, अतिभयानकत्वात् । आभीरपल्ली भवदीय प्रवसनादिदानीं विबाधत्वं व्रजति, विशिष्टा बाधा पीडा यत्र, त्वया विना विघ्नकरणाभावात् । विवाध इति रेफमध्यपाठे विगलितामृत-प्रायत्वात् बाधा यस्मात् स तस्य भाव:, बाधाशून्यत्वं यातीत्यर्थ: । विगतो बाधो वर्द्धनं यस्य तत्त्वं, बाधवृद्धाविति धातु:, विराधशब्द: रेफवकारमध्यतायाः सर्व्वैव विकल्पितत्वात् क्षयिष्णुर्जात इत्यर्थ: । स्फुटं व्यक्तम्, इदानीं मारीच: राक्षसभेद: परितो नरीनर्त्ति भृशं नृत्यति अति-शयेन प्रवृत्तत्वात् भृशं नृत्यति । मारीचो रावणानुचर: अथच मारीचो भेदनो रात्रौ, निभेदः भूताध्यक्ष:, यद्वा च शब्द: समुच्चये इह प्रजामारी मारक: सर्व्वतो जनमरणं नरीनर्त्ति अतिशयेन प्रवृत्तत्वात् नृत्यं करोति, रकारादियुक्त इत्यादिना रिमसलुक् । "मारीच राक्षसभेदे कक्कोलके याचके द्विपे । मारीचो देवताभेदे इति विश्व:" । अत्र श्लोके अन्यथा-सोल्लुण्ठशब्दतो वेनकोपव्यञ्जनाभावात् इह त्वत् स्वामिके व्रजे पुनरपि राक्षसपीडामनालोच्य कथं निश्चिन्तोऽसीति भाव: ॥१३४॥

अनु०—हे रघु तिलक ! यहां व्रज की धेनु अमंगलों से पीडित हो निरानन्द हो रही हैं और ये गोवर्धन-सानु प्रदेश तुम्हारी स्मृति

उद्दीपन कर तीक्ष्ण बाणों के समान प्रतीत होते हैं। अर्थात् इन स्थलों के दर्शन मात्र से हृदय-व्यथित हो उठता है, तुम्हारे मथुरा प्रस्थान करने के कारण इस बार यह गोकुल राधा से शून्य हो जायगा क्योंकि उसकी मरण दशा निकट है। इस समय यह वृन्दावन-महामारी की तरह ताप-प्रद होरहा है। तुम्हारा विरह मानों मूर्तिमान हो यहाँ ताण्डव कर रहा है। तात्पर्य यह कि. जब तक आप ब्रजमें थे तब तक महाविरह यहाँ आनेको समर्थ नहीं था अब तुम्हारी अनुपस्थितिमें उल्लास सह वह नृत्य कर रहा है अतः शीघ्र आकर हमारी रक्षा करो। पक्षान्तर में-हे रघुवंश विभूषण! पृथ्वी के सब प्रदेश राक्षसों से उपद्रुत्त हैं, ये गोवर्धन शिखर भीम काय राक्षसों सदृश दीख पड़ते हैं तुम्हारे मथुरा गमन से गोकुल राक्षसो सा डरावना प्रतीत होता है। अब इस वृन्दावन में ताड़का राक्षसी पुत्र मारीच मानों चहुँ दिस से भयानक नृत्य सा कर रहा है। इस कारण तुम शीघ्र यहाँ आगमन करौ। रामावतार में जैसे मारीच राक्षस का बध किया था वैसे ही इसके हाथ से हमको परित्राण करो ॥१३४॥

मुखोल्लास–दोहा

अब उपमा श्री कृष्ण कों, देत राम अवतार।
ललिता तिनके हंस सों, बरनत चरित उदार ॥१३४॥

मूल की भाषा पद्य–छप्पय

श्री रामचन्द्र पक्ष में—

हे रघुवर बन गमन आपके सों इन्द्रियगन।
बहुत काल तें निरानन्द दूषण कुल सब तन॥
गोवर्द्धन तट भूमि सपदि खर सम यह दरसत।
ब्रज बिराध मय भयौ मनहुँ प्राणिन कों गरसत॥

अब वृन्दावन की भूमि में नृत्य करत मारीच है।
कहु रहैं प्राण का बिधि प्रभो! चहुँ दिशि दीखत मीचहै।।१२४।

श्रीकृष्ण पक्ष में छप्पय—

हे हरि! मथुरा गमन आपके गायन के गन।
बहुत काल तें निरानन्द दूषण बहु रुज तन।।
गोवर्द्धन नट भूमि लगत खर कठिन खरी सी।
भौ विराध ब्रज नहिँ राधा तहँ मोद भरी सी।।
अब या वृन्दावन भूमि में नृत्य करत मारीच है।
यह प्रकट मरीचिन तें भयौ मृगतृष्णावत नीच है।।१२४।।

सारांश—सोरठा

हैं खरादि दुख खानि कृष्ण! आपके विरह में।
मारि इनहिँ सुख दानि रघुवर सम दीजै दरस।।१२४।।

००००

प्रसन्नः कालोऽयं पुनरुदयितुं रासभजनै-
र्विलासिन्नद्यापि स्फुटमनपराधा वयमपि।
वितन्वानः कान्तिं वपुषि शरदाकाशवलितां
कुतो न त्वं सीरध्वज! भजसि वृन्दावनमिदम्।।१२५

टीका—बलभद्रतां तस्यैवेत्याविश्याह प्रसन्न इति। हे सीरध्वज! हे बलदेव! रासभजनैः रासक्रीडानुभवहेतुभिः करणैः वां पुनरुदयितुं कुतो हेतोरिदं वृन्दावनं न भजसि नाश्रयसि। यतोऽयं कालः प्रसन्न उदययोग्यः। ननु इदानीं यूयं सापराधं अन्यसंसर्गदूषितत्वात् कुतः पुनरस्मदुदयस्तत्र सम्भवतु इति चेत्तत्राह—हे विलासिन्! विलासकारिन् स्फुटं व्यक्तं अद्यापि वयमपि अनपराधाः अनवद्याः भवतो ध्यानाशक्ततयाऽन्यसंसर्गत्यागात्। अथ च रासभाः खररूपा दैत्याः त एव जनाः,यद्वा रासभस्य धेनुकासुरस्य जनाः पुनरुदयितुं उद्यमकर्त्तुं,अयं समयः प्रसन्नः

प्राप्तप्रायः, प्रपन्न इति पाठे प्राप्त इत्यर्थः। उभयपक्षेऽपि तुल्यम्। किं कुर्व्वन् नवपुरुषकान्ति दीप्तिं वितन्वानः, कीदृशीं शरदाकाशवलितां शरत् कालीनं यदाकाशं तद्वलितां यस्यां। यद्यपि "खड्गश्याममाकाशमिति" तार्किकन्याये आकाशस्य श्यामता ते वर्ण्यते नैषधीयेऽपि "कषपाषाणनिभे नभस्तले इति" दृश्यते तथा सति गौरदेह—बलरामस्योपमानघटात् इति शरत्कालीनजलदपटलधवलितया आकाशं लक्षणया बोद्धव्यम्। किञ्च "दधिधवलमाकाशमिति" मीमांसका वर्णयन्तीति पद्मसिंहः तन्मतेऽभिधेयं, यद्वा शरदा हेतुभूतया काशवलितां काशपुष्पवत् वलितां स्फीतां नित्यापेक्षत्वात् सम्बन्धः। अस्मिन् श्लोके निरपराधस्त्रीपरित्यागेन निन्दा भवत इति कटाक्षितम् ॥१२५॥

अनु०—हे लीला विलासी हलधर ! अब-आपकी रासक्रीडा करने का समुचित समय पुन आ पहोंचा है। अभी तक हम लोग राधारहित नहीं हुए हैं अर्थात् राधा जो रासलीला का प्रधान कारण है, अभी तक किसी रूप से अपने प्राण धारण किए हुए है। अथवा हम लोग निरपराध रूप में विद्यमान हैं, अतः शरत्कालीन शुभ्र-स्वच्छ आकाश के समान शरीर की कान्ति धारण कर आप बृन्दावन में क्यों नही आगमन करते हैं। श्री बलदेव के रूप में आपने ब्रज में कितनी लीलायें की है, अब रास लीला का समय आ पहोंचा है फिर क्यों उदासीन होकर मथुरा पुरी में निवास कर रहे हो ॥१२५॥

मुखोल्लास—दोहा

अब हलधर अवतार की, कृष्णहि उपमा देत।
ललिता रोचक कथा कहि, हंसहि करत सचेत ॥१२५॥

मूल की भाषा पद्य-गीतिका

श्री हलधर पक्ष में—

एहो विलास निधान हलधर ! तुम सकुल रासभ हन्यौ।

मारौ असुर या काल, पै अपराध बिनु हम, हिय गन्यौ ॥
गौराङ्ग शरदा कास आभा आप सीरध्वज ! लसैं।
अब आय खल दल नासि के प्रभु ! क्यों न वृन्दावन बसैं।१३५॥

श्री कृष्ण पक्ष में—

एहो विलासी कृष्ण ! क्रीड़ा रास कों उपजावते।
कीजै प्रकाशित रूप निज या काल समुचित भावते॥
हम सकल निर अपराधिनी, हे लकुट धारी ! जो रहीं।
तुम शरद नभ सम श्याम ! वृन्दा विपिनि आवत क्यों नहीं।१३५॥

सारांश—सोरठा

बड़े भ्रातृ गण मन्द ब्रज में धेनुक असुर के।
आय यहाँ ब्रज चन्द इनहिं नाश कीजै प्रभो॥१३५॥

○○○○

न रागं सर्वज्ञ ! क्वचिदपि विधत्ते रतिपतिं
मुहुर्द्वेष्टि द्रोहं कलयति बलादिष्टविधये।
चिरं ध्यानासक्ता निवसति सदा सौगतरति-
स्तथाप्यस्यां हंहो सदयहृदय त्वं न दयसे॥१३६॥

टीका—बुद्धं निर्दिशति, मार्गपरायणायां बुद्धस्य तु तव दयात्यागोऽनुचित इत्याह न रागमिति। हे सर्वज्ञ ! सर्वसाक्षिन् ! अथ च हे बुद्ध ! इयं क्वचिदपि समये रागमनुरागं न विधत्ते न करोति, रतिपतिं कामं मुहुर्द्वेष्टि नाभिनन्दयति, इष्टविधानाय बलादपि द्रोहं कलयति, अभिलाषितद्रव्याणां यत्नात् परिकल्पितानामपि चन्दननलिनीदानादीनां हठात् परित्यागात् चिरं ध्यानासक्ता तव भावना परा निवसति, सदा असौ प्राणवायोः निरपेक्षा, यद्वा असौ राधा सदा गतरतिः विगतसुखसम्वेदना, अथच सदा सौगतरतिः, सुगतो बुद्धस्तस्य चरित्रं सौगतं तत्र रति र्यस्याः, बुद्धदर्शितमार्गपरेत्यर्थः। हं हो विस्मये हे सदयहृदय !

तथापि प्रथमान्तपाठे सदयहृदयः स त्वं अस्यां न दधसे इमां नानुगृह्णासि, बुद्धोऽपि अनासक्तचित्तत्वात् क्वचिदपि विषये रागं न करोति, रागमनुरागं मात्सर्य्यं चेति, सर्व्वत्र समदर्शितत्वात् इष्टविधे दीक्षितोऽग्निष्टोमीयं पशुमालभतेत्यादि, अत्र बलात् निजज्ञानादरात् द्रोहं हिंसां कलयति करोति । यज्ञीयपशुहिंसाप्यधर्म्मजनिता हिंसावत् इत्यनुमानबलात् । अग्निष्टोमादीनां निरासेन सोऽपि चिरं ध्यानासक्तः अबहिर्मतित्वात् । असौ प्राणे गतरतिः प्राणप्रियद्रव्याणां परित्यागात्, यद्वा संज्ञा असौ खड्गे गतरतिस्त्यक्तरतिः सततहिंसापरत्वेनाहिंसासाधनद्रव्यस्य ग्रहणात्, अस्मिन्मते लक्षणया असि पदं शस्त्राणि लक्षयति, सदयो हिंसाखण्डनात्, रतिपतिमित्यत्र द्विषे बलाभिनन्दनार्थत्वेन कोपाभावात् न सम्प्रदानं, इष्टविषये इत्यत्र तु क्रुधद्रुह इत्यादिना सम्प्रदानसंज्ञायां चतुर्थी । अस्या इति कर्म्मणो वा दयादेरिति कर्म्मणि षष्ठी, "रागोऽनुराग—मात्सर्य्ये क्लेशादौ लोहितादिषु । गान्धारादौ नृपे रागे" इति विश्वः । "रतिः श्री-स्मर-दारेषु रागे सुरतगुह्ययोरिति" मेदिनी ॥१३६॥

अनु०—हे सर्वज्ञ बुद्ध ! हमारी सखी राधा का अब संसार के किसी भी विषय में राग (आसक्ति) नहीं रहा है अर्थात् इसकी आहार-विहार एवं जीवन धारण में भी आसक्ति नहीं दिखलाई पड़ती है । वह काम के प्रति बार-बार द्वेष करती है क्योंकि, वही श्रीकृष्ण के विरह का मूल है इसलिए उसे भी वह शत्रु के समान समझती है और वह अभीष्ट वस्तु चन्दन-माल्य आदि को दूर से ही परित्याग कर चुकी है, सकल विषयों में वीतराग होकर दीर्घ काल तक निरन्तर आप के ही ध्यान में मग्न रही आती है तथापि कैसा आश्चर्य है कि, आपके करुणापूर्ण हृदय में इसके प्रति किंचित् भी दया का सञ्चार नहीं होता ? आपकी समदर्शी स्वभाव है और हमारी सखी दया का पात्र है । यही इस श्लोक से

ध्वनित है-आपने बुद्धावतार धारण कर जड़ विषयक आसक्ति त्यागी है नारी दर्शन की अभिलाषा भी नहीं थी क्योंकि यही संसार दुःखों का मूल है । निर्वाण प्राप्ति रूप अभीष्ट कार्य में द्रोह अर्थात् वासनाओं से विद्वेष को अनुभव करते, और वीतराग होकर बोधि वृक्षतल-देश में ध्यान-मग्न विराजते, विश्व की मङ्गल कामना कर करुणा-घन मूर्त्ति धारण करते, तथा यज्ञादि में पशु हिंसा देखकर अपनी ही आज्ञास्वरूप वेद के विरुद्ध वाद में प्रवृत्त होते हो एवं यज्ञ-विधायक वेद वाक्यों की निन्दा करते हो फिर क्या कारण है कि, जो केवल आपको ही जीवन-प्राण मान बैठे हैं ऐसे स्वजनों का विरह में प्राण प्रयाण हो रहा है तथापि आप पाषाण-हृदय होकर मथुरा में निवास कर रहे हैं ॥१२६॥

मुखोल्लास-दोहा

अब ललिता श्रीकृष्ण कों, वरनत बुद्ध स्वरूप ।
सो समझावति हंस कों, यथा शक्ति तद्रूप ॥१२६॥

मूल की भाषा पद्य-छप्पय

बुद्ध पक्ष में—

हे सब विषयन के ज्ञाता श्री बुद्ध देव वर ।
सौगतरत यह राधा सदा आप में तत्पर ॥
काहू सों अनुराग न, जीतीं सब इन्द्रिय गन ।
द्वेष काम सों हठ करि द्रोह करति पूजा सन ॥
पुनि बहुत काल लगि रहति है ध्यान मग्न सोचति विभो !
हे सदय हृदय लावत न क्यों आप दया या पर प्रभो ! ॥१२६॥

श्रीकृष्ण पक्ष में—

हे सब विषयन के ज्ञाता श्रीकृष्णचन्द्र वर ।
राधा रहति विगत रति त्यागें प्रीति निरन्तर ॥

विरह रावरे में मानत विरोध मनमथ सों।
हठ करि राखत द्रोह नहीं रुचि इच्छा पथ सों॥
अब मोहि कहा कर्त्तव्य है चिर लौं यह चिन्ता धरत।
हे सदय हृदय सन्तत प्रभो क्यों न दया या पर करत ॥१३२॥

सारांश—सोरठा

धार्‌यौ वृद्ध शरीर सदय हृदय प्रभु आप ने।
राधा विरह अधीर क्यों न करत या पै दया ॥१३६॥

००००

परिक्लेशम्लेच्छान् समदमधुपालीमधुरया
निकृन्तन्नेत्रान्तप्रणयकलिकाखड्गलतया।
त्वमासीनः कल्किन्निह चतुरगोपाहितरतिः
सदेशं कुर्वीथाः प्रतिमुदित धीराधिकमिदम् ॥१३७॥

टीका—इह कल्किचरितं प्रकटयन्नाह परीत्यादि। हे कल्किन् त्वं इहापन्नः प्राप्तः सन् नेत्रान्तप्रणयकलिका खड्गलतया परिक्लेशम्लेच्छान् परितः क्लेशा येभ्यः ते च म्लेच्छाश्चेति तान् निकृन्तन् छिन्दन् इदं स्थानं धीराधिकं कुर्वीथाः धीरा अधिकाः यत्र तथा कुरु। यद्वा म्लेच्छान्निकृन्तन् परिक्लेशं कदर्थय, धातोरनेकार्थत्वात्। "क्लिश व्यक्तायां वाची"त्यस्य कदर्थनार्थता, आत्मनेपदस्य क्वचिदनित्यत्वात् परस्मैपदम्। हे प्रतिमुदित !, यद्वा प्रतिमुदिता म्लेच्छनाशेन हृष्टा धीरा अधिका यत्र, नेत्रान्तेन प्रणयकोपो यस्याः "बहुव्रीहौ कः" सा चासौ खड्गलता चेति तया, सपत्न्यादेशाकृतिगणत्वस्वीकारात् पुंवद्भावाभावः, रत्नावली सिरांसि स्थितेतिवत्, नेत्रान्तेन प्रणयस्य खड्गस्य अङ्गीकृत्य रणे तत्र क्षुधाविस्फुरणात्, त्वं कीदृशः तुरगोपाहितरतिः तुरगेऽश्वे उपाहिता अर्पिता रतिरनुरागो येन सः, इदं कीदृश सदेशं सदा ईशः शिवो यत्र तत्, अतिपुण्यक्षेत्रत्वात् इदं स्थानं शिवो न त्यजति, धीरा वास्तु

म्लेच्छभयात् पलायिता इति भावः । हे प्रतिमुदितधीर इदं स्थानं अधिकं यथा स्यात्तथा सदेशं समीपं कुरु । एतेन सदैवात्र तिष्ठेत्युक्तम्। अथच हे चतुरकल्किन् इदं स्थानं वृन्दावनमित्यर्थः । इह त्वं आपन्नः प्राप्तः सदेशं समीपं यथा स्यात्तथा धीराधिकं कुर्वीथाः, प्रतिमुदिता धीर्यस्या एवंभूता राधिका यत्र तत् , किं कुर्वन् नेत्रान्तप्रणयकलिका खड्गलतिकया परिक्लेश-म्लेच्छान् अकृन्तन् नेत्रान्तेन अपाङ्गेन या प्रणयकलिका अपाङ्गेन कुशलरूपेति भावः सैवा खड्गलतिका तया, परिक्लेशो विरहवेदनात्रनेच्छा स्थानकृन्तनछिन्दन्म्लेच्छत्वं छिन्नरूप-जनकत्वात् । क्लेशानां कीदृश्या समदेति-मनदा प्रेमतुल्या मधुपाली भ्रमरश्रेणी तद्वत् मधुरया मनोहरया, उभयपक्षेऽपि तुल्यम् । त्वं कीदृक् गोपाहितरतिः गोपेषु आहिता अर्पिता रतिर्येन सः । यद्वा इदं देशं यद् ईशयुक्तं स्वामिकं कुर्वीथा इदानीं त्वयि गते अस्वामिकमेतत्स्थानं त्वयि समागते तु स्वामिकं भविष्यतीति भावः । अत्र प्रतिमुदिताधीराधिकमिति योज्यम् । "सदेशाभ्यास-सविध-समर्य्यादा-सवेशवदेति", "निकटपर्य्यायेऽमरः" ॥१३७॥

अनु०—हे कल्किन् ! मतवाले भ्रमर समूह समान मनोहर अपाङ्ग भङ्गी द्वारा प्रेम प्रकाशक रूप-असिलता (तलवार) अर्थात् प्रेम तरङ्गित अपाङ्ग भङ्गी रूप असि द्वारा, हमारे विरह सन्ताप रूप म्लेच्छ गण को विनष्ट करते हुए, चतुर नर्म सखा, सुबल मधु-मंगल आदि के प्रति प्रेम प्रदर्शन कर आप इस वृन्दावन में आ-गमन कीजिये तथा प्रणय लीला स्थली में जिससे श्री राधिका को आनन्द प्राप्त हो, ऐसा उपाय कर उसे सुखी कीजिए। पक्षे-हे क-ल्किन् ! मत्त मधुप समूह सदृश मनोहर खड्ग के द्वारा सर्वसाधा-रण का क्लेश तथा आचार हीन म्लेच्छ गण को संहार करो। आप अवतार लेते ही अश्व-पृष्ठ पर सवार हो आर्य भूमि से जिससे आपके अवतार से आनन्दित भक्तों की संख्या वृद्धि हो

सके ऐसा विधान स्थापित करो अर्थात्-निज कृपा पात्र इ
को पाप-भार से शीघ्र उन्मुक्त करो ॥१३७॥

मुखोल्लास–दोहा

कल्कि रूप श्री कृष्ण के, चरित विचित्र नवीन।
ललिता वरनत हंस सों, दरस आस में लीन ॥१३७॥

मूल की भाषा पद्य–छप्पय

श्री कल्कि अवतार पक्ष में—

अहो कल्कि अवतार प्रभो कलि अन्त कलाधर।
चतुर अश्व पर चढ़त आप हित सों चित रुचि कर॥
श्याम चखन की कान्ति मत्त अलिपांति मनोहर।
खड्ग लता की भांति प्रीति रचना विलास वर॥
ताही कृपान सों काटिये निज जन क्लेश रु म्लेच्छ ग
कीजै स्वदेश हर्षित सबै कृपा नाथ अशरन शरन ॥१३

श्री कृष्ण पक्ष में—

अहो कल्कि श्री कृष्ण आप वृन्दावन आवें।
सुबलादिक प्रिय गोप तिनहिँ हित सों अपनावें॥
मत्त भ्रमर की पाँति भाँति निज श्याम दृगन को।
खड्ग लता करि काटहिँ क्लेश रूप म्लेच्छन को॥
निज विशद बुद्धि सों कीजिये देश देह राधा मुदित।
यह दरस आप को सुखद नित कृष्णचन्द्र उज्ज्वल उदित

सारांश–सोरठा

खड्ग लता सम नैन क्लेश म्लेच्छ तिन सों हतौ।
राधा देश सुचैन करौ अश्व पति कल्कि हरि ॥१३७॥

०००

इति प्रेमोद्घाटस्थपुटितवचोभङ्गिरखिलं
त्वमावेद्य क्लिद्यन्मुखपरिसरो लोचनजलैः ।
ततो गोविन्दस्य प्रतिवचनमाध्वीकपदवी-
मुपासीनो दग्ध्यां क्षणमवदधीथाः खगपते ! ॥१३८॥

टीका—अखिलान् संकथार्थान् उपदिश्यानन्तरं करणीयमुपदिशति इतीति । हे खगपते ! त्वं इत्यनेन प्रकारेण इति पूर्वोक्तमखिलं समग्रं आवेद्य कथयित्वा तत् स्थाने दग्ध्यां गोविन्दस्य प्रतिवचनं प्रत्युत्तरं तदे-चातिमादकत्वात् माध्वीकं मधुरतरं तस्य पदवीं पन्थानं उपासीनं मनः क्षणमवदधीथा अवधानपरा भविष्यसि, दग्ध्यामिति अस्मत् सन्देशे कथिते तस्य मुखप्रसादो भवति क्रोधोदयो भवति च । यद्वा एकदृग् निरीक्षणं कदा किमिङ्गितेनापि कथयतीति सावधानार्थम् । त्वं कीदृक् लोचनजलैः परिक्लिद्यन्मुखपरिसरः परिव्याकुलमुखप्रान्तदेशः, पुनः कीदृक् प्रेमेति-प्रेम उद्घाट्यते यत्र वाग्भङ्ग्यां प्रतिपदं अन्तर्हितं प्रेम प्रकाश्यते साभिप्रायशब्दोपादानात् । यद्वा प्रेम उद्घाटः प्रकाशो यत्र एतादृशी प्रेमपुटिता आस्वाद्यत्वातिशयतया अर्पिता वाक् सा प्रकाश्यते यैः ते शब्दाः तैः संपुटिता संपुटीकृता-वद्वाग्भङ्गी यस्य, यद्वा गवेषणे प्रेम स्फुटं भवति । समुद्योन्म्युत्पत्त्याधीनेन उद्घाट्यतेऽसौ उद्घाटः ॥१३८॥

अनु०—हे पक्षिराज हंस ! प्रेम सहित इस तरह अत्यन्त विषम भावापन्न दुर्गम दो अर्थबोधक वाक्य भङ्गि द्वारा प्रेमाश्रु पूर्ण नयनों से अति विनीत भाव से तुम हमारी सब कथा निवेदन करना उसके पश्चात् श्रीकृष्णचन्द्र के युगल चरण कमलों में नयन भृंग लगाकर क्षण भर उनके प्रत्युत्तर की आशा से सावधान चित्त हो प्रतीक्षा करते रहना ॥१३८॥

सुखोल्लास-दोहा

दश अवतारन की कथा, कृष्ण कृपा सुख कन्द ।
हरैं हमारे दुःख सब, सुनहु हंस सानन्द ॥१३८॥

मूल की भाषा पद्य-छन्द गीतिका

हे खगपते ! करते प्रकाशित प्रेम पूरित रीति सों ।
करियो विनय श्री कृष्ण प्रति या भांति प्रीति प्रतीति सों ॥
निज लोचननि जल सींचि मुख, प्रभु वचन रचना माधुरी
दृग जोरि कें तहँ बैठि छण, सुनियो, कहैं जो कछु हरी।१:

सारांश-सोरठा

गहैं प्रेम आधार कहिय सँदेसौ कृष्ण सौं ।
पुनि अवसर अनुसार सुनिय हंस उत्तर सजग ॥१३८॥

००००

प्रणेतव्यो दृष्टेरनुभवपथं नन्दतनयो
विधेया गोपीनां भुवनमहितानामुपकृतिः ।
इयं यामैर्गम्या चतुर ! मथुराऽपि त्रिचतुरै-
रिति द्वैधं नान्तः कलय कलहंसीकुलपते ! ॥१३९॥

टीका—गमनशीलं हंसं निरीक्ष्य गन्तुं सन्दिहानमिवालोक्य प्रस्तोभयति प्रणेतव्य इति । नन्दतनयः श्रीकृष्णो दृष्टेरनुभवपथं प्रत्यक्षतां प्रणेतव्यः कर्त्तव्य इति दर्शनस्य दौर्लभ्यम् । गोपीनामुपकृतिरुपकारः विधेया कर्त्तव्या, तासामाधिक्यसूचनामाह—भुवनमहितानां भुवनेषु पूजितानां, एतेन जगत् पूजितानामुपकृतिकरणे तासां प्रसादनं तत्र सर्व्वथा लाभो भवेदिति सूचितम् । ननु भवत्वेवं बहुदिनगम्या मथुरा कथं गन्तव्येति चेत् तत्राह—इयं प्रायः पुरोवर्त्तिनी मथुरा, त्रिचतुरैर्यामैर्गम्या गन्तुं शक्या त्रिभिर्चतुर्भिर्व्वा प्रहरैः, हे चतुर ! कलहंसी-कुलपते !

इति अस्मिन्नवसरे कार्ये वा अन्तः द्वैधं संशयं न कलय न कुरु, इति हेतो यतो द्रष्टव्यो महान् उपकृतिः सर्वार्थदा तत्राल्पकालसाध्या इति हेतोरर्थः। चतुरेति सम्बोधनेनाल्पेन महाभीष्टसिद्धे परित्यागो ऽनुचित इति त्वं वेत्सि इत्युक्तम्। कलहंसीकुलपतित्वात् स्त्रीणां वैक्लव्यं जानासीत्युक्तम्। त्रिचतुरैरिति त्रयो चत्वारो वेति चार्थे प्रथमान्य-पदार्थः। चतुरः सुप्रिनच् व्युत्पादित्वं समासान्तः। "द्वौ यामौ प्रहरौ समौ" इत्यमरः ॥१२४॥

अनु०—हे चतुर कलहंस! निज नयनों द्वारा श्री नन्दनन्दन के स्वरूप को अपने हृदय में धारण करना अर्थात् नयन पुट के द्वारा उनकी रूप माधुरी का हृदय में आस्वादन करना। प्रेमार्त्त गोपी-गणों पर उपकार करना आपका कर्त्तव्य है। देखो इस स्थान से मथुरा तीन चार प्रहर में पहोंच जाओगे। तुमको विशेष विलम्ब और श्रम भी न होगा। इससे अपने मन में कोई सन्देह या दु-विधा न करना। कारण कि,इससे तुमको विशेष परिश्रम न होगा और हमारा महान् उपकार होगा। तुम परम चतुर एवं प्रेम व्यव-हार में पण्डित हो। इस लिए तुम्हारे निकट हमारा यह अनुरोध अग्राह्य न होगा यह मैं विश्वास करती हूँ ॥१२४॥

मुग्धोल्लास—दोहा

आप होहि कृत कृत्य जग, कृष्ण दरस को पाय।
गोपिन काज सँभारिये, हंस मधुपुरी जाय ॥१२४॥

मूल की भाषा पद्य—छप्पय

हे कलहंसी कुल पति! कारज सिद्ध रूप हग।
होँहि रावरे अनुभव नँदनन्दन तिन के मग॥
तदनन्तर उपकार लोक पूजित गोपिन को।
कीजै, पहुँचन माहिँ त्यागि संशय निज मन को॥

यह पहर तीन वा चार कौ पथ मथुरा अनुमानिये।
हे चतुर! कहन सन्देश अरु लाभ दरस हरि जानिये॥१३९॥

सारांश—सोरठा

हंस बेगि सन्देश हरि कों जाय सुनाइये।
पाऔ जो निर्देश आय सुनाऔ हमहि सब॥१३९॥

००००

अपूर्वा यस्यान्त र्विलसति मुदा सारसरुचि-
विवेक्तुं शक्येते सपदि मिलिते येन पयसी।
कथङ्कारं युक्तो भवतु भवतस्तस्य कृतिनो
विलम्बः कादम्बीरमण! मथुरासङ्गमविधौ॥१४०॥

टीका—किञ्च सारासारविचारचतुरस्य तव एतत् कर्मणि विलम्बोऽनाहित इत्याह अपूर्वेति। यस्य तव अन्तःकरणे सा प्रसिद्धा रसरुचिः बिलसति, अथच सारसं सरसीरुहं तत्र रुचिरभिलाषः अतः पद्मखण्डोपभोगयोगिनं तु समुचितम्। येन सारसरसरुचिविलासेन सपदि तत्क्षणं मिलिते एकत्रीकृते पयसी दुग्धजले विवेक्तुं पृथक्कर्त्तुं शक्येते, अत्र येनेति क्रियापदस्य सिद्धवन्निर्देशात् विशेषणं, यथा नैषधीये—"कण्ठे वसन्ती चतुरा यदस्याः सरस्वती वादयते विपञ्चीम्। तदेव वाग्भूय मुखे मृगाक्ष्याः इति। तत्र व्याख्यातं टीकाकृद्भिः—"तदेव विपञ्चीवादनमिति" यद्वा येन त्वया इत्यर्थः। तस्य एवंभूतस्य कृतिनो निपुणस्य भवतो मथुरासङ्गमविधौ विलम्बः कथङ्कारं युक्तो भवतु, हे कादम्बीरमण! एतादृक् सारासारमयविवेकनिपुणस्य सारसे रुचिं वहतः कृतिनो किं मथुरागमने विलम्बो भवति नैवेति भावः॥१४०॥

अनु०—हे हंसी वल्लभ! तुम्हारे मन में सरोवर में विचरण करने की अद्भुत अभिलाषा है। तुम मिश्रित नीर क्षीर में से सार वस्तु

नीर को शीघ्र ही पृथक् करने की क्रिया में समर्थ एवं निपुण हो। अब मथुरा गमन में विलम्ब करना तुमको उचित नहीं है अर्थात् तुम शीघ्र ही मथुरा गमन करो ॥१४०॥

मुखोल्लास-दोहा

राधा कृष्ण मिलाप की, ललिता मन अति चाह।
पंथ सुगमता हंस सों, वर्णन करत उत्साह ॥१४०॥

मूल की भाषा पद्य-छन्द दोधै

हे हंसी के सुखद ! अपूरब शरद कमल कुल नीकी।
पावत छवि शुचि कान्ति तुम्हारे शुक्ल कलेवर ही की॥
मिले भये पय पानी तुम सों न्यारे ह्वै दरसावैं।
ऐसे कुशल गमन मथुरा प्रति उचित न बार लगावैं ॥१४०॥

सारांश-सोरठा

तन छवि श्वेत सुढार पय पानी न्यारे करत।
उचित न लावन बार हंस ! मधुपुरी गमन में ॥१४०॥

००००

प्रपन्नः प्रेमाणं प्रभवतिस दा भागवतभाक्
पराचीनो जन्मावधि-भवरमाद् भक्तिमधुरः।
चिरं कोऽपि श्रीमान् जयति विदितः साकरतया
धुरीणो धीराणामधि-धरणि वैयासकिरिव ॥१४१॥

टीका—इदानीं समाप्य कविरात्मनो गुरुं श्रीचैतन्यदेवं वर्णयति प्रपन्न इति। अधिधरणि धरण्यां कोऽपि धीराणां धुरीणः श्रेष्ठः चिरं जयति उत्कर्षमाविष्करोति। गुरुनामग्रहणे दोषश्रवणात् कोऽपीत्युक्तम्। तथाच—"आत्म नाम गुरोर्नाम नाम्नः क्रियमाणस्य च। अभिलषस्य नामानि न गृह्णीयात् कदाचनेति"॥ स कीदृक् भवति श्रीकृष्णे प्रेमाणं

प्रपन्नः प्रेमभक्तिप्राप्त इत्यर्थः । पुनः कीदृक् भक्तिमधुरः भक्तिः श्रीकृष्ण भजनं सैव मधुरो प्रियो यस्य, पुनः कीदृक् श्रीमान् श्रीयुक्तः श्रीः शोभा, सदा भागवतभाक् श्रीभागवताख्यं ग्रन्थं भजते अनुशीलयतीति तथा, यद्वा भागवताः नारद-प्रह्लादादयस्तान् भजते तत्तत् प्रणीतसम्प्रदाय-प्रवर्त्तनेनानुकूलयतीति तथा, यद्वा भगवत इमे भागवता आर्जवकारुण्यादयः गुणास्तान् भजते इमे बहवो'नित्या यत्र महागुणाः'इति प्रथम-स्कन्धे पृथिव्या भगवद्गुणकथनात् । पुनः कीदृक्-जन्मावधि जन्मतः प्रभृति भव-रसात् संसाररागात् पराचीनः पराङ्मुखः अन्तर्दृष्टत्वात्, पुनः कीदृक् भक्तिमधुरः भक्तिः श्रीकृष्णभजनं सैव मधुरा प्रिया यस्य, पुनः कीदृक् श्रीमान् श्रीयुक्तः श्रीः शोभा, पुनः कीदृक् श्रीकरतया ईश्वरतया विदितः अयमीश्वरोऽवतीर्ण इति जनैः ज्ञातः, क इव वैयासकिः शुकस्तद्वत्, विशेषणानि उभयत्र तुल्यानि । स्वश्लेषं सनातनं वा वर्णयति तत्राप्ययमर्थः । "श्रीर्वेशरचना शोभा भवति" । "सरस-द्रव्ये लक्ष्म्यां त्रिका सम्पत्तिरिवोपकरणेषु च विभुतौ च मतौ चेति" मेदिनी । रस उक्तः ॥१४१॥

अनु०–श्रीसनातन गोस्वामीपाद पक्ष में–पृथ्वी पर श्रीशुकदेव सदृश भगवत में प्रेम परायण, निरन्तर भागवत जनों के प्रिय अथवा नारद-प्रह्लादादि भागवत जनों के मार्ग प्रवर्त्तक, किंवा भागवत शास्त्र में रसिक, जन्म से लेकर संसार रस से विमुख, भक्ति रस में परम मधुर तथा धीरों रसिक पण्डितों में अग्रगण्य गृहस्थिति के समय साकर मल्लिक नाम से विख्यात कोई अनिर्व-चनीय महिमा वाले श्रीसनातन गोस्वामी चिरकाल पर्य्यन्त स-र्वोत्कर्ष रूप में विराजमान हैं ।

महाप्रभुपक्ष में–पृथ्वी पर श्रीशुकदेव सदृश कृष्ण-प्रेम दान परायण, निरन्तर भागवत शास्त्र के प्रवर्त्तक, अथवा नारद-प्रह्लादादि भागवत जनों के मार्गोपदेष्टा किंवा आर्जिव-कारुण्यादि भ वत

महागुणों से नित्य-विभूषित, आविर्भाव समय से लेकर सर्वदा संसार राग से पराङ्मुख, भक्ति प्रिय, शोभायुक्त (महालक्ष्मी स्वरूपा श्रीराधिका भाव-कान्ति से आच्छादित), महानुभाव-विचक्षण-शास्त्रदर्शी पण्डित जनों के द्वारा ईश्वर करके ज्ञात, निजकुलदैवत कोई अनिर्वचनीय महिमा वाले सर्वोत्कर्ष रूप में विराजमान हैं ॥१४१॥

मुखोल्लास—दोहा

हंस दूत या ग्रन्थ के कर्ता रहित विषाद ।
तिन की महिमा संकलित बरनत आशीर्वाद ॥१४२॥

मूल की भाषा छन्द—गीतिका

भू लोक में शुकदेव सम रस लीन भगवत भक्ति के ।
चिर भक्त जन सेवी, विमुख संसार विषयक शक्ति के ॥
जग ख्याति साकर नाम चिर बुध संडली मंडन अहैं ।
श्री युक्त गोस्वामी सनातन कवि विजय कीरति लहैं ॥१४१॥

सारांश—सोरठा

श्री शुकदेव समान परम भागवत भूमि पै ।
साकर ख्याति प्रमान स्वामि सनातन कवि विमल ॥१४१॥

○○○○

रसानामाधारैरपरिचितदोषः सहृदयै-
मुरारातेः क्रीडा-निविड-घटना-रूप-महितः ।
प्रबन्धोऽयं बन्धोरखिलजगतां तस्य सरसां
प्रभोरन्तः सान्द्रां प्रमदलहरीं पल्लवयतु ॥१४२॥

इति श्रीलरूपगोस्वामिप्रभुपादविरचितं हंसदूताख्यं
काव्यं समाप्तम् ।

टीका—प्रबन्धस्य गुणविशेषख्यापनपूर्व्वकं स्वनाम च श्लेषेण दर्शयन् एतत्करणे श्रीकृष्णप्रीतिमाशास्ते रसानामिति । अयं प्रबन्धः एतत् काव्य तस्य अघोरन्तः करणे सान्द्रं निबिडं प्रसादलहरीं पल्लवयतु वर्द्धयतु । तस्य कीदृशस्य अखिलजगतां ,बन्धोः मित्रस्य सर्व्वत्र तुल्यस्नेहात् । प्रबन्धः कीदृक् मुरारातेरित्यादि, मुरारातेः श्रीकृष्णस्य या क्रीडाया. निबिडघटना तस्या रूपेण महितः पूजितः, क्रीडापदेन क्रीडाप्रतिपादक-शब्दः तस्य निबिडघटना निरन्तरं मे मनोयोजन-रूपाया वृत्तिस्तेन महितः पूजितः, यद्वा मुरारातेः क्रीडार्थं या निबिडघटना हंसदूतद्वारा मे मनः तद्रूपेण तत्प्रतिपादकशब्देन महितः युक्तः, यद्वा मुरारातेः क्रीडाया या निबिडघटना तत्प्रतिपादकनिरूपाणि श्लोकास्तैः महितः, अथवा मुरारातेः क्रीडाया या निबिडघटना अतिशयवर्णनं तया रूप-नाम्ना कविना महितः पूजितो निर्म्मित इति यावत् धातोरनेकार्थत्वात् अनेन श्लेषेण स्वनाम यस्य च यत् । पुनः कीदृक् सहृदयैः पण्डितै-रपरिचितदोषः अपरिचितोऽदृष्टदोषश्च्युतसंस्कारादि अदोषदृष्ट इत्यर्थः प्रतिज्ञेयम्,सहृदयैः कीदृशैः रसानां शृङ्गारादीनां काव्यवर्णनीयानां आधारैः रसविशेषानुभवचतुरैरित्यर्थः, यद्वा रसरूपाणि ते च शब्दानामेव शब्द-रूपाणामाधारैरित्यर्थः । "शृङ्गारादौ विषे वीर्य्ये रूपे रागे द्रवे रस" इत्यमरः । "रूपं स्वभाव-सौन्दर्य्ये नामके पशुशब्दयोः । ग्रन्थावृत्तौ नाटकादावाकारश्लोकयोरपीति" ॥१४२॥

आसीद्वैद्यकुले जनो गयवटीख्यातो हिरण्याभिधः । चत्वारस्तनयास्ततः समभवन् वेदा विधातुर्यथा ॥ तेषां ख्यातसुकर्म्मणां क्षितिजने ज्यायान-नन्तः शिवो । द्वैतीयेकतया मतः शिवसुतो ज्ञानं महेशस्तथा ॥ दुर्गा-दास समाह्वयः समजनि ज्ञानात्मजातः कृती । यश्चण्डीश-पदाम्बुजद्वय-रजोराजी विराजद्वपुः ॥ नानाशास्त्रविचारचारुचतुरः काव्येषु भव्याशयः । श्रीमांस्तत्तनयो गुणैकनिलयो गोपालनामा भवत् ॥ यः शब्दागमवारिधिं समभवत् काव्याम्बुधौ क्रीडति । छन्दोज्योतिषनाटकादिविपिने धत्ते च

सैंहीं च्युतिम् ॥ तन्वे सत्प्रतिमः पुराणनिवहे कोषेषु चालंकृतौ । यश्चक्रे कतिशो न वा निजमते शब्दादिषु व्याकृतीः ॥ यस्येयं सुपरा-मरावनिपतिः श्रीवैष्णवानां मुदः । तुङ्गामातनुते यथा सुरपतिर्वाचस्पते-रादरात् ॥ तस्येयं कृतिनः कृतिर्विजयतां टीकार्थवत्युज्ज्वला । सन्त-स्त्वाकलयन्तु सन्ततमिमां न्यून्‌ ना कृतो मेऽञ्जलिः ॥ अर्वाचीनेय-मित्येवानादरस्मान्न मुज्यते । जलधौ जायमानं किं नूनं रत्नं न गृह्यते ॥ शकाब्दे रस-नन्द-बाण-शशिभिः सङ्ख्यिते फाल्गुने । मासे श्रीकविचन्द्र-पादकमलध्यानैकतानः सुधीः ॥ श्रीगोपालवरामरः समनयो टीकामिमां प्रीतये । विष्णोर्विश्वसुहृत्तमाः पुनरमुं पश्यन्तु सन्तो मुदा ॥

इति श्रीकविचन्द्रचरणसरसीरुहमकरन्दानन्दितेन्दिरायमानमानसः श्रीश्रीगोपालचक्रवर्त्तीविरचिता हंसदूतकाव्यस्य टीका समाप्ता ।

श्रीकृष्णचैतन्यचन्द्राय नमः ॥

अनु०—शृंगारादि रसों के अनुभव में चतुर किम्वा रस रूप शब्दों के धारणकारी सहृदय पण्डित जनों में "श्रुतिकटु, च्युत-संस्कारादि दोषों से रहित" इस प्रकार निर्णीत अर्थात् रसवेत्ता पण्डितों का परम उपादेय स्वरूप, अखिल जग के बन्धु, मुरारी श्रीकृष्ण की क्रीडावलियों की निविड घटनारूप में पूजित, किम्वा मुरारी श्रीकृष्ण की क्रीडावली का अतिशय वर्णन के कारण निज रचयिता रूप नामक कवि के साथ पूजित, "हंसदूत" नामक यह प्रबन्ध अखिल जग के बन्धु, उन श्रीसनातन प्रभु के अन्तःकरण में निविड प्रमोदलहरी का विस्तार करें । पक्षान्तर में—उनकी लीला-वलियों से संघटित होने के कारण यह प्रबन्ध अखिल जग के आश्रय उन प्रभु श्रीकृष्ण के अन्तःकरण में अतिशय प्रमोदलहरी का विस्तार करे ॥१४२॥

कोरा निवासी पण्डित हरिकृष्ण "कमलेश" के द्वारा विरचित

यह हंसदूत काव्य का गद्यानुवाद समाप्त ।

मुखोल्लास—दोहा

आशीर्वादात्मक कथन, ग्रन्थ प्रशंसा साथ।
अन्त मङ्गलाचरण यह, हरि जन सुखप्रद गाथ ॥१४२॥

मूल की भाषा पद्य—छन्द गीतिका

जग वन्धु श्रीव्रजचन्द के आनन्द अतिशय की लता।
यह हंस दूत निबन्ध राखौ सघन पल्लव आवृता॥
आधार श्रृङ्गारादि रस दूषण रहित कवि जन गन्यौ।
श्रीकृष्णचन्द्र चरित घटना रूप सों साम्प्रति बन्यौ॥

सारांश—सोरठा

हंस दूत रस सार दूषण बिनु कवि जन लख्यौ।
सो हरि चरित उदार करत रहै विस्तृत जगत ॥१४२॥

श्रीलाला बिहारीलाल गर्ग के आत्मज
श्रीमान् स्वर्गीय मुन्शी पन्नालालजी
(प्रेमपुंज) के द्वारा विरचित
यह "हंसदूत" काव्य का
पद्यानुवाद समाप्त।

भज—निताइ गौर राधेश्याम ।
जप—हरे कृष्ण हरे राम ॥

परमाराध्य, संकीर्त्तन प्रचारक, प्रेममयविग्रह, श्रीराधा-रमणचरणदासदेव बड़े (बाबाजी) के अनुगत, नित्यधामगत, श्रीगुरुदेव बाबाजिमहाराज १०८ श्री बाबा (रामदासजी) के पुनीत स्मरण में यह ग्रन्थ समर्पित है ।

पुस्तक मिलने का पता:—
(१) मोतीराम गुप्ता, भगवान भजन आश्रम,
बल्लीगंज (वृन्दावन)
(२) मुरारीलाल बुकसेलर्स,
असकुंडा (मथुरा)

मुद्रक:—
रमनलाल बंसल,
पुष्पराज प्रेस, मथुरा